Digitization by eGangotri-South Center

कुमार संभवम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्रीविद्यामाधवरचिताः प्रकाशितग्रन्थाः

१. मुहूर्त दर्शनम्/विद्यामाधवीयम्/मुहूर्त माधवी
२. मुहूर्तदर्पणः
३. श्रीसूक्त व्याख्या
४. पार्वती-रुक्मिणीयम्
५. दीपिका/कुमार सम्भव व्याख्या

श्रीविद्यामाधवरचिताः अप्रकाशितग्रन्थाः

१. विद्वज्जनवल्लभा/सन्देहविषौषधिः/शिशुपालवध व्याख्या
२. विद्या माधवीयम्/किरांतार्जुनीय व्याख्यानम्
३. कामधेनु/कामदुघा/नैषधव्याख्या
४. मेघमालामञ्जरी
५. मेघानयनम्
६. लघुप्रकाशिका
७. सौन्दर्यलहरी व्याख्या

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

महाकविकाळिदासविरचितं

कुमारसम्भवम्

श्रीविद्यामाधवपण्डितविरचितदीपिकाव्याख्यासहितम्

हित्लळ्ळि-सूर्यनारायणनागेन्द्रभट्टसंस्कृतम्

प्रकाशनम्

हव्यक-अध्ययनकेन्द्रम्

श्रीअखिलहव्यकमहासभा(रि),

मल्लेश्वरम्, बेङ्गळूरु - ५६०००३

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

महाकविकाळिदासविरचितं कुमारसम्भवम्
श्रीविद्यामाधवपण्डितविरचितदीपिकाव्याख्यासहितम्
हित्लळ्ळिसूर्यनारायणनागेन्द्रभट्टपरिष्कृतम्

प्रथममुद्रणम्
श्रीशालिवाहनशक १९४३ प्लवसंवत्सरः कार्तिकमासः १५
पुटसंख्या २४८
मूल्यम् ३०० रूप्यकाणि (प्रचिकाशयिषितप्रकाशनार्थम्)

Mahakavi Kalidasa virachitam Kumarasambhavam
Shri Vidyamadhava Pandita virachita Dipika vyakhya sahitam
Hitlalli Suryanarayana Nagendra Bhatta parishkritam

First edition November 2021
Pages 248
Price Rs.300/- (Fund for unpublished works of Author)

Publisher
Havyaka Adhyayana Kendra
Shri Akhila Havyaka Mahasabha(R)
Malleshwaram, Bangalore - 560003

Standerd Printers
Shanakara puram, Bangalore

Sponsors
Shri Mahabaleshvar Pandit Pune &
Dr. Parameshvara Pandit Bangalore

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



श्रीविद्यामाधवपण्डितपूजितः गुणवतीगणपतिः

श्रीशङ्कर भगवत्पाद पूजितः श्रीलक्ष्मीनृसिंहः

श्रीशङ्करभगवत्पादः

समर्पणम्

आ सेतोः आतुषाराद्रेः असकृत् सञ्चारं विधाय, चतसृषु दिक्षु आम्नायपीठचतुष्टयं प्रतिष्ठाप्य भारतदेशस्य अखण्डतां प्रदर्श्य सनातनं धर्मं पालयितुं जनतां प्रबोध्य श्रीकेदारक्षेत्रे अन्तर्लीनः श्रीशङ्करभगवत्पादः सादरं स्मर्यते, यस्य शिष्यपरम्परायां बभूव गुणवतीनिवासी सकलशास्त्रपारदृश्वा श्रीविद्यामाधवः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ಕುಮಾರ ಸಂಭವ ವ್ಯಾಖ್ಯಾನ ಗ್ರಂಥ

ಸಂಸ್ಕೃತ ಸಾಹಿತ್ಯ ಕ್ಷೇತ್ರದಲ್ಲಿ ಜಗತ್ತಿನಲ್ಲೇ ಅತಿಹೆಚ್ಚು ವಿಮರ್ಶಾ ಸಾಹಿತ್ಯ ಹುಟ್ಟಿಕೊಂಡದ್ದು ಸಾಹಿತ್ಯಲೋಕದ ಸಾರ್ವಕಾಲಿಕ ಧ್ರುವತಾರೆಯಾದ ಕವಿ ಕಾಳಿದಾಸನ ವಿಚಾರದಲ್ಲಿ ಎಂದರೆ ಅತಿಶಯೋಕ್ತಿಯಲ್ಲ. ಮಹಾಕವಿ ಕಾಳಿದಾಸನ ಕೌಶಲ ಪರಿಪಾಕದಲ್ಲಿ ಆವಿರ್ಭವಿಸಿದ 'ಕುಮಾರಸಂಭವ'ವು ಸರ್ವಕಾಲಕ್ಕೂ ಸಲ್ಲುವ, ಸರ್ವರ ಮನ ಗೆಲ್ಲುವ ಸಂಸ್ಕೃತ ಭಾಷಾ ಸಾಹಿತ್ಯದ ಮಹೋನ್ನತ ಗ್ರಂಥಗಳಲ್ಲಿ ಒಂದು. ಇಂತಹ ಮೇರು ಕೃತಿಯ ಬಗ್ಗೆ ವ್ಯಾಖ್ಯಾನ ಬರೆದು ಮೆರೆದವರು ಹನ್ನೆರಡನೇ ಶತಮಾನದಲ್ಲಿ ಉತ್ತರ ಕನ್ನಡ ಜಿಲ್ಲೆಯ ಹೊನ್ನಾವರದ ಗುಣವಂತೆಯ ಬಳಿ ಜನಿಸಿ ರಾಷ್ಟ್ರವೇ ಹೆಮ್ಮೆ ಪಡುವಂತೆ ಹಲವಾರು ಸಂಸ್ಕೃತ ಗ್ರಂಥಗಳ ಕರ್ತೃವಾದ ಉತ್ತಮೋತ್ತಮ ವಿದ್ವಾಂಸರಾದ ವಿದ್ಯಾಮಾಧವ ಪಂಡಿತರು. ಅವರ ಕೃತಿಗಳು ಗುಣಗಳ ಗಣಿಯಿಂದ ಹೊರಹೊಮ್ಮಿದ ಹೊನ್ನು. ಹವ್ಯಕ ಮನೆತನದಲ್ಲಿ ಜನಿಸಿ ತಮ್ಮ ವಿದ್ವತ್ಪೂರ್ಣ ಜ್ಞಾನಧಾರೆ ಹಾಗೂ ಭಾಷಾಧಾರೆಯನ್ನು ಅನಂತಕಾಲದವರೆಗೆ ಸಕಲರ ಹೃನ್ಮನ ಗೆಲ್ಲುವಂತೆ ಗ್ರಂಥಗಳನ್ನು ರಚಿಸಿದ್ದು ಶಿಖರ ವಿದ್ವಾಂಸರಾಗಿ, ಅನರ್ಘರತ್ನವಾಗಿ, ಮುಕುಟಮಣಿಯಾಗಿ ಪ್ರಕಾಶಿಸಿದ್ದು ಸಮಸ್ತ ಸಮಾಜಕ್ಕೆ ಹಿರಿಮೆ ಗರಿಮೆಯ ವಿಷಯ. ಅವರ ವಂಶಜರು ಇಂದಿಗೂ ಪಂಡಿತರೆಂಬ ಕುಲನಾಮ ಪಡೆದುಕೊಂಡು ಶಿಕ್ಷಣ ಕ್ಷೇತ್ರದಲ್ಲಿ ಹಾಗೂ ಸಮಾಜಸೇವೆಯಲ್ಲಿ ತತ್ಪರರಾಗಿರುವುದು ವೇದ್ಯ ಮತ್ತು ಸ್ತುತ್ಯ ವಿಚಾರ. ವಿದ್ಯಾಮಾಧವರ ಅನೇಕ ಕೃತಿಗಳು ಇನ್ನೂ ಪ್ರಕಟಗೊಂಡಿಲ್ಲ ಎಂಬುದು ಖೇದಕರ ಸಂಗತಿ. ಈ ಬೇಗುದಿಯನ್ನು ನೀಗಲು ವರ್ತಮಾನದ ಹಿರಿಯ ವಿದ್ವಾಂಸರಾದ ಹಿತ್ಲಳ್ಳಿಯ ಡಾ. ಸೂರ್ಯನಾರಾಯಣ ಭಟ್ಟರು ಕುಮಾರಸಂಭವ ವ್ಯಾಖ್ಯಾನವನ್ನು ಸಂಪಾದಿಸಿರುವುದು ಹಾಗೂ ವಿದ್ಯಾಮಾಧವ ಪಂಡಿತರ ವಂಶಸ್ಥರೇ ಉತ್ಸಾಹದಿಂದ ಪ್ರಾಯೋಜಿಸಲು ಮುಂದಾಗಿರುವುದು ಶ್ಲಾಘ್ಯ ಕಾರ್ಯವಾಗಿದೆ.

ಹವ್ಯಕ ಅಧ್ಯಯನ ಕೇಂದ್ರವು ಕ್ರಿಸ್ತಶಕ 2018ರಲ್ಲಿ ಬೆಂಗಳೂರಿನ ಅರಮನೆ ಮೈದಾನದಲ್ಲಿ ವಿಜೃಂಭಣೆಯಿಂದ ನಡೆದ ಶ್ರೀ ಅಖಿಲ ಹವ್ಯಕ ಮಹಾಸಭೆಯ ಅಮೃತ ಮಹೋತ್ಸವ ಹಾಗೂ ದ್ವಿತೀಯ ವಿಶ್ವ ಹವ್ಯಕ ಸಮ್ಮೇಳನದ ಸಂದರ್ಭದಲ್ಲಿ ನೂರು ಕೃತಿಗಳನ್ನು ಏಕಕಾಲದಲ್ಲಿ ಲೋಕಾರ್ಪಣೆ ಮಾಡಿದ್ದ ಐತಿಹಾಸಿಕ ದಾಖಲೆಯ ಸುವಿಖ್ಯಾತಿಯನ್ನು ಹೊಂದಿದೆ. ಹವ್ಯಕ ಅಧ್ಯಯನ ಕೇಂದ್ರದ ಸ್ಥಾಪಕ ಪ್ರಧಾನ ನಿರ್ದೇಶಕ ಶ್ರೀ ನಾರಾಯಣ ಶಾನುಭಾಗರ ಅಪಾರವಾದ ಪ್ರೇರಣೆ, ಲವಲವಿಕೆ. ಪ್ರಸ್ತುತ ಸಂಚಾಲಕರಾದ ಶ್ರೀ ತೆಕ್ಕೆಕೆರೆ ಸುಬ್ರಹ್ಮಣ್ಯ ಭಟ್ಟರ ಕಾಳಜಿ. ಮುತುವರ್ಜಿಗಳಿಂದ ಈ ಗ್ರಂಥ ಪ್ರಕಟಣೆ ಸಾಧ್ಯವಾಗುತ್ತಿರುವುದು ಶ್ರೀ ಅಖಿಲ ಹವ್ಯಕ ಮಹಾಸಭೆಗೆ ಸಂತಸ ತಂದಿದ್ದು ವಿದ್ವಜ್ಜನರಿಗೆ ಪ್ರೇರಕವಾಗಿ, ಆಕರವಾಗಿ, ಸಾಕಾರಗೊಳ್ಳಲಿ ಎಂಬುದು ನಮ್ಮೆಲ್ಲರ ಆಶಯ.

– ಡಾ. ಗಿರಿಧರ ಕಜೆ

ಅಧ್ಯಕ್ಷರು, ಶ್ರೀ ಅಖಿಲ ಹವ್ಯಕ ಮಹಾಸಭಾ (ರಿ)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अध्यक्षवचनम्

कुमारसम्भवव्याख्यानग्रन्थः

संस्कृतसाहित्यक्षेत्रे जगत्येव संञ्जातं अत्यधिकं विमर्शसाहित्यं साहित्यलोकस्य ध्रुवतारायाः कालिदासस्य विचारे विद्यते इति नातिशयोक्तिः। महाकविकाळिदासस्य कौशलपरिपाके आविर्भूतं कुमारसम्भवं सर्वकालयोग्यं सर्वमानसविजेतृ संस्कृभाषा साहित्यस्य महत्तमग्रन्थेष्वन्यतमम्। तादृशस्य मेरुकल्पकृतिरत्नस्य व्याख्यानं विलिख्य विद्योतमानाः १२ शतके साम्प्रतिकस्य उत्तरकन्नडमण्डलस्य होन्नावरस्य समीपे गुणवतीपल्लीसञ्जाताः राष्ट्रमेव गर्वितं यथा स्यात् तथा बहूनां संस्कृतग्रन्थानां कर्तारः उत्तमोत्तमविद्वांसः विद्यामाधवपण्डिताः। तदीयाः कृतयः गुणानां खनेराविर्भूतं स्वर्णम्। हव्यककुले जनिमाप्य स्वीयया विद्वत्तापूर्णया ज्ञानधारया भाषाधारया च आनन्तकालं सकलहृन्मनोविजेतृग्रन्थान् रचितवन्तः, विद्वच्छिखरप्रायं अनर्घ्यरत्नसदृशं मुकुटमणिवत् प्रकाशमानाः सन्तीति समस्तस्य समाजस्य महिम्नो गरिम्णश्च विषयः। तेषां वंशजा अद्यापि पण्डित इति कुलनाम प्राप्य शिक्षणक्षेत्रे समाजसेवायां च तत्परा इति वेद्यः स्तुत्यश्च विचारः। विद्यामाधवानां अनेकाः कृतयो नाद्यापि प्रकटिता इति खेदावहो विषयः। इदमन्तःशल्यं परिहर्तुं वार्तमानिकविद्वद्वर्षीयांसः डा. हित्लळ्ळिसूर्यनारायणभट्टाः कुमारसम्भवव्याख्यानं सम्पादितवन्तः तथा विद्यामाधवपण्डितवंशस्थाः एव सोत्साहं प्रायोजयितुं पुरोगामिन संवृत्ता इति श्लाघ्यं कार्यम्।

हव्यक-अध्ययनकेन्द्रं क्रिस्तशक २०१८ समये बेङ्गळूरुप्रासादाङ्गणे सविजृम्भणं संवृत्तस्य श्रीमदखिलहव्यकमहासभाया अमृतमहोत्सवस्य तथा द्वितीयविश्वहव्यक सम्मेळनस्य सन्दर्भे शतं कृतीनां लोकार्पणं कृतवदिति ऐतिहासिकलेख्यस्य सुविख्यात वस्तु। हव्यकमहासभाया वज्रमहोत्सवसन्दर्भे २००३ समये आरब्धस्य हव्यक-अध्ययन केन्द्रस्य निर्देशकचराणां श्रीनारायणशानभागानां अपारप्रेरणया क्रियाशीलतया च, प्रस्तुतसंञ्चालकानां श्रीतेक्केकेरेसुब्रह्मण्यभट्टानां श्रद्धया प्रत्यवेक्षणेन च ग्रन्थस्यास्य प्रकटनं शक्यसम्भवं सञ्जातमिति श्रीमदखिलहव्यकमहासभायाः सन्तोषनिदानं विद्वज्जनानां प्रेरकं अगारञ्च सत् साकारं भवत्विति नः समेषामाशयः।

डा.गिरिधर कजे
अध्यक्षः, श्री अखिल हव्यक महासभा (रि)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ಸಂಚಾಲಕರ ನುಡಿ

ಶ್ರೀ ಅಖಿಲ ಹವ್ಯಕ ಮಹಾಸಭೆಯ ಹವ್ಯಕ ಅಧ್ಯಯನ ಕೇಂದ್ರದ ಘನ ಉದ್ದೇಶಗಳಲ್ಲಿ ಒಂದಾದ 'ಹವ್ಯಕ ಲೇಖಕರ ಗ್ರಂಥಗಳ ಪ್ರಕಟಣೆ' ಯೋಜನೆಯಂತೆ ಅನೇಕ ಕೃತಿಗಳು ಬೆಳಕು ಕಂಡಿವೆ.

ಮಹಾಸಭೆಯ "ಅಮೃತ ಮಹೋತ್ಸವ"ವು ಬೆಂಗಳೂರಿನ ಅರಮನೆಯ ಮೈದಾನದಲ್ಲಿ 2018ರ ಡಿಸೆಂಬರ್ ತಿಂಗಳಾಂತ್ಯದಲ್ಲಿ ಸಂಪನ್ನಗೊಂಡಿತು. ಎರಡು ದಿನಗಳ ಉತ್ಸವದ ಅಂಗವಾಗಿ ನಡೆದ "ವಿಶ್ವ ಹವ್ಯಕ ಸಮ್ಮೇಳನ"ದಲ್ಲಿ 100 ಕೃತಿಗಳು ಪ್ರಕಟಗೊಂಡುದು ಐತಿಹಾಸಿಕ ದಾಖಲೆ. ಅಧ್ಯಯನ ಕೇಂದ್ರ ಆರ್ಥಿಕ ಸ್ವಾವಲಂಬನೆಗಾಗಿ ಪ್ರಯತ್ನಿಸುತ್ತಿದೆ. ಹಲವಾರ ಗಣ್ಯರು ಅಧ್ಯಯನ ಕೇಂದ್ರಕ್ಕೆ ಉದಾರ ದೇಣಿಗೆ ನೀಡಿ ಪ್ರೋತ್ಸಾಹಿಸುತ್ತಿದ್ದಾರೆ.

ಉತ್ತರ ಕನ್ನಡ ಜಿಲ್ಲೆಯ ಹೊನ್ನಾವರ ತಾಲೂಕಿನ ಗುಣವಂತೆಯ ಹತ್ತಿರ 12ನೇ ಶತಮಾನದಲ್ಲಿ ಬಾಳಿ–ಬೆಳಗಿದ "ವಿದ್ಯಾಮಾಧವ ಪಂಡಿತ"ರು ಮಹಾ ಮೇಧಾವಿ ಗೀರ್ವಾಣ ಭಾಷಾ ವಿದ್ವಾಂಸರು. ಅವರ ಅನೇಕ ಸಂಸ್ಕೃತ ಗ್ರಂಥಗಳು ಇನ್ನೂ ಅಪ್ರಕಟಿತ. ಅವುಗಳಲ್ಲಿ "ಪಾರ್ವತೀ ರುಕ್ಮಿಣೀಯಮ್–ದ್ವಿ ಸಂಧಾನ ಕಾವ್ಯ"ವನ್ನು ಸಂಪಾದಿಸಿ ಅನುವಾದಿಸಿ ಕೊಟ್ಟವರು ಡಾ. ಸೂರ್ಯನಾರಾಯಣ ಭಟ್ಟರು. ಈ ಗ್ರಂಥವು 2012ರಲ್ಲಿ ಅಧ್ಯಯನ ಕೇಂದ್ರದಿಂದ ಪ್ರಕಟಗೊಂಡಿದೆ. ಪ್ರಸ್ತುತ ಇದೇ ಮಹನೀಯರು "ಕಾಳಿದಾಸ ಮಹಾಕವಿಕೃತ" ಕುಮಾರಸಂಭವ "ಗ್ರಂಥಕ್ಕೆ" ವಿದ್ಯಾ ಮಾಧವ ಪಂಡಿತರು ಸಂಸ್ಕೃತದಲ್ಲಿ ಬರೆದ "ವ್ಯಾಖ್ಯಾನ"ವನ್ನು ಸಂಪಾದಿಸಿ ಮುದ್ರಣಕ್ಕೆ ಸಿದ್ಧ ಪಡಿಸಿದ್ದಾರೆ. ಶ್ರೀಯುತರು ಅದನ್ನು ಅಧ್ಯಯನ ಕೇಂದ್ರದಿಂದ ಪ್ರಕಟಿಸಲು ಅನುಮತಿಸಿದ್ದಾರೆ. ಅಧ್ಯಯನ ಕೇಂದ್ರದ ಭೂತಪೂರ್ವ ಸ್ಥಾಪಕ ಪ್ರಧಾನ ನಿರ್ದೇಶಕರಾದ ಶ್ರೀ ನಾರಾಯಣ ಶಾಭಾಗರ ನಿಕಟ ಸಂಪರ್ಕದಿಂದಾಗಿ ವಿದ್ಯಾ ಮಾಧವರ ವಂಶಜರಾದ ಇಬ್ಬರು ಮಹನೀಯರು ಕೃತಿಪ್ರಾಯೋಜಕರಾಗಿ ಕೈಜೋಡಿಸಿರುವುದು ಸ್ತುತ್ಯವಾಗೊದೆ. ಅವರೇ ಪುಣೆಯ ನಿವಾಸಿ ಶ್ರೀ ಮಹಾಬಲೇಶ್ವರ ಸುಬ್ರಾಯ ಪಂಡಿತ ಹಾಗೂ ಬೆಂಗಳೂರು ನಿವಾಸಿ ಡಾ ಪ್ರಮೋದ ಪಂಡಿತರು. ಹವ್ಯಕರ ಬೌದ್ಧಿಕ ಆಸ್ತಿ ರಕ್ಷಣಾಯೋಧರಾದ ತ್ರಿಮೂರ್ತಿಗಳಿಗೆ ಅಧ್ಯಯನಕೇಂದ್ರವು ಅಭಾರಿಯಾಗಿದೆ.

ವಿದ್ಯಾ ಮಾಧವರ ಇನ್ನೂ ಕೆಲವು ಗ್ರಂಥಗಳನ್ನು ಸಂಪಾದಿಸಿಟ್ಟಿರುವ ಸಂಶೋಧಕ ಸಾಹಿತಿ ಡಾ. ಹಿತ್ಲಳ್ಳಿಯವರ ಇನ್ನೂ ಹೆಚ್ಚಿನ ಗ್ರಂಥಗಳು ಪ್ರಕಟಗೊಂಡು ಸಾಹಿತ್ಯಾಭಿಮಾನಿಗಳ ಗೌರವಾದರಗಳಿಗೆ ಪಾತ್ರರಾಗಲೆಂದು ಹಾರೈಸಲಾಗಿದೆ.

ಹವ್ಯಕ ಅಧ್ಯಯನ ಕೇಂದ್ರದ ಯೋಜನೆಗಳನ್ನು ಕಾರ್ಯಗತಗೊಳಿಸಲು ಮಾರ್ಗದರ್ಶನ ನೀಡುತ್ತಿರುವ ಶ್ರೀ ಅ.ಹ.ಮ.ದ ಅಧ್ಯಕ್ಷರಿಗೆ ಕೃತಜ್ಞತೆಗಳು. ಕೃತಿ ಮುದ್ರಕರಿಗೂ ನಮನಗಳು ಸಾಹಿತ್ಯಾಭಿಮಾನಿಗಳು ಮತ್ತು ಅಧ್ಯಯನಾಸಕ್ತರು ಕೃತಿಯ ಸದುಪಯೋಗ ಪಡೆಯಬೇಕೆಂದು ಸವಿನಯ ಪ್ರಾರ್ಥನೆ.

ಗಮಕಿ ತೆಕ್ಕೆಕೆರೆ ಸುಬ್ರಹ್ಮಣ್ಯ ಭಟ್ಟ
ಸಂಚಾಲಕರು ಹವ್ಯಕ ಅಧ್ಯಯನ ಕೇಂದ್ರ, ಬೆಂಗಳೂರು

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सञ्चालकवचनम्

श्रीयुताया अखिलहव्यकमहासभाया हव्यकाध्ययनकेन्द्रस्य महोद्देशेषु अन्यतमस्य हव्यकलेखकलिखितानां ग्रन्थानां प्रकाशनस्य योजनायां अनेकाः कृतयः प्रकाशिताः सन्ति।

महासभाया अमृतमहोत्सवः बेङ्गळूरुनगरस्य प्रासादाङ्गणे २०१८ दशाम्बरमासान्ते समपद्यत। दिनद्वयोत्सवस्याङ्गतया प्रचलिते विश्वहव्यकसम्मेलने १०० कृतयः प्रकाशिता इति ऐतिहासिकं लेख्यम्। अध्ययनकेन्द्रं आर्थिकस्वावलम्बनार्थं प्रयतमानमस्ति। बहवो गण्या औदार्येण दानं कुर्वन्तः प्रोत्साहयन्तश्च सन्ति।

उत्तरकानडमण्डलस्य होन्नावरोपमण्डलसमीपं १२ शतके स्वजीवितेन प्रख्याता विद्यामाधवपण्डिता महामेधाविनो गीर्वाणभाषाविद्वांसः। तेषामनेके संस्कृतग्रन्था नाद्यापि प्रकटिताः। तेषु पार्वतीरुक्मिणीयं द्विसन्धानकाव्यं सम्पाद्यानूद्य च दत्तवन्तः सूर्यनारायणभट्टाः। ग्रन्थोऽयं २०१२तमे वर्षे अध्ययनकेन्द्रात् प्रकटितः। सम्प्रति एत एव महोदयाः कालिदासमहाकविकृतस्य कुमारसम्भवग्रन्थस्य विद्यामाधवपण्डितैः संस्कृते लिखितं व्याख्यानं सम्पाद्य मुद्रणार्थं साधितवन्तः। श्रीयुताः अध्यायनकेन्द्रेण तत् प्रकटयितुं अन्वमन्यन्त। अध्ययनकेन्द्रस्य भूतपूर्वस्थापकप्रधाननिर्देशकानां श्रीनारायणशानभागानां निकटसम्पर्केण विद्यामाधववंशजाः पुण्यपत्तननिवासिनः श्रीमहाबलेश्वरसुब्रायपण्डिताः बेङ्गळूरुनिवासिनः परमेश्वरपण्डिताश्चेति उभये महाशयाः कृतिप्रायोजकाः सन्तः साह्यमकुर्वन् इति स्तुत्यमेतत्। हव्यकानां पारम्परिकं दायं रक्षितुं योधीभूतानां एतेषां त्रिमूर्तिसदृशानां अध्ययनकेन्द्रं कार्तज्ञ्यं प्रकाशयति।

विद्यामाधवानां ग्रन्थान्तरमपि सम्पाद्य प्रचिकाशयिषूणां संशोधककृतिनां हित्तलळ्ळिग्रामाभिजनानां अन्येऽपि ग्रन्थाः प्रकटिताः सन्तः साहित्याभिमानिनां आदरभाजनानि भवन्तु इति ईहामहे।

हव्यकाध्ययनकेन्द्रस्य योजना यथा कार्यगता भवेयुः तथा मार्गदर्शनं कुर्वद्भ्यः श्रीमदखिलहव्यकमहासभायाः अध्यक्षेभ्यः सन्तु कृतज्ञताः। कृतिमुद्रकेभ्यश्च नमांसि। साहित्याभिमानिनः अध्ययनासक्ताश्च कृतेः सदुपयोगं प्राप्नुवन्तु इति सविनयप्रार्थना।

गमकी तेक्केकेरे सुब्रह्मण्यभट्टः
सञ्चालकः
हव्यक-अध्ययनकेन्द्रम्
बेङ्गळूरु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भूमिका

ऐदम्प्राथम्येन कालिदासमहाकविरचितस्य कुमारसम्भवकाव्यस्य वाचनं प्रायः पञ्चाशद्वर्षेभ्यः पूर्वं (१९७०) विद्वद्वरेण्यश्रीसदाशिवभट्टमहाभागसविधे संवृत्तम्। तदा षष्ठसप्तमौ सर्गावेव अश्राविषाताम्। तदनन्तरं काव्यान्तरव्यासङ्गः शास्त्रश्रवणं वाक्रियतेति एतत्काव्यानुशीलनं विस्मृतप्रायम्। तथापि नवकर्णाटकराजधानीं श्रितेन पुनः तत्काव्य विचारणं दैवात् प्रक्रान्तम्(२०१०)। श्रीयुताया अखिलहव्यकमहासभाया आश्रये श्रीविद्यामाधवपण्डितविषयिणी पुस्तिका लोकभाषया प्राकाशि (२०११)। पार्वतीरुक्मिणीयाभिधं द्विसन्धानकाव्यं मातृभाषाविवर्तनेन सह तत्रैव लोकाय समार्पि(२०१२)। कुमारसम्भवव्याख्यापि प्रकाशनीयेति प्रयत्ने कृतेऽपि(२०१०) लब्धाया मातृकाया भ्रष्टत्वेन विलम्बितम्। अमृतमहोत्सवनिमित्तं अखिलहव्यकविश्वसम्मेलनसन्दर्भे कुमारसम्भव दीपिकानाम्नी मातृभाषापुस्तिका शतपुस्तिकास्वन्यतमा स्निग्धानां पाणितले शुशुभे(२०१९)। एतर्हि सहृदयहृदयानामुपयोगाय कुमारसम्भवप्रकाशिका प्रकाश्यत इति परं सन्तोषस्य पदम्।

श्रीविद्यामाधवपण्डितस्य संस्कृतकृतिषु मुहूर्तदर्शनाभिधं विद्यामाधवीयं बहोः कालात् प्रागेव(१९२३, १९२५, १९२६) महिषासुरपुरस्य प्राच्यविद्यासंशोधनालयेन प्राकाशीति तस्य ज्योतिःशास्त्र विशारदत्वं सर्वैरप्यवगम्यते। तस्य ज्योतिर्ग्रन्थो गोकर्णादावसकृत् प्रकाशितः। किन्तु तस्य काव्यं काव्यव्याख्यानं वा न प्राकाशीति कवित्वं व्याख्यातृत्वं वा न प्रसिद्धमिति तत् प्रकाशयितुं प्रयत्नः हव्यकसंशोधनकेन्द्रनिदेशकश्रीनारायणशानभागप्रेरितेन मया प्रायः दशवर्षेभ्यः क्रियमाणो वर्तते।

विद्यामाधवः संस्कृतसाहित्येतिहासग्रन्थे सप्तत्रिंशत्सङ्ख्याकेषु कुमारसम्भवव्याख्यातृष्वन्यतमत्वेन परिगणितः। एवं अष्टत्रिंशत्सङ्ख्येषु किरातार्जुनीयव्याख्यातृष्वपि। पार्वतीरुक्मिणीयकाव्यस्य रचयितेत्यपि। नैषधीय-व्याख्यायाः कामदुघाया अपि कर्तृत्वेन। स भूलोकमल्लतृतीयसोमेश्वरस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(क्रि.श.११२५) सभायामासीदित्यप्युक्तम्। किन्तु अन्यत्र स चतुर्थसोमेश्वरस्य (क्रि.११६२) सदसि प्रायो बभूवेत्युक्तम्। पुनर्नवप्रकाशितविद्यामाधवीयेऽपि तस्य मल्लप्पनाम्नः समकालिकत्वं (क्रि.१३६३) स्वीकृतम्। तदिदं सन्दिग्धं कथञ्चित् समाधेयम् इति प्रतीयते। अनेके विद्यामाधवा भवेयुरिति च संशयो जायते। तत्र प्रमाणाभावेन एकत्वमेव तस्य स्वीकृत्य विचारः प्रकृते क्रियते -

कुमारसम्भवव्याख्यायां दक्षिणावर्तनाथो(१३ शतकम्) विद्यामाधवेन स्मर्यते, यो मल्लिनाथेनापि(१३५० - १४५०) स्मृतः। अतो विद्यामाधवो मल्लिनाथसमकालिकः स्यादिति वक्तुं शक्यम्। तथा सति पूर्वोक्तं कालत्रयमपि (११२५, ११६२, १३६३) तिरस्कृतं स्यात्। अथवा तृतीयपक्ष एव कथञ्चिद् दृढः स्यात्। किन्तु तथा स्वीकारे सोमेश्वरसमकालिकता न भवेत्। पार्वतीरुक्मिणीये तस्य परिचयः स्वयं ग्रथितः -

जयत्यजय्यो जगतीपतीनां पतिः प्रतिष्ठाखिलसद्गुणानाम्।
चुलुक्यवंशप्रभवः प्रभावान्
पृथुप्रभावो भुवि सोमदेवः ।। १.१२ ।।
कलानिधेरीश्वरभूषणस्य प्रसादिनो विष्णुपदाश्रयस्य।
सुधात्मकस्याब्धिभुवो निशेशो
यस्यार्थयुक्ता भुवि सोमसंज्ञा ।। १.१३ ।।
ज्ञात्वा कलौ शत्रुभयं भविष्यद् भुवि त्रयीधर्मसुरद्विजानाम्।
संरक्षणायेव ससर्ज धाता यद्राज्यदुर्गं विगतोपसर्गम्।। १.१४ ।।
अधर्मधात्रा कलिनाखिलेषु खिलीकृतेषु क्षितिपालकेषु।
निराश्रयाणां नृपसद्गुणानां परं भवत्यास्पदमक्षयं यः ।। १.१५ ।।
कलास्वभिज्ञः सकलासु वक्ता शृणोति सूक्तानि विपश्चितां यः।
अर्थं विजानाति गुणान् मिमीते
प्रसीदतीष्टं प्रददाति चार्थम् ।। १.१६ ।।
श्रिया हरिं भोगितया महेन्द्रं रूपेण कामं रुषितेन रुद्रम्।
प्रदानशक्त्या सुरपादपं यो विडम्बयत्यम्बुनिधिं च धृत्या।। १.१७ ।।
महीभृता तेन महाकवीनां प्रियेण रागात् परिपाल्यमानः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

महीतलव्यापि महत्तदीयं यशःशरीरं परिपालयिष्यन्।। १.१८ ।।
महाकवीशोन्नतभद्ररूपो वादीन्द्रराजाधिपजामदग्न्यः।
ज्योतिर्गतिज्ञानचतुर्मुखश्च विद्यामहामाधवपण्डिताख्यः।। १.१९ ।।
हिमाद्रिकन्यासहितं महेशं लक्ष्मीसमेतं मधुसूदनं च।
स्तोतुं तदुद्वाहकथैक्यचित्रप्रबन्धलक्ष्यादहमुत्सहिष्ये ।। १.२० ।।
बाणः सुबन्धुः कविराजसंज्ञो विद्यामहामाधवपण्डितश्च।
वक्रोक्तिदक्षाः कवयः पृथिव्याः
चत्वार एते न हि पञ्चमोऽस्ति।। १.२१।।

एवं विद्यामाधवस्य सोमेश्वरसमकालिकत्वं निस्सन्दिग्धम्। अतस्तदनुगुणं तस्य समयः निश्चेतव्यः। तदर्थं तस्य ग्रन्थान्तरमपि परिशीलनीयम्। किन्तु विद्यामाधवस्य सर्वे ग्रन्था न प्राकाशिषत। सम्प्रति प्रकाशिता अपि न सर्वासां मातृकाणां परिशीलनेन। द्वित्राणां परिशीलनेन तद्विषये यथावद् अवगन्तुं न शक्यमिति चिन्त्यते। तत्र कारणं मातृकाया दौस्थ्यम्। तदिदं कुमारसम्भवस्य प्राप्ताया मातृकाया वाचनेन अज्ञायि -

अस्यां मलयाललिपिलिखितायां मातृकायां आरम्भे ग्रन्थपात इव भासते। हरिः श्रीगणपतये नमः (५१) अविघ्नमस्तु इति केरलीयशैल्या ग्रन्थ आरब्धः। ततः प्रणौमि वरदोङ्कार इति पादमात्रानन्तरं सा पङ्क्तिः रिक्तास्ति। ततो द्वितीयपङ्क्तौ मणिघण्टाविभूषिताम् इत्याद्यस्ति। अनेन मया चिन्त्यते, मूलमातृकायां अत्र गणेशपरः श्लोको भवेत् इति। स श्लोकस्तालपत्रस्य भङ्गादिना पादमात्रमवशिष्टः स्यात्। पादत्रयं, द्वितीयश्लोकस्य प्रथमपादश्च न दृश्यत इति न लिखितं स्यात्। तदिदं मातृकान्तरपरिशीलनेन परिष्करणीयम्।

उत्तरत्र कुमारसम्भवव्याख्या क्रियत इति कथ्यते। किन्तु केनेति नोच्यते। विद्यामाधवपण्डित इति कर्तुः नाम सर्गान्ते ज्ञायते -

कुमारसम्भवस्येत्थमाद्यं व्याचष्ट तुष्टधीः।
सर्गं निसर्गमधुरं विद्यामाधवपण्डितः।।
इति विद्यामाधवीये कुमारसम्भवव्याख्याने प्रथमः सर्गः। श्रीः।।
एतादृशः श्लोकः द्वितीयतृतीययोः सर्गयोः न प्राप्तः, यो मया मेलितः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चतुर्थादिसप्तमान्तेषु सर्गेषु पुनः प्राप्यते। यथा -

कुमारसम्भवस्यैष चतुर्थश्च रसोज्ज्वलः।
व्याख्यायि ख्यातिमान् सर्गो विद्यामाधवसूरिणा।।

इति विद्यामाधवीये कुमारसम्भवव्याख्याने चतुर्थः सर्गः।। श्रीः।।

कुमारसम्भवस्येमं सर्गं पञ्चममञ्चितम्।
व्याचष्टे विस्तरेणैवं विद्यामाधवपण्डितः।।

इति विद्यामाधवीये कुमारसम्भवव्याख्याने पञ्चमः सर्गः।। श्रीः।।

कुमारसम्भवस्यास्मिन् व्याख्याने गुणवानयम्।
षष्ठः सर्गः समाप्तोऽभूद् विद्यमाधवनिर्मिते।।

इति विद्यामाधवीये कुमारसम्भवव्याख्याने षष्ठः सर्गः।। श्रीः।।

कुमारसम्भवस्येत्थं व्याख्यायि ख्यातसद्गुणैः।
गौरीविवाहसंज्ञोऽयं सर्गः सप्तम उत्तमः।।

इति विद्यामाधवीये कुमारसम्भवव्याख्याने सप्तमः सर्गः।। श्रीः।।

एवं प्रथमादिसर्गसमाप्तिश्लोकेभ्यः पुष्पिकाभ्यश्च निश्चयेन व्याख्याकारोऽवगन्तुं शक्यः। तृतीयचतुर्थ सर्गयोः समाप्तिश्लोकविरहे ग्रन्थकारो न कारणम्, किन्तु लिपिकार इति भाति। लिपिकारोऽपि अत्र नैकः। एकः अस्या मातृकाया मूलं लिखितवान्। अन्यः मातृकामिमां तद्दृष्ट्वा प्रतिलिपिं सम्पादितवान्। तत्र मूल एव कालिदासीयश्लोका आसन् न वेति नाधुना निश्चेतुं शक्यम्। अस्यां मातृकायामदर्शनेन मूलेऽपि नासन् इत्येव सुवचम्। कालिदासीयं मूलं सर्वं परित्यज्य यदा व्याख्यामात्रं लिखितं तदा व्याख्याकृता कृताः श्लोका उदाहृता अपि क्वचित् त्यक्ता इति प्रतीयते। न केवलं श्लोकाः, श्लोकानां व्याख्यापि त्यक्ता। यथा सप्तमसर्गे ७१, ७२, ७९ श्लोकेषु व्याख्या अस्यां मातृकायां न प्राप्ता।

विद्यामाधवः स्ववृत्तान्तं ग्रन्थादौ ग्रन्थान्ते वा लिखतीति विद्यामाधवीयादिपरिशीलनेन ज्ञायते। यथा मुहूर्तदर्शनान्ते -

गोकर्णाद्दक्षिणस्यां ककुभि परिमिते योजनानां चतुष्के
श्रीमान् श्रीकण्ठगुप्तो जयति गुणवतीसंज्ञितो ग्रामवर्यः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तस्मिन्नस्ति प्रभूतैर्युतमखिलगुणैरद्वितीयं द्वितीयं
स्थानं नीलालयाख्यं द्विजकुलपतिना वामदेवेन लब्धम्।।
तत्र स्थाने तस्मिन् वसिष्ठगोत्रे महायतिश्रेष्ठौ।
जगति सुदर्शनतीर्थो रत्नगिरिश्चेति विश्रुतौ जयतः।।
तयोर्द्वयोर्भ्रातृतनूजपुत्रः बभूव नारायणपूज्यपादः।
निषेदतुर्यत्र विमुक्तवैरे चिराय लक्ष्मीश्च सरस्वती च।।
स्वग्रामतो दक्षिणतः समीपे पयोनिधे रोधसि मङ्किसंज्ञम्।
निवेशयामास समृद्धियुक्तं स्वदेशमीशाहृतभागधेयम्।।
तस्यात्मजोऽभूद् भुवनप्रतीतो विद्यान्वितो माधवपण्डितेन्द्रः।
महेश्वरं यो गुणवत्यधीशमुपास्य विद्यामखिलामवाप्नोत्।।
वेदव्याकरणास्पदं कविमहाराजः सतर्कस्मृति-
च्छन्दोलक्षणकाव्यनाटककलाविज्ञानसम्पन्निधिः।
ज्योतिःशास्त्रविदग्धमानिजनतादुर्गर्वसर्वङ्कषः
विद्यामाधवपण्डितो रचितवान् हृद्यं मुहूर्तागमम्।।
ये लोके मत्सरान्धाः परगुणविमुखा दोषसन्दर्शनोत्का-
स्तेषामेषा सकाशे न विशतु यदि मे विद्यते पुण्यलेशः।
ये चान्येऽश्लिष्टदोषाः परगुणमधिकं मानयन्तो महान्तो
निर्वैराः सन्ति तेषां व्रजतु मम कृतिः सन्निधौ सन्निवेशम्।।
एतद् विद्यामाधवीयाभिधानं ज्योतिःशास्त्रं ये पठन्तीह मर्त्याः।
प्रीतास्तेषामीश्वरांशा ग्रहास्ते कुर्वन्त्यायुर्वित्तविज्ञानवृद्धिम्।।

किरातार्जुनीयव्याख्याया विद्यामाधवाख्याया आदौ व्याख्याकारपरिचयोऽस्ति -

श्रीमन्नीलगृहाह्वये गुणवतीग्रामप्रभूते पदे
ख्यातो रत्नगिरिर्महामणिरभूत् तद्भ्रातृपौत्रात्मजः।
यो नारायणसूरिरस्य तनयो व्याख्यातुमद्यारभे
विद्यामाधवसंज्ञितः कविरहं काव्यं महद् भारवेः।। ...
विद्यामाधवविहितव्याख्यानमहाङ्कुशं विना भुवने।
वशयति क एव दुर्ग्रहमिमं किरातार्जुनीयमत्तगजम्।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विद्यामाधवपण्डितविहितव्याख्याननावमादाय।
भारविकाव्यसमुद्रं दुस्तरमपि निस्तरन्तु जनाः।। ...
तत्रैव प्रथमसर्गान्ते -
विद्याः कलाः समस्ताः प्रोक्ताः मा श्रीर्धवः स्मृतो भर्ता।
विद्याश्रीभर्तृत्वाद् भुवि विद्यामाधवाभिधानोऽस्मि।।
विद्यया माधवसमो विद्यामाधव उच्यते।
व्युत्पत्तिरस्य द्रष्टव्या विक्रमादित्यशब्दवत्।।
काव्यं हि कविशरीरं तस्माद् यन्नाम तदेवास्य।
क्रियते च भारवीयव्याख्यारूपस्वकाव्यदेहस्य।।
भारवीयस्य काव्यस्य व्याचष्ट प्रथमं पृथु।
निसर्गविषमं सर्गं विद्यामाधवपण्डितः।।
तत्रैव पञ्चमसर्गान्ते -
व्याख्याने भारवीयस्य विद्यामाधवसंज्ञिते।
वर्णितः पञ्चमः सर्गो हिमवद्वर्णनाह्वयः।।
तत्रैव सप्तमसर्गान्ते -
व्याख्याने भारवीयस्य विद्यामाधवसंज्ञिते।
इन्द्रकीलप्रवेशाख्यः पूर्णः सर्गोऽत्र सप्तमः।।
तत्रैवाष्टमसर्गान्ते -
व्याख्याने भारवीयस्य विद्यामाधवसंज्ञिते।
पूर्णोऽयमष्टमः सर्ग उद्यानजलकेलिकः।।
तत्रैव नवमसर्गान्ते -
व्याख्याने भारवीयस्य विद्यामाधवसंज्ञिते।
पूर्णोऽयं नवमः सर्गः सुरतोत्सववर्णनः।। इत्यादि।

नैषधीयव्याख्यायामपि व्याख्याकृतः परिचयो दत्तः -

श्रीमद्वसिष्ठकुलतिलक - कविराजप्रज्ञ - सर्वज्ञ - माधवसुधीश्वर रचिते नैषधचरितनिबन्धने कामधेनुनाम्नि तृतीयः सर्गः।

श्रीमत्-कविराजप्रज्ञ-सर्वज्ञमाधवकृतौ कामधेनुनाम्नि ग्रन्थे चतुर्थः सर्गः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सर्वज्ञ-माधवकृते नैषधचरितनिबन्धने कामधेनुनाम्नि पञ्चमः सर्गः।

यं प्रासूत वसिष्ठवंशतिलकश्रीप्रज्ञनारायणाचार्य-
श्रीकविराजकेशवबुधोद्भूता भवानी च यम्।
तेनाशेषविदा कृते नलकथाकाव्याशयव्यञ्जिनि
ग्रन्थे कामदुघा ... (अष्टमसर्गः)

यं प्रासूत वसिष्ठवंशतिलकश्रीप्रज्ञनारायणा-
चार्यश्रीकविराजके(शव)बुधोद्भूता भवा(नी) च यम्।
श्रीमत्कामदुघाह्वये त्वयमगादेकादशस्तन्महा-
ग्रन्थे नैषधकाव्यसारगमके सर्गो निसर्गोज्ज्वलः।।

यं प्रासूत वसिष्ठवंशतिलकश्रीप्रज्ञनारायणो
यश्च श्रीकविराजकेशवसुता तेनोज्ज्वलं गुम्भिते।
सर्वज्ञेन मितश्चतुर्दशतया सर्गः समाप्तिं गतो
ग्रन्थे कामदुघाह्वये नलकथाकाव्याशयव्यञ्जिनि।।

यं प्रासूतवसिष्ठवंशतिलकश्रीप्राज्ञनारायणो
य(श्च श्रीकवि)राजकेशवसुता तेनोज्ज्वलं गुम्भिते।
सर्गः पञ्चदशोऽगमन्नलकथाकाव्याशयव्यञ्जिनि
ग्रन्थे कामदुघाह्वये विरचिते सर्वज्ञसंज्ञाजुषा।।

सर्वज्ञमाधवकृतौ कामदुघाह्वये ग्रन्थे षोडशः सर्गः।

एवं मुहूर्तदर्शने पार्वतीरुक्मिणीये किरातार्जुनीयव्याख्याने नैषधव्याख्याने च लब्धो ग्रन्थकारस्य परिचयः कुमारसम्भवस्य प्राप्ते तालपत्राकरे न प्राप्यते। तत्र कारणं तालपत्रभङ्गो वा लिपिकारो वा भवेत्। स यथा कालिदासश्लोकान् विहाय व्याख्यामात्रं यथेच्छं लिखति, तथा ग्रन्थकारपरिचयमपि पद्यरूपेण विद्यमानं परित्यज्य लिखितवान् स्यात्।

नैषधव्याख्याने सर्वज्ञमाधवशब्दोऽस्ति, न तु विद्यामाधवशब्दः। किन्तु पितुर्नाम नारायण इति, गोत्रनामापि वासिष्ठ इति च दृष्ट्वा प्रत्यभिज्ञा विद्यामाधवस्य। मानसोल्लासकारस्य तृतीयसोमेश्वरस्य (११२७ - ११४१) भूलोकमल्ल इति विश्रुतस्य सर्वज्ञ इत्यपि प्रसिद्धिरासीत्। तत्समकालिकस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विद्यामाधवस्यापि सर्वज्ञ इति समादरो बभूवेति स्वीकर्तुं शक्यम्।

अलिघरविश्वविद्यालयस्य संस्कृतविभागेन कालिदासस्य कुमारसम्भवं अधिकृत्य प्रवर्तिते हिन्दीभाषामये शोधप्रबन्धे(१९९७) विद्यामाधवस्य कुमारसम्भवव्याख्यामधिकृत्य टङ्कितमस्ति -

विद्यामाधव की कुमारसम्भवम् की टीका से उनके सम्बन्ध में कोई जानकारी नहीं मिलती है । विद्यामाधव ने भारवि के किरातार्जुनीय महाकाव्य पर भी टीका लिखी है जिसकी पुष्पिका से उनकी विद्वत्ता के सम्बन्ध में अवश्य कुछ जानकारी मिलती है । विद्यामाधव की एक रचना पार्वतीरुक्मिणीयम् मिलती है जिसमें पार्वती तथा रुक्मिणी के विवाह का वर्णन है ।

एम. कृष्णमाचारी के अनुसार विद्यामाधव भूलोकमल्ल सोमेश्वर तृतीय ११२५ एडी में गद्दी पर बैठा था । इन रचनाओं के आधार पर विंद्यामाधव का समय बारहवीं शताब्दी हुआ ।

अडयारग्रन्थालयस्याप्रकाशितग्रन्थसूचिपुस्तकमवलम्ब्य विद्यामाधवस्य विषये तत्र एवं समग्राहि -

सद्विद्याकुलमन्दिरेण गुणिना विद्वज्जनप्रेयसा
विद्यामाधवपण्डितेन रचिते विद्यावतां सम्मते ।
वेदव्याकरणास्पदं कविमहाराजः सतर्कस्मृति-
च्छन्दोलक्षणकाव्यनाटककलाविज्ञानसम्पन्निधिः ।
ज्योतिःशास्त्रविदग्धमानिजनतादुर्गर्वसर्वङ्कषो
विद्यामाधवपण्डितो विजयते विद्वद्विभूषामणिः ।।

इति श्रीमद्गुणवतिग्रामविशिष्टनीलालयस्थानसम्भूतैरखिलविद्यानिवासैः विद्यामाधवपण्डितैर्विरचितं विद्यामाधवनामधेय ... ।

कुमारसम्भवव्याख्याविषयेऽपि तत्र इत्थमभ्यधायि -

त्रिवेन्द्रम में प्राप्त पाण्डुलिपि में विद्यामाधव की टीका प्रथम दो सर्गों पर ही पूर्ण मिलती है । तीसरे सर्ग के दस श्लोक के बाद टीका प्राप्त नहीं होती । इस टीका की लिपि मलयालम है । टीका का आरम्भ कवि ने

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पार्वती-शंकर गणेश तथा स्कंद की आराधना से किया है ।

टीका का आरम्भ :

श्रीकण्ठार्धमयी मह्यं श्रीविद्याधनसम्पदः ।
देवताभिः स्तुता दद्यादेवता सर्वमङ्गला ।।
सर्वमङ्गलदातारौ पार्वतीपरमेश्वरौ ।
गणेशस्कन्दसंयुक्तौ वन्दे वाञ्छितसिद्धये ।।
महाकविमहेन्द्रेण कालिदासेन यत् कृतम् ।
कुमारसम्भवाख्यं तत् काव्यं व्याख्यातुमारभे ।।

टीका का अन्त :

इति विद्यामाधवीये कुमारसम्भवव्याख्याने द्वितीयः सर्गः ।

टीका :

काव्यादौ वस्तुनिर्देशं करोति अस्त्युत्तरस्यामित्यादि हिमालयो नाम नगाधिराजः उत्तरस्यां दिशि अस्ति । ...

रुद्रस्यापि धैर्यं विनाशयेयमित्यर्थः । अन्यधन्विनो मम के अत्रस्याः तृणसमा इत्यर्थः । अत्र किंशब्दः क्षेपे वर्तते । मधुर्वसन्ते दैत्ये च मधु मे च माक्षिके इति भोजः । पिनाकः शूलिनो धनुः इति एवं कामोक्ति ... ।

शोधप्रबन्धोऽयं कुमारसम्भवमधिकृत्य, न तु विद्यामाधवम्। अतस्तद्विषये समुल्लिख्य तद्विरचिता व्याख्या काचिदस्तीति कथनं पर्याप्तम्। किन्तु तस्या व्याख्यायाः एका मातृका पूर्णापि विद्यते तिरुवनन्तपुरे। कुमारसम्भवस्य विद्यामाधवकृताया व्याख्यायाः (मातृकाः पूर्णा अपूर्णा वा) एकादश प्रतयस्तत्र सन्ति। अन्यत्र केरलप्रदेश एव मठे मातृकाद्वयमस्ति। केरलाद् बहिरपि मद्रपुर्यादौ अष्टमातृकाः सन्ति इति तत्तद्ग्रन्थालयस्य सूचिपुस्तकैरवगन्तुं शक्यम्।

उपरि दत्तेन विवरणेन काचिद् मातृका हिन्दीशोधप्रबन्धे परामर्शीति ज्ञायते। तत्र श्रीकण्ठार्धमयीति मङ्गलश्लोकः प्रथमः। अस्मत्परिशीलितमातृकायां अयं द्वितीयः इति विशेषः।

मातृकासु मलयालमयी लिपिः विद्यामाधवस्य तत्प्रदेशीयतयोपपद्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कोङ्कणप्रदेशे तिगलारि लिपिरस्ति, या मलयाललिपिसदृशी। यद्यपि सम्प्रति विद्यामाधवस्य गुणवती पत्नी कर्णाटकप्रान्तेऽस्ति, तथापि पूर्वं स प्रदेशः केरलसम्बद्धोऽप्यासीदिति वदन्ति। द्रविडप्रान्ते लब्धापि मातृका ग्रन्थाक्षरमयी नास्ति। देवनागरीमातृकाः सर्वाः तालपत्रमातृकाभ्योऽर्वाचीनाः। मूलं व्याख्यानञ्च संस्कृतेन लिखितमिति देवनागर्या प्रतिलिपिः कृता स्यात्।

एवं प्रतिलिपिं कुर्वन्तः यद्यपि व्याख्यां ररक्षुः, तथापि सा नैकरूपा सञ्जाता स्यादेव। मूलं विना व्याख्या न शोभत इति मूलं अत्र निवेशितम्। पाठभेदो व्याख्यायामेव तत्र तत्र प्रदर्शितः। तत्र व्याख्याकृदभिप्रेतः पाठः ज्ञातुं शक्यः। तथापि मुद्रितपुस्तकावलम्बेन मूलमत्र निवेशितमिति क्वचिद् व्यत्यासो भवितुमर्हति। तत् सहृदयैः मर्षणीयम्।

दशवर्षेभ्यः पूर्वमेव प्रक्रान्तं समापितं चेदं कार्यं प्रकाशनीयमिति प्रायो वर्षद्वयात् प्रागेव प्रयतितम्। किन्तु सर्वत्र प्रपञ्चे प्रसृतेन कोविदाभिध क्षोभादिना कार्यं प्रतिहतम्। तथापि श्रीविद्यामाधवपण्डितवंशसञ्जातेन सम्प्रति पुण्यपत्तन-वासिना श्रीमहाबलेश्वरसुब्रायपण्डितमहोदयेन, कर्णाटराजधानीनिवासिना श्रीपरमेश्वरपण्डितमहाभागेन च प्रदत्तं प्रभूतं धनं अवलम्ब्य श्रीनारायणशानभागमहाशयेन पौनःपुन्येन प्रेरितोऽयं जनः पूर्वप्रेषितामेव मुद्रणयोग्यां प्रतिं मुद्रणशालां पुनः प्रेषितवान्। पुस्तकमिदं राजधान्या मल्लेश्वरपरिसरे विराजमानायाः विश्वविख्यतायाः श्रीयुताया अखिलहव्यकमहासभाया आश्रये प्रकाशयितुं सामोदं आमुखादिदानेन उपकृतवान् वार्तमानिकोऽध्यक्षः प्रख्यातवैद्यः श्रीगिरिधरकजेमहोदयः, अध्ययनकेन्द्रस्य साम्प्रतिकसञ्चालकः तेक्केकेरेसुब्रह्मण्यभट्टवर्यश्च। समेषामेतेषां विषये कार्तज्ञ्यं भावयन्, सव्याख्यस्यास्य लोकभाषया विवर्तनमचिरादस्तु प्रकाशितमित्याशास्ते

कल्याणनगरी
१९४३ प्लवसं. विद्यादशमी

विद्वज्जनविधेयः
हित्लळ्ळिसूर्यनारायणनागेन्द्रभट्टः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अनुक्रमणिका

श्रीविद्यामाधवरचिता ग्रन्थाः	२
समर्पणम्	५
अध्यक्षवचनम्	६ - ७
सञ्चालकवचनम्	८ - ९
मातृकापत्रद्वयचित्रम्	१०
भूमिका	११ - २०
१. पार्वतीप्रादुर्भावः	२२ - ५४
२. ब्रह्मदेवतासल्लापः	५५ - ७९
३. कामदहनम्	८० - १११
४. रतिविलापः	११२ - १२७
५. पार्वतीतपःफलम्	१२८ - १६१
६. पार्वतीविवाहनिश्चयः	१६२ - १९२
७. गौरीविवाहः	१९३ - २३०
८. शिवयोर्विलासः	२३०
श्लोकानुक्रमणिका	२३१ - २३९
अमरकोशवाक्यानि	२४० - २४२
उद्धृतग्रन्थ-ग्रन्थकारसूचिः	२४३ - २४५
परामृष्टग्रन्थाः	२४६ - २४७
संस्कर्तुः संक्षिप्तपरिचयः	२४८

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्रीः

श्रीगुरुः शरणम्

महाकविश्रीकालिदासप्रणीतं
श्रीविद्यामाधवरचितप्रकाशिकासहितं
कुमारसम्भवम्

(व्याख्यातृकृतमङ्गलाचरणम्)

हरिः।

श्रीगणपतये नमः।

अविघ्नमस्तु।

(सरस्वतीवन्दनम्)

प्रणौमि वरदोङ्कारमणिघण्टाविभूषिताम् ।
कविलोककुटुम्बस्य कामधेनुं सरस्वतीम् ।। १ ।।

(सर्वमङ्गलाप्रार्थना)

श्रीकण्ठार्धमयी मह्यं श्रीविद्याधनसम्पदम् ।
देवताभिः स्तुता दद्याद्देवता सर्वमङ्गला ।। २ ।।

(आदिकुटुम्बवन्दनम्)

सर्वमङ्गलदातारौ पार्वतीपरमेश्वरौ ।
गणेशस्कन्दसंयुक्तौ वन्दे वाञ्छितसिद्धये ।। ३ ।।

(स्वोद्देशकथनम्)

महाकविमहेन्द्रेण कालिदासेन यत् कृतम् ।
कुमारसम्भवस्यास्य व्याख्यानं कर्तुमारभे ।। ४ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रथमः सर्गः

पार्वतीप्रादुर्भावः

काव्यानामारम्भेऽपेक्षितं मङ्गलं आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम् (काव्यादर्शः १.१४) इति आशीराद्यन्यतमस्य कर्तव्यत्वाद् आदौ विशिष्टवस्तुनिर्देशं करोति -

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।
पूर्वापरौ वारिनिधी विगाह्य स्थितः पृथिव्या इव मानदण्डः।। १ ।।

अस्त्युत्तरस्यामित्यादि। हिमालयो नाम नगाधिराजः उत्तरस्यां दिशि अस्ति। नामेति प्रसिद्धवाचकमव्ययम्। हिमालय इति प्रसिद्धो गिरिराज उदीच्यां दिश्यद्यापि विद्यते। नगाः पर्वताः, नगः पर्वतपादपौ इति। तेषां अधिराजः इति तस्य श्लाघ्यं विशेषणम्। कथम्भूतो नगाधिराजः इत्याशङ्क्याह - देवतात्मेति। देवतानामात्मा। देवतैवात्मा अधिष्ठाता यस्येति वा।

आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि (वैजयन्तीकोशः ६.१.६) इति। देवतात्मा देवतामूर्तिः। देवतावद् जरामरणरहितं करचरणाद्यवयवोपलक्षितं जङ्गमं दिव्यं रूपं दधान इत्यर्थः। इतरपर्वतवत् केवलं स्थावर मूर्तिरेव नाभवत्। रूपद्वयेन युक्त इत्यभिप्रायः। तथा च वक्ष्यति -

विभक्तानुग्रहं मन्ये द्वैरूप्यमपि मे कृतम् (६.५८)

इति। विवाहतनयोत्पादनादिकार्याणां अन्यथानुपपत्तेरिदं विशेषणम्। तस्य आयामविशेषप्रकाशनार्थं विशेषणान्तरमाह - पूर्वापरौ वारिनिधी समुद्रौ विगाह्य स्थित इति। पूर्वपश्चिमौ विगाह्य सङ्गत्य स्थितः। तस्योपमामाह - पृथिव्याः मानदण्ड इव लक्ष्यमाणः। मानार्थो दण्डः मानदण्डः। क्षितेरियत्तापरिच्छेदार्थो दण्ड इव। सोऽभीष्टसीमाद्वयस्य प्रमाणज्ञापनार्थं निक्षिप्तः सीमाद्वयान्तमवगाह्य तिष्ठतीति।

नन्वत्र मानदण्डशब्दादुपरीवशब्दे प्रयोक्तव्ये सति, पूर्वं इवशब्दप्रयोगाद् अस्थानपदत्वं नाम दूषणमिति चेत्, मैवम्। यत्र पदान्तरसम्बन्धरहितमुपमानं तत्र तथा नियमः। यथा - हर इव जितमन्मथो गुह इव अप्रतिहतशक्तिरिति। यत्रोपमानस्य पदान्तरसम्बन्धोऽस्ति, तत्र तथा नियमो न दृश्यते - कचाचितौ

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विष्वगिवागजौ गजौ (किरातार्जुनीयम् १.३६) इति, शिखाभिराश्लिष्टइवाम्भसां निधिः, तुषारमूर्तेरिव नक्तमंशवः (शिशुपालवधम् १.२०,२१) इत्यादिमहाकविप्रयोगात्। पृथिव्या इव मानदण्डः इत्युत्प्रेक्षा। सूर्यांशुभिर्भिन्नमिवारविन्दम् (१.३१), चन्द्रोदयारम्भ इवाम्बुराशिः(३.६७) इत्यादिप्रयोगवत्। पृथिव्याः पश्चिमसमुद्रमध्यभूमेः प्रमाणज्ञानार्थं धात्रा निक्षिप्तो मानदण्डः नूनम्। (सरस्वतीकण्ठाभरणम् ५.१७९ -)

मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः।। (काव्यादर्शः२.२३४)

इति। अत्र श्लेषादयः केचन शब्दालङ्कारा उपमादयोऽर्थालङ्काराश्च विद्यन्ते। अत्र काव्ये सर्वत्र वैदर्भी रीतिः। क्वचित् पाञ्चाली च प्रयुज्यते। तल्लक्षणमुक्तं श्रीभोजराजेन सरस्वतीकण्ठाभरणे(२.२९-३०) -

तत्रासमासा निश्शेषश्लेषादिगुणगुम्फिता।
विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते।।
समस्तपञ्चषपदामोजःकान्तिविवर्जिताम्।
मधुरां सुकुमाराञ्च पाञ्चालीं कवयो विदुः।। इति।

अत्र सर्गे क्वचिद् इन्द्रवज्रा, क्वचिद् उपेन्द्रवज्रा, क्वचिद् उपजातयश्च वृत्तानि -

स्यादिन्द्रवज्रा ततजा गुरू चेत्, उपेन्द्रवज्रा जतजास्ततो गौः,
अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः

इति (वृत्तरत्नाकरः ३.२८ - ३०)।

ननु काव्यारम्भे मङ्गलाचरणमविघ्नेन परिसमाप्त्यर्थं लोके प्रचयगमनार्थञ्च कर्तव्यम्। तदिह कस्मान्न कृतमिति चेत्, सत्यम्। अत्रापि मङ्गलाचरणं कृतमेव, अस्तीति सत्तावाचिनो मङ्गलस्य पदस्य प्रयोगात्। ननु तर्हि कस्माद् अविघ्नेन परिसमाप्तिर्नाभूदिति चेद्,

अत्र कारणं ब्रूमः - आदौ अशुभगणप्रयोगाद् अविघ्नेन परिसमाप्तिः नाभवत्। अस्तीति मङ्गलाचरणसामर्थ्याल्लोके सर्वत्रापि प्रसरणमासीदिति।

गुरुद्वयाद्यन्तलघुस्तगणो व्योमदैवतः।
आदौ प्रयुक्तः सर्वत्र शून्यं वितनुते फलम्।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इति छन्दःशास्त्रे। तस्मात् काव्यारम्भे शुभगणप्रयोग एव कर्तव्यः।। १ ।।

तस्य गुणान् वर्णयितुमुपक्रमते यं सर्वशैला इत्यादिभिः। स मानसीं (१.१८) इत्यत्र तच्छब्दपर्यन्तं काव्याङ्गभूतं शैलवर्णनं विस्तरेण क्रियते। केषाञ्चिद् अङ्गानां न्यूनत्वदोषपरिहारार्थमिदं ज्ञेयम्। तथा हि। उक्तं काव्यादर्शे (१.२०) -

न्यूनमप्यत्र यैः कैश्चिदङ्गैः काव्यं न दुष्यति।
यद्युपात्तेषु सम्पत्तिराराधयति तद्विदः।। इति।

तस्य श्लाघ्यं विशेषणमाह -

यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे ।
भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् ।। २ ।।

सर्वे शैलाः मेरुहिमवद्व्यतिरिक्ता अन्ये पर्वताः, यं हिमालयं, वत्सं परिकल्प्य, दोहदक्षे दोहक्रियासमर्थे दोहकुशले वा, मेरौ दोग्धरि स्थिते सति, धरित्रीं भास्वन्ति रत्नानि महौषधीश्च दुदुहुः। दीप्तिमन्ति रत्नानि मृतसञ्जीविन्यादीनि। ता औषधीश्च दुग्धवन्तः। दुहेर्द्विकर्मकत्वात्, अकथितं च (पा.सू.१.४.५१) इति कर्मविधानात् द्वितीयाद्वयं प्रयुक्तम्। दुहियाचरुचिप्रभृतीनामिति परिगणनात्। कस्माद् दुदुहुः इति पृथूपदिष्टामिति विशेषणं आह। पृथूपाख्याने (विष्णु)पुराणे सा कथा प्रपञ्चिता श्रूयते(१.१३) - वेनपुत्रः पृथुर्नाम महाराजः पृथिवीतलस्य समीकरणार्थं चापकोट्या शैलानि समुत्सारयामास। तदाहतिक्लेशमसहमाना पृथिवी त्रैलोक्यसारं आदाय गोरूपधारिणी पातालं प्रविष्टा। ततः प्रजाभिः सम्प्रार्थितः स राजा चापहस्तः पातालं प्राप्य तां दृष्ट्वा हन्तुमुद्यतोऽभूत्। तदा पातालाद् उद्गतवती भयेन वेपमाना भूमिः किं ते करवाणीत्यब्रवीत्। अथ राजा तामादिदेश - सभृत्येभ्योऽभीष्टान् अर्थान् देहीति। तेनाज्ञापितां प्रसन्नां कामधेनुरूपां दोग्धुमुद्यताः शैलाः सुमेरुं दोग्धारं कृत्वा यं हिमालयं वत्सत्वेन परिकल्प्य यस्य प्रसादाद् औषधिरत्नादिकं लब्धवन्त इत्यनेनास्य प्रभावोत्कर्षो दर्शितः। नन्वत्र मेरोरेव दोग्धृत्वमुक्तम्। शैलाः दुदुहुरिति कथं प्रयोगः इति चेद् ब्रूमः। मेरुरेको यदि दोहे कर्ता अन्ये यदि तत्प्रयोजकाः तर्हि स्वतन्त्रः कर्ता, तत्प्रयोजको हेतुश्च(पा.सू.१.४.५४-५५) इति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तेषां हेतुत्वात् हेतुमति च(३.१.२६) इति णिचि दोहयाञ्चक्रुः इति प्रयोज्यं स्यात्। इह तथा न भवति। मेरुपुरोगमाः सर्वेऽपि कर्तारः। एकक्रियासमेतानां समानफलभाजां एकप्रधानेन कर्मणि क्रियमाणे सति सर्वेऽपि कृतवन्तः एवेति ज्ञेयम्। न चेह स्वामिनो मेरोः कर्तृत्वञ्च घटते। लोके खलु स्वामी प्रयोजकः। भृत्याः कर्तारः। तस्मादेकेन एकस्मिन् काले कर्तव्ये गोदोहे मेरुणा कृते सति सर्वे शैलाः दुदुहुरिति प्रयोगः साधुः। कथाप्रयोगश्च -

ततः पुरजनाः सर्वे हत्वा चोरं महाबलम्।
तद्धस्ताद् वस्त्रमाहृत्य ब्राह्मणाय ददुः पुनः।। इति।

अत्र बहुसाहाय्ये एक एव चोरं हत्वा वस्त्रमादाय ददाति। तथाप्यत्रैवं प्रयोगः क्रियत इति न दोषः इत्येकः परिहारः। अथवा दोग्धरि मेरौ स्थिते सति निवृत्ते सति दोहादुपरते सति अन्येऽपि शैलाः दुदुहुरिति प्रयोगः स्यात् ।। २ ।।

उत्तमस्य च तस्य हिमसम्बन्धे दोषो न स्याद् इत्याशङ्क्य परिहरति -

अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः।। ३ ।।

अनन्तेति। अनन्तानामसंख्यानां रत्नानामुत्कृष्टसद्वस्तूनां प्रभवस्य उत्पत्तिकारणस्य यस्य हिमं सौभाग्यविलोपि न जातमिति। कर्तरि निष्ठा। अपूर्वरमणीयतापरिहारि नाभवत्। तदेवार्थान्तरन्यासेन साधयति - एको दोषो गुणसन्निपाते गुणसमायोगे निमज्जति हि, विनश्यति नाम। बहुमधुररसनिमग्न-तिक्तरसबिन्दुर्यथा मधुरत्वमेव भजते, बहुगुणमध्यवर्ती दोषोऽपि गुणतामेव भजत इत्यर्थः। हि हेतौ च प्रसिद्धौ चेति भोजः। तस्योपमानं आह - इन्दोः किरणेषु अङ्कः इव, अमृतमयेषु चन्द्रकिरणेषु कळङ्को यथा निमज्जति, दोषाय न कल्पते।

नन्वत्र हिममेकं दूषणम्। अनन्तरत्नप्रभवत्वं एको गुणः। तस्मात् गुणसन्निपाताभावात् कथं दोषस्य निमज्जनमिति चेद्,

ब्रूमः - यद्यत्र रत्नशब्देन मणय एव विवक्षिताः तर्हि दोष एव स्यात्। इह तु रत्नानि स्वजातिविशिष्टानि विवक्षितानि। रत्नं स्वजातिश्रेष्ठेऽपीत्यमरः (३.३.१२६)। उमाख्यं कन्यारत्नं, वैडूर्यादीनि मणिरत्नानि, देवदारुप्रभृतीनि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तरुरत्नानि, मृतसञ्जीवनादीनि ओषधिरत्नानि, गङ्गादीनि सरिद्रत्नानि, मानसादीनि सरोरत्नानि, कैलासादीनि स्थानरत्नानि, औन्नत्यादीनि गिरिगुहा रत्नानि - एषां प्रभवत्वादत्रापि गुणसन्निपातोऽस्त्येवेति न दोषः।। ३ ।।

वर्णनामनुक्रममुपक्रमते -

यश्चाप्सरोविभ्रममण्डनानां सम्पादयित्रीं शिखरैर्बिभर्ति ।

बलाहकच्छेदविभक्तरागामकालसन्ध्यामिव धातुमत्ताम् ।। ४ ।।

यश्चेति। यः शिखरैः धातुमत्तां बिभर्ति। धातुर्मनःशिलाद्यद्रेः इत्यमरः(२.३.८)। नित्ययोगे मतुप्प्रत्ययः। धातुना मनःशिलादिना नित्य युक्तो धातुः धातुमान्, तस्य भावो धातुमत्ता, तां बिभर्ति। शिखरेषु नित्यं धातुमान् भवति इत्यर्थः। अयञ्चास्य गुणः इति वर्णना। वाक्यभेदार्थश्चकारः। धातुमत्ताया विशेषणमाह - अप्सरइति। अप्सरसां विभ्रमेण लीलया, यानि मण्डनानि तिलकादीन्यलङ्कारादीनि, तेषां सम्पादयित्रीम्। वलाहकच्छेदविभक्तरागां मेघशकलेषु विभक्तः संसक्तः रागो यस्याः ताम्। मेघशकलसङ्क्रान्तरागां इत्यर्थः। अत एव अकालसन्ध्यामिव सायम्प्रातः कालव्यतिरिक्तकालेऽपि उपस्थितां सन्ध्यामिव दृश्यमानाम्। अकाल सन्ध्यामिव बलाहकच्छेदविभक्तरागां अप्सरोविभ्रम मण्डनानां सम्पादयित्रीं इति द्वयोः साम्यम्। शेषोपमेयम्।

अन्ये केचिदन्यथा व्याचक्षते। तत् कथम् ? तत्रायमन्वयः - अकाल-सन्ध्यामिव अप्सरोविभ्रममण्डनानां सम्पादयित्रीं बलाहकच्छेदविभक्तरागां धातुमत्तां यः शिखरैर्बिभर्ति चेति। अप्सरसां विभ्रमेण भ्रान्त्या यानि मण्डनानि माल्यानुलेपनादीनि भूषणानि तेषां सम्पादयित्रीमिति। यस्य शिखरेषु दीप्यमानं धातुरागमेवालोक्य अकाले सायं सन्ध्याभ्रन्त्या सायन्तनमण्डनानि प्रियसमागमोचितानि अप्सरसः कुर्वन्तीत्यभिप्रायः। ननु रागादिकं विशेषणं सन्ध्यासाम्यञ्च धातुमत्तायाः कथं स्यात् ? तस्यास्तन्न घटते। अतो गत्यन्तरं ब्रूमः - धातुमत्ताशब्देन धातुर्लक्ष्यते। धातुमत्तां धातुं बिभर्तीत्यन्वयः। महाकविप्रयोगान्न दोषः ।। ४ ।।

आमेखलं सञ्चरतां घनानां छायामधःसानुगतां निषेव्य ।

उद्वेजिता वृष्टिभिराश्रयन्ते शृङ्गाणि यस्यातपवन्ति सिद्धाः।। ५।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आमेखलमिति। यस्य मेखलास्थानपर्यन्तं नितम्बपर्यन्तं ऊर्ध्वं (अधः)सानुषु सञ्चरतां घनानां छायां निषेव्य वृष्टिभिरुद्वेजिताः जनितोद्वेगा जडीकृता अधःसानुगताः अधस्तनसानुषु स्थिताः सिद्धाः अष्टैश्वर्यगुण युक्ताः देवयोनयः आतपवन्ति वृष्टिकालेऽपि आतपयुक्तानि यस्य शृङ्गाणि शिखराण्याश्रयन्ते।

कटकोऽस्त्री नितम्बोऽद्रेः स्नुः प्रस्थः सानुरस्त्रियाम्

इत्यमरः (२.३.५)। अनेनास्य शृङ्गोन्नत्यातिशयो दर्शितः।। ५ ।।

पदं तुषारस्रुतिधौतरक्तं यस्मिन्नदृष्ट्वापि हतद्विपानाम् ।

विदन्ति मार्गं नखरन्ध्रमुक्तैर्मुक्ताफलैः केसरिणां किराताः ।। ६ ।।

पदमिति। अन्यशैलेषु किरातैर्मृगयासु मृगवराहव्याघ्रा हन्यन्ते। यस्मिन् पर्वते किराता मृगयासु सिंहानेव घ्नन्तीति। तेषां शौर्योत्कर्षमाह - यस्मिन् तुषारस्रुतिधौतरक्तं घनीभूतस्य हिमस्य रविकरसंस्पर्शजातया स्रुत्या क्षाळितं शोणितं यस्य तत् तथोक्तम्। शरक्षतसिंहानां पदं अदृष्ट्वापि किराताः नखरन्ध्रमुक्तैः सिंहनखरन्ध्रगळितैर्मुक्ताफलैर्मौक्तिकैरेव केसरिणां मार्गं विदन्ति। सिंहनखरन्ध्रेषु मुक्ताफलानि कथं स्युरित्याशङ्क्य हेतुगर्भं विशेषणमाह - हतद्विपानामिति। हता द्विपा गजा यैस्ते हतद्विपाः। तेषां सिंहानामिति। हस्तिकुम्भेषु मुक्ताफलानि जायन्त इति प्रसिद्धिः। करिरिपवः सिंहाः बहुहस्तिकुम्भस्थानं नखैर्विदारयन्ति। तदा तेषां नखरन्ध्रेषु मुक्ताफलानि लग्नानि भवन्तीति। अत्र मुक्ताफलैः लिङ्गभूतैः लिङ्गिनः सिंहमार्गस्य ज्ञानाद् अनुमानाख्योऽयमर्थालङ्कारः।। ६ ।।

न्यस्ताक्षरा धातुरसेन यत्र भूर्जत्वचः कुञ्जरबिन्दुशोणाः ।

व्रजन्ति विद्याधरसुन्दरीणामनङ्गलेखक्रिययोपयोगम् ।। ७ ।।

न्यस्तेति। यत्र शैले धातुरसेन, न्यस्ताक्षराः न्यस्तानि लिखितानि अक्षराणि यासु ताः, अत एव कुञ्जरबिन्दुशोणाः कुञ्जरा इव बिन्दु शोणाः, उपमानानि सामान्यवचनैः(पा.सू.२.१.५५) इति समासः। बिन्दुशोणत्वं सामान्यं ज्ञेयम्। कुञ्जरेषु पद्मकाख्यं बिन्दुजालकं विद्यते। तत् बिन्दुशब्देन उच्यते। पद्मकं बिन्दुजालकम्(२.८.३९) इत्यमरः। भूर्जत्वक्षु धातुरसाक्षरबिन्दुर्गृह्यते। कुञ्जरा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इव भूर्जत्वचः पद्मकवद्धातुरसबिन्दवः। शोणत्वं उभयत्रापीति। अस्मिन् व्याख्याने उपमादोषोऽस्तीति मत्वा अन्ये तु कुञ्जरबिन्दुवच्छोणा इति व्याचक्षते। धातुरसाक्षरस्थाने कुञ्जरस्थितबिन्दु जालकवत् शोणा लोहिता इत्यर्थः।

लोहितो रोहितो रक्तः शोणः कोकनदच्छविः

इत्यमरः(१.५.१५)। एवम्भूता भूर्जत्वचो विद्याधरसुन्दरीणां अनङ्गलेप क्रिययोपयोगं व्रजन्ति। खड्गघुटिका रसाञ्जनादि। विद्याधरा देवयोनयः। तद्योषितामनङ्गार्थः कामभोगार्थः यो लेखः। लिख्यत इति लेखः सन्देशपत्रम्। तत्क्रियया तत्करणेन उपयोगं साफल्यं प्राप्नुवन्ति। अयमर्थः - अन्यत्र स्त्रियः सन्देशपत्रिकाभिः प्रियाह्वानागमादि कुर्वन्ति। तदत्र विद्याधरयोषितो धातुरसन्यस्ताक्षराभिः भूर्जत्वग्भिरेव कुर्वन्तीति अनङ्गलेखत्वेन भूर्जत्वच उपयुक्ता आसन्निति भावः ।। ७ ।।

यः पूरयन् कीचकरन्ध्रभागान् दरीमुखोत्थेन समीरणेन ।

उद्गास्यतामिच्छति किन्नराणां तानप्रदायित्वमिवोपगन्तुम् ।। ८ ।।

यः पूरयन्निति। कीचकरन्ध्रभागान्,

कीचका वेणवस्ते स्युर्ये स्वनन्त्यनिलोद्धताः (२.४.१६१)

इत्यमरः। भागः प्रदेशः,

भागः प्रदेशः शकलो भागधेयञ्च कथ्यते।

कीचकानां सुषिरप्रदेशान्, दरीमुखोत्थेन समीरणेन गुहामुखोत्थितेन वायुना पूरयन्, यो हिमालयः, उद्गास्यतां उन्नतगानं करिष्यतां किन्नराणां, किन्नरा अश्वमुखा देवगायकास्तेषां तानप्रदायित्वमुपगन्तुमिच्छतीव तेषामहं तानप्रदायी भवामीति वाञ्छतीव। तत्रेयमुत्प्रेक्षालङ्कृतिः। तद्व्यञ्जक इवशब्दः। यथोक्तम् -

अन्यथावस्थितावृत्तिश्चेतनस्येतरस्य वा ।

अन्यथोत्प्रेक्ष्यते यत्र तामुत्प्रेक्षां प्रचक्षते ।। (काव्यादर्शः २.२१८) इति।

यस्य गुहामुखवायुना कीचकाः स्वनन्ति, तत्र किन्नराश्च गायन्तीति अर्थमात्रं विवक्षितम्। तेषां गास्यतां मुखवायुना वंशस्वरं कुर्वतां तानकर्ता भवितुमिच्छतीवेत्युत्प्रेक्षते। तानो नाम उद्गास्यतः स्वरादेः इयत्तापरि च्छेदकः कश्चिद् वंशस्वरः। तल्लक्षणं च भरतेनोक्तम् (१७.९९) -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

रागो यस्मिन्निवसति यस्मिंश्चापि प्रवर्तते ।
नेता च तारमन्द्राणां योजकत्वं च रज्यते ।।
ग्राहोपन्यासविन्यासससंन्यासन्यासगोचरः ।
अनुवृत्तिश्च यश्चेह सोंऽशः स्याद्दशलक्षणः ।। (२८.३४) इति ।

तानप्रदानं च वंशेनैव कार्यम्। तदप्युक्तं भरतेन(नाट्यशास्त्रम् ३०.१०) -

गाता यं यं स्वरं गच्छेत्तं तं वंशेन कारयेदिति।। ८ ।।

कपोलकण्डूः करिभिर्विनेतुं विघट्टितानां सरलद्रुमाणाम् ।
यत्र स्नुतक्षीरतया प्रसूतः सानूनि गन्धः सुरभीकरोति ।। ९ ।।

कपोलेति। कपोलकण्डूः विनेतुं, करिभिः विघट्टितानां सरळद्रुमाणां, स्नुतक्षीरतया प्रसूतः, करिकपोलघर्षणेन त्वचि क्षतायां क्षीर स्रवणेन जातो गन्धः सरळक्षीरगन्धः यत्र सानूनि सुरभीकरोति सुगन्धीकरोति। गन्धैरिति च पाठोऽस्ति ।। ९ ।।

वनेचराणां वनितासखानां दरीगृहोत्सङ्गनिषक्तभासः ।
भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः ।। १० ।।

वनइति। दरीगृहेति। दरीगृहमध्यप्रविष्टभासः ओषधयो यत्र वनितासखानां स्त्रीसहितानां वनेचराणां रजन्यां अतैलपूराः, पूरः पूरणं पूरः प्रवाहो वा। तैलपूररहिताः सुरतप्रदीपाः भवन्ति। सुरतार्थाः प्रदीपाः सुरत प्रदीपाः। ओषधयो निशि ज्वलन्तीति प्रसिद्धिः। सुरतगृहे दीपसन्निधानं अपेक्षितमेव । तथा चोक्तं रतिरहस्ये -

प्रसृतसुरभिधूपे पुष्पदामावकीर्णे
ज्वलितमहितदीपे धाम्नि कामी सुवेषः।
सह सहचरवर्गैर्वामभागे निवेश्य
स्त्रियमुपहितभूषां भावयेन्नर्मगोष्ठीम्।। इति।। १० ।।

उद्वेजयत्यङ्गुलिपार्ष्णिभागान् मार्गे शिलीभूतहिमेऽपि यत्र।
न दुर्वहश्रेणिपयोधरार्ता भिन्दन्ति मन्दां गतिमश्वमुख्यः।। ११ ।।

उद्वेजयतीत्यादि। अङ्गुलिपार्ष्णिभागान् अङ्गुलयश्च पार्ष्णिभागाश्च अङ्गुलिपार्ष्णिभागाः तान्। गुल्फयोरधः पार्ष्णिः। पुमान् पार्ष्णिरधस्तयोः इत्यमरः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(२.६.७२)। तानुद्वेजयति क्लेशयति जडीकरोति शिलीभूतहिमे पाषाणीभूतहिमे मार्गेऽपि दुर्वहश्रोणिपयोधरार्ताः। अतिपीनत्वात् दुर्वहाणां नितम्बस्तनानां भारेणार्ताः पीडिताः, अश्वमुख्यः किन्नरयोषितः, मन्दां गतिं, न भिन्दन्ति न त्यजन्ति। हिमबाधितचरणा अपि किन्नरनार्यस्तन 'नितम्बभारबाधया शीघ्रं गन्तुमक्षमा मन्दमेव गच्छन्तीत्यर्थः। शिलीभूतहिमे मार्गे अङ्गुलिपार्ष्णिभागान् उद्वेजयत्यपीति पूर्वार्धपदानां योजनां केचित् कुर्वन्ति।। ११ ।।

दिवाकराद् रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् ।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव ।। १२ ।।

दिवाकरादिति। सूर्यात् भीतमिव गुहासु लीनमन्धकारं यो दिवा अह्नि, रक्षतीति। भीतमिव दिवा गुहासु लीनमन्धकारं सूर्याद्रक्षतीत्यर्थः। भीतार्थानां भयहेतुः(पा.सू.१.४.२५) इति पञ्चमी। दिवाभीतमुलूकमिव गुहासु लीनमिति केचिदाहुः। काकवैरी दिवाभीत उलूकः कौशिकाह्वयः इति दुष्टस्यान्धकारस्य रक्षणं दूषणमेव तस्य।

तत् कथं गुणत्वेनोच्यते इत्याशङ्क्याह - उच्चैश्शिरसां उन्नतानां शरणं प्रपन्ने क्षुद्रे अपि ममत्वं मदीयमिति अभिमानित्वं नूनं सतीव सज्जन इव साधौ तु शरणं प्राप्ते यथा ममत्वं स्यात् तथा क्षुद्रेऽपि भवतीत्यर्थः। ममेति षष्ठ्यन्तप्रतिरूपको निपातः। ननु शरणागते ममत्वं नूनमिति वक्तुं न शक्यते।

त्रातव्य एव धर्मज्ञैर्वध्योऽपि शरणागतः

इति धर्मशास्त्रात्, तस्मादपि वध्यं प्रपन्नं न प्रयच्छन्तीति यजुर्वेदवाक्याच्च।

अत्र अयथार्थवाचिनो नूनमित्यस्य शब्दस्य प्रयोगो दोषः किं न स्यादिति चेत्,

सत्यं एतत्। तथाप्येतद्दोषपरिहाराय योजनान्तरं ब्रूमहे। उत्तरार्धे स्थितो नूनंशब्दः पूर्वार्धवाक्ये रक्षति नूनमित्यत्र योज्यः। तथा सति पूर्वार्धे उत्प्रेक्षा स्यात्। चेतनारहितस्यान्धकारस्य भयानुपपत्तेः भीतमिवेत्युत्प्रेक्षा। यस्य गुहानां महत्त्वाद् रविकरसम्पर्काभावात् तासु दिवापि अन्धकारः तिष्ठतिति यथार्थः। तं रक्षति नूनं इति उत्प्रेक्षा। एवं सति न कश्चिद् दोषः। नूनं तर्केऽर्थनिश्चये (अमरकोशः ३.४.१२) इति नूनंशब्दो निश्चयार्थः।। १२ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लाङ्गूलविक्षेपविसर्पिशोभैरितस्ततश्चन्द्रमरीचिगौरैः ।
यस्यार्थयुक्तं गिरिराजशब्दं कुर्वन्ति बालव्यजनैश्चमर्यः ।। १३ ।।

लाङ्गूलेति। लाङ्गूलं बालदण्डः। तस्य विक्षेपणं विक्षेपः। तेन विसर्पिणी शोभा येषां तैः। इतस्ततो लाङ्गूलविक्षेपविसर्पिशोभैश्चन्द्रमरीचिगौरैः बालव्यजनैः बालचामरैः चमर्यो यस्य गिरिराजशब्दं अर्थयुक्तं कुर्वन्ति। चमरीभिः कृते बालविक्षेपे चामरवद् दृश्यमाने सति गिरिराज शब्दः तस्य व्यक्तोऽभूदित्यर्थः। चामरविक्षेपणं हि राजचिह्नमिति।। १३ ।।

यत्रांशुकाक्षेपविलज्जितानां यदृच्छया किम्पुरुषाङ्गनानाम् ।
दरीगृहद्वारविलम्बमानास्तिरस्करिण्यो जलदा भवन्ति।। १४ ।।

यत्रेति। दरीति। गुहाद्वारविलम्बमानमण्डला जलदाः। अंशुकेति। भोगार्थं प्रियैः कृतेनांशुकाक्षेपेण वस्त्रापहरणेन विलज्जितानां किम्पुरुषाङ्गनानां यदृच्छया अकस्माद् दैववशेन तिरस्करिण्यो भवन्ति। आच्छादनपटाः तिरस्करिण्यः। प्रतिसीरा यवनिका स्यात्तिरस्करिणी च सा (२.६.१२०), बिम्बोऽस्त्री मण्डलं त्रिषु(१.३.१५) इत्यमरः।। १४ ।।

भागीरथीनिर्झरशीकराणां वोढा मुहुः कम्पितदेवदारुः।
यद्वायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखण्डिबर्हः।। १५ ।।

भागीरथीति। यद्वायुः यत्सम्बद्धवायुः, अन्विष्टमृगैः कृतमृगान्वेषणैः, किरातैरासेव्यते, मृगान्वेषणधावनश्रमशमनार्थं संसेव्यते। तस्य वायोर्विशेषणानि भागीरथीनिर्झरशीकराणां गङ्गाप्रवाताम्बुकणानां वोढा वाहकः। शीकरान् वहन् इत्यर्थः। शैत्यप्रकटनार्थं विशेषणम्। मुहुः कम्पितदेवदारुः पुनः पुनराधूतदेवदारु किसलयः। मुहःशब्दः सद्योऽर्थ इति केचिदाहुः। सद्योद्भिन्नदेवदारुकिसलय पुटाधूननसुरभिरित्यर्थः। सौरभ्य प्रकटनार्थं विशेषणम्। भिन्नशिखण्डिबर्हः भिन्नः असम्बद्धः शिखण्डिबर्हो येन। संस्पृष्टमयूर इत्यर्थः। एतदपि शैत्यप्रकटनार्थं विशेषणम्। आतपादिषु शैत्यार्थं हिमधूसरबर्हाणि धार्यन्ते । भिन्नं विदीर्णे सम्बन्धे पृथग्भूते च कथ्यते इति। अभिन्नशिखण्डिबर्ह इति केचिद् आचक्षते। मान्द्यद्योतनार्थं इदं पदम्। मन्दगमनाद् अभग्नशिखण्डिबर्ह इत्यर्थः। चण्डवायुना शिखण्डिबर्हः खलु भिद्यते। मन्देन किञ्चिदाधूयत इति। भिन्नशिखण्डिबर्हैरिति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

केषाञ्चित् पाठः। मृगानुधावनेन आयासाद् गळितमयूरबर्हावतंसैरित्यर्थः। एतत् किरातविशेषणमिति।। १५ ।।

सप्तर्षिहस्तावचितावशेषाण्यधो विवस्वान् परिवर्तमानः ।

पद्मानि यस्याग्रसरोरुहाणि प्रबोधयत्यूर्ध्वमुखैर्मयूखैः ।। १६ ।।

सप्तेति। सप्तानां ऋषीणां हस्तैरवचितानि सप्तर्षिहस्तावचितानि। तेभ्योऽवशेषाणि अवशिष्टानि सप्तर्षिहस्तावचितावशेषाणि। उपयुक्ताद् अन्यः शेषः। शेषशब्दस्य त्रिलिङ्गत्वं दृष्टम्।

शेषोऽवसानेऽनन्ताख्ये सर्पराजेऽथ शार्ङ्गिणः।

अवतारान्तरेऽपत्ये त्रिष्वन्यत्रोपयुज्यते।। इति।

सप्तर्षिमण्डलं हि सर्वग्रहाणामुपरि वर्तते । यथोक्तं वसिष्ठसिद्धान्ते -

औत्तानपादिरखिलग्रहतारकाणां

उच्चैस्तने वसति धाम्नि ततोऽप्यधस्तात्।

सप्तर्षिमण्डलमुपस्थितमप्यमुष्मात्

तिष्ठत्यधो नभसि हि ग्रहतारकाद्याः।। इति।

तस्माद् ऋषिमण्डलादधः परिवर्तमानो विवस्वान् यस्याग्रसरोरुहाणि अग्रसरस्सु रोहन्तीत्यग्रसरोरुहाणि शिखरसरस्सु जातानि देवतार्चनार्थं सप्तर्षिहस्तावचितावशेषाणि पद्मानि ऊर्ध्वमुखैर्मयूखैः प्रबोधयति विकासयति। विकासयतीत्यनेन अस्यौन्नत्यं विशेषणं दर्शितम्। चेतनधर्मस्य बोधस्य पद्मेऽध्यासात् समाधिर्नामालङ्कारः ।। १६ ।।

यज्ञाङ्गयोनित्वमवेक्ष्य यस्य सारं धरित्रीधरणक्षमं च ।

प्रजापतिः कल्पितयज्ञभागः शैलाधिपत्यं स्वयमन्वतिष्ठत् ।। १७ ।।

यज्ञेति। यज्ञाङ्गयोनित्वं यज्ञाङ्गानि सोमलताकृष्णाजिनादीनि तेषां योनित्वं कारणत्वम्। यथोक्तं विष्णुपुराणे हिरण्यगर्भेण -

यज्ञाङ्गार्थं मया सृष्टो हिमवानचलेश्वरः इति।

धरित्रीभरणक्षमं यस्य सारं बलं चावेक्ष्य कल्पितयज्ञभागः कल्पितो यज्ञे हस्तिरूपो हविर्भागो येन सः। तथा च श्रुतिः - सोमस्य राज्ञः कुरङ्गः इन्दोः शिंशुमारो हिमवतो हस्तीति। एवं वेदैः कल्पितयज्ञभागः प्रजापतिः शैलाधिपत्यं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्वयमन्वतिष्ठत् यद्रूपं स्वयमेवानुष्ठितवान्। हिमवद्रूपेण ब्रह्मा शैलाधिपत्यं राज्यं स्वयमुपभुक्तवानित्यर्थः।

अथवा - अन्वतिष्ठद् अनुष्ठापयामासेति अन्तर्भावितण्यर्थोऽयं प्रयोगः। तत्रैवं योजना - यस्य सारादिगुणानवेक्ष्य यस्मै स्वयं आत्मना कल्पितयज्ञभागो ब्रह्मा यं शैलाधिपत्यमन्वतिष्ठद् अनुष्ठापितवान्। शैलाधिपत्ये भोक्तारं कृतवान् इत्यर्थः। अन्तर्भावितण्यर्थप्रयोगो भारविकाव्ये दृष्टः(८.२८) - प्रशान्त घर्माभिभवः शनैर्विवान् इति। प्रशमितघर्माभिभव इति तत्रार्थः।। १७ ।।

एवं यच्छब्देन निर्दिष्टस्य गुणवर्णनं कृत्वा नायिकायाः पार्वत्याः उत्पत्तिकारणं तस्य विवाहमाह -

स मानसीं मेरुसखः पितॄणां कन्यां कुलस्य स्थितये स्थितिज्ञः ।
मेनां मुनीनामपि माननीयामात्मानुरूपां विधिनोपयेमे ।। १८ ।।

स मेरुसखः, मेरुः सखा यस्य सः। रत्नसानुः कनकमयसुमेरुर्यस्य सखेत्यनेनास्य मेरोरपि वैशिष्ट्यं दर्शितम्। स्थितिज्ञः धर्मेण स्थितिमाचारं जानन्। स हिमालयः। मुनीनामपि माननीयां मान्यां पूज्याम्। पितॄणां मानसीं कन्यामात्मानुरूपामात्मनः समानगुणां मेनां शास्त्रोक्त विधिनोपयेमे, मेनायाः कन्यकायाः विवाहं कृतवान्।

पुराणप्रसिद्धमेतत् (शिवपु. मत्स्यपु. हरिवंशम् १.१८.१३) -
पितॄणां मानसी कन्या मेना नाम महागिरेः ।
पत्नी हिमवतस्तस्य पुत्रो मैनाक उच्यते।। इति।
प्रसिद्धमनुस्मृत्य तत्पुत्रस्य मैनाकस्य गतिमाह -

असूत सा नागवधूपभोग्यं मैनाकमम्भोनिधिबद्धसख्यम् ।
क्रुद्धेऽपि पक्षच्छिदि वृत्रशत्राववेदनाज्ञं कुलिशक्षतानाम्।। १९ ।।

असूतेति। सा मेना, मैनाकमसूत, मैनाकाख्यं सुतं प्रसूतवती। तस्य वयःक्रमसिद्धं विशेषणत्रयमाह - नागवधूपभोग्यं विवाहस्वीकृतनागकन्यकोपभोग्यम्। सामुद्रप्रवेशान्नागनागकन्यकाभिरुपभोग्यमिति वा। अम्भोनिधिबद्धसख्यं समुद्रेण सह कृतसख्यम्। गिरीणां पक्षच्छेदनं कर्तुमुद्यताद् इन्द्राद् भयेन यावज्जीवं अहं तव सखा भविष्यामीति समुद्रं शरणं प्राप्य तल्लयेनाद्यापि समुद्रे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पक्षसहितं वसन्तमित्यर्थः। उक्तमेव विवृणोति - प्रायः गिरीणां पक्षच्छिदि वृत्रशत्राविन्द्रे क्रुद्धेऽपि कुलिशक्षतानां वज्रघातव्रणानां अवेदनाज्ञम्। वेदनां जानातीति वेदनाज्ञः, स न भवतीत्यवेदनाज्ञः, तम्। पक्षच्छेदनाभावात् वज्रक्षतानां वेदनामजानन्तं इत्यर्थः।

अत्र मैनाकोत्पत्तिकथनं व्यर्थमिति न शङ्कनीयम्। पार्वत्या भ्रातृमत्त्वाद् विवाहयोग्यताप्रतिपादनार्थं तज्जन्मोक्तमिति ज्ञेयम्। पुत्रिकाकरणशङ्कानिवृत्त्या भ्रातृमत्या एव विवाहयोग्यत्वं धर्मशास्त्रे याज्ञवल्क्येनोक्तम् -

अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम्।
अरोगिणीं भ्रातृमतीं लक्षण्यां स्त्रियमुद्वहेद्।।(विवाहप्रकरणं श्लोकः५२)

इति ।। १९ ।।

अथ नायिकायाः पार्वत्याः पूर्वजन्मनि दाक्षायण्याः सत्याः शरीरत्यागकारणं वदन् ध्यानपूर्विकामुत्पत्तिं श्लोकद्वयेनाचष्टे -

अथावमानेन पितुः प्रयुक्ता दक्षस्य कन्या भवपूर्वपत्नी ।
सती सती योगविसृष्टदेहा तां जन्मने शैलवधूं प्रपेदे ।। २० ।।

अथेत्यादि। पितुरपमानेन पित्रा कृतेनापमानेन, प्रयुक्ता देहत्यागाय कृतनिश्चया, भवपूर्वपत्नी भवस्य पूर्वभार्या, सती भवति। यद्वा - सती साध्वी, योगविसृष्टदेहा। परमात्मन्यात्मनः संयोजनं योगः। तेन त्यक्तशरीरा। दक्षस्य प्रजापतेः कन्या, सती सती नामधेया, जन्मने पुनरुद्भवार्थं तां शैलवधूं प्रपेदे गिरिराजपत्नीं प्राप्तवती। अनेन (स्कान्द)पुराणाख्यानकथा सङ्गृहीता(२.७) - पुरा किल दक्षप्रजापतिः शम्भुं विहाय, अन्यान् देवान् आहूय, यज्ञं प्रारभत। तदा दक्षकन्या सती स्वपित्रा नाहूतापि, भर्त्रा निवारितापि, यज्ञं द्रष्टुं गता। पित्रावमानिता तदवमानेन दुःखेन त्यक्तदेहा, ततः पार्वतीरूपेण भर्तुः समागमोत्सुका पुनर्जननार्थं मेनागर्भं प्राप्तवतीति।। २० ।।

सा भूधराणामधिपेन तस्यां समाधिमत्यामुदपादि भव्या ।
सम्यक्प्रयोगादपरिक्षतायां नीताविवोत्साहगुणेन सम्पत् ।। २१ ।।

सेति। भव्या कल्याणी, सा सती, भूधराणामधिपेन समाधिमत्यां नियमवत्यां, तस्यां मेनायां, उदपादि उत्पादिता। तस्या वाक्यार्थोपमामाह -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सम्यक् प्रयोगादपरिक्षतायां नीतावुत्साहगुणेन सम्पदिव ।

सामादीनामुपायानां गुणैः षड्भिरुपेयुषाम्।
धर्मयुक्त्या यथास्थानं प्रयोगो नीतिरुच्यते।। इति।
सहायः साधनोपायो विभागो देशकालयोः ।
विपत्तेश्च प्रतीकारः सिद्धिपञ्चाङ्गमुच्यते ।।

इति पञ्चाङ्गमन्त्रं सम्यगालोक्य, शास्त्रविधिना प्रयोगः सम्यक् प्रयोगः सम्यग् अनुष्ठानम्। तस्मादपरिक्षतायां अविनष्टायां नीतावुत्साहाख्येन गुणेन सम्पद्यद्वत् प्रभुशक्तिः यथोत्पद्यते तद्वदिति। अत्र नीताविति मन्त्र शक्तिरुक्ता। उत्साहगुणेन इत्युत्साहशक्तिरुक्ता। सम्पदिति प्रभुशक्तिरुक्ता। प्रभुत्वशक्तेर्हि मन्त्रोत्साहौ कारणमिति।। २१ ।।

प्रसन्नदिक्पांसुविविक्तवातं शङ्खस्वनानन्तरपुष्पवृष्टि ।
शरीरिणां स्थावरजङ्गमानां सुखाय तज्जन्मदिनं बभूव।। २२ ।।

प्रसन्नेति। तज्जन्मदिनं तस्या जन्मदिनम्। स्थावरजङ्गमानां शरीरिणां सुखाय बभूव। स्थावराः पादपलतादयः। जङ्गमाः नरतिर्यगण्डजादयः। तेषां द्वयानामपि भूतानां सुखार्थमभूत्। सुखजनकमासीदित्यर्थः। तस्य सुखकारणं विशेषणत्रयमाह - प्रसन्नदिक् प्रसन्ना दिशो यस्मिन् जन्मनि तत् तथा। पांसुविविक्तवातं पांसुभिः विविक्तः पृथग्भूतो वातो यस्मिंस्तत्। मान्द्यात् पांसुरहितवातसञ्चरणमित्यर्थः। शङ्खेति। शङ्ख स्वनानन्तरं पुष्पवृष्टिः यस्मिंस्तद्। दिव्यशंखध्वनिसमनन्तरसञ्जातसुरपुष्प वर्षमित्यर्थः। स्थावराणां चक्षुरादीन्द्रिय-रहितानां अपि त्वक्पत्रादिषु प्रसाद विशेष एव सुखम्। जङ्गमानां पञ्चेन्द्रियनिर्वृतिप्रसिद्धिः। तद्द्वयमप्यासीत्। ननु कथमिह पञ्चेन्द्रियनिर्वृतिः इति चेत्, ब्रूमः। प्रसादेन रमणीयतया दर्शनीयदिङ्मण्डलदर्शनेन चक्षुषः, मन्दशीतवातस्पर्शनेन त्वचः, शङ्खस्वनश्रवणेन श्रोत्रस्य, दिव्यकुसुमगन्धघ्राणेन घ्राणस्य, नभसि देवशङ्खध्वनिं आकर्ण्य किमिदमित्युन्मुखानां ओष्ठलग्नसुरभिसुर-कुसुमरसास्वादने जिह्वाया निर्वृतिरासीदिति विशेषणसामर्थ्यात् प्रतीयते। तज्जन्मदिनमिति शाकपार्थिवादित्वान्मध्यपदलोपी समासः। तज्जन्मकाले वर्तमानं दिनमित्यर्थः।। २२ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तया दुहित्रा सुतरां सवित्री स्फुरत्प्रभामण्डलया चकासे।

विदूरभूमिर्नवमेघशब्दादुद्भिन्नया रत्नशलाकयेव।। २३ ।।

तयेति। स्फुरत्प्रभामण्डलया तया दुहित्रा पुत्र्या, सवित्री जननी माता मेना, सुतरां चकासे शुशुभे। नवमेघशब्दाद् उद्भिन्नया उत्थितया, स्फुरत्प्रभा-मण्डलया रत्नशलाकया वैडूर्यभूमिमणिसूच्या भूमिरिव विडूराख्यगिरेर्भूमिर्यथा भाति तद्वदिति। विडूरभूमौ मेघशब्दात् वैडूर्यरत्नाङ्कुराः प्ररोहन्तीति प्रसिद्धिः। तथाह्युक्तं भोजराजेन रत्नलक्षणशास्त्रे -

अस्ति शैलो विदूराख्यः पर्यन्ते तस्य काञ्चने।

मही रत्नाकरीभूता वैडूर्यं तत्र जायते।।

मेघशब्देन जायन्ते तत्र रत्नवाङ्कुराः।

क्रमात् परिणतास्ते स्युर्मणयो राजपूजिताः।। इति।। २३ ।।

दिने दिने सा परिवर्धमाना लब्धोदया चान्द्रमसीव लेखा।

पुपोष लावण्यमयान् विशेषान् ज्योत्स्नान्तराणीव कलान्तराणि।। २४।।

दिनेदिनेति। दिने दिने परिवर्धमानेति द्वयोर्विशेषणम्। लब्धोदया चान्द्रमसी लेखेव सा गौरी ज्योत्स्नान्तराणि कलान्तराणीव लावण्यमयान् विशेषान् पुपोष इत्यन्वयः। विशेषशब्दस्तदवयववाची।

विशेषोऽवयवे व्यक्तौ सामान्याधिकसत्त्वयोः

इति नानार्थः। लावण्यमयानीति तस्य विकारः(पा.सू.४.३.१३४) इति मयट्। लावण्यविकारान्, अवयवरूपेण परिणतानि लावण्यान्येवेत्यर्थः। लावण्यं सौन्दर्यविशेषः। ज्योत्स्नान्तराणीति पदं कलान्तराणानां विशेषणम्, ज्योत्स्नैव अन्तरमन्तर्धिर्व्यवधानं येषां तानि ज्योत्स्नान्तरितानि। ज्योत्स्नामयानीत्यर्थः। अथवा ज्योत्स्नान्तरे मध्ये येषां तानि। ज्योत्स्नागर्भाणीति यावत्।

अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये।

छिद्रात्मीयविनाबहिरवसरमध्येन्तरात्मनि च ।।(३.३.१८८)

इत्यमरः। कलान्तराणि कलाभेदान्। कलाविशेषान् इत्यर्थः। लब्धोदयेत्यत्र उदयशब्देन उदयपर्वताद् उत्थानं नाभिमतम्। तस्य कृष्णपक्षेऽपि विद्यमानत्वात्। किं तर्हि। अमावास्यान्ते सूर्यं प्रविष्टस्य इन्दोः पूर्ववद् द्वितीयायां तिथौ यद्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दर्शनम्, तदिह उदयशब्देन गृह्यते। यथोक्तं ज्योतिःशास्त्रे -

भानोः समासन्नतया ग्रहाणामदर्शनं यत्तदिहास्तमुक्तम्।

ततोऽस्तलग्नाद् रविदूरगत्या यद्दर्शनं स्यादुदयं तमाहुः।।

गौरीपक्षे जन्मलब्धोदया दिने दिने परिवर्धमाना बाला लावण्यमयान् अवयवान् पुपोष। लब्धोदया दिने दिने परिवर्धमाना चान्द्रमसी लेखा यथा ज्योत्स्नान्तराणि कलान्तराणि पुष्यति तद्वद्, इवशब्दद्वयोपादानाद्। अनेकेवशब्दोपादाने वाक्यार्थोपमा। (काव्यादर्शः २.४३ -)

वाक्यार्थेनैव वाक्यार्थः यद्येको ह्युपमीयते।

एकानेकेवशब्दत्वात् सा वाक्यार्थोपमा द्विधा।।

अत्र शशिकलाया गौरीज्योत्स्नाया लावण्यं कलान्तरैरुपमीयते। अत्र कलान्तराणीव विशेषानित्युपमानोपमेययोर्भिन्नलिङ्गत्वमुपमादूषणं किं न स्यादिति न शङ्कनीयम्। धीमतां उद्वेगाभावान्न दोषः। (काव्यादर्शः २.५१ -)

न लिङ्गवचने भिन्ने न हीनाधिकतापि वा।

उपमा दूषणायालं यत्रोद्वेगो न धीमताम्।। इति।। २४ ।।

तां पार्वतीत्याभिजनेन नाम्ना बन्धुप्रियां बन्धुजनो जुहाव।

उ मेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगाम।। २५ ।।

तामिति। अभिजनेन अभिजननिमित्तेन पर्वतस्यापत्यमिति निमित्तेन नाम्ना, बन्धुप्रियां तां बन्धुजनः पार्वतीति जुहाव। तां देवीं पार्वतीत्यनेन नाम्ना आहूतवान् इत्यर्थः। जुहावेति ह्वेञ् स्पर्धायां शब्दे चेत्यस्माद् धातोः लिटि रूपम्। न जुहोतेः। आङ्उपसर्गरहितोऽपि ह्वयतिराह्वाने प्रयुज्यते। दूराद्धूते च (पा.सू.८.२.८४) इति सूत्रदर्शनाद्। धातौ विद्यमान एवार्थ उपसर्गेण प्रकाश्यते। पश्चाद्यौवने मात्रा उ मेति तपसो निषिद्धा। उ इति पर्याप्तिवाचकं अव्ययम्। मेति निषेधवाचकम् ।

उ स्यात् प्रसिद्धिपर्याप्तिवितर्कामन्त्रणेषु च

इति नानार्थः। अमानोनाः प्रतिषेधार्थाः। उ पर्याप्तं गृहेषु विधीयमानेन देवतार्चनेनैवालम्। इत ऊर्ध्वं वनप्रवेशेन दुश्चरं तपो मा भूदिति। अथवा उशब्द आमन्त्रणे वर्तते। उ अयीत्यर्थः। तस्याः समुद्योगं दृष्ट्वा उ अयि माभूदयं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तपउद्योग इति तपसो निवारिता उमाख्यां जगाम, उमेति नाम प्राप्ता। गृहे देवतार्चनं च तपसो निषेधं च स्वयमेव वक्ष्यति(५.४) - मनीषिता इति।

उमेति मात्रेत्यर्थान्तरं ब्रूमः - उः शम्भुः, तस्य मा श्रीः इयमिति। मात्रा तपसः अनिषिद्धा, तपःसमुद्योगाद् अनिवारितेति। नारदादिमुनिवचनेन तां शिवस्य सहचरीं श्रियं भविष्यन्तीं ज्ञात्वा तत्समागमसाधनात् तपसो न निषिद्धा। यत्तु मनीषिता इत्यादि वचनं, तदपत्यवात्सल्येन लोकव्यवहारानुसरणाय तत्त्वतः तपोनिषेधे तात्पर्येणोक्तमिति ज्ञेयम्। पारमार्थिक्या मात्राज्ञाया दुरतिक्रमत्वादिति। तस्याः शिवाश्रितत्वं प्रयोगान्तरे दृष्टम् -

चर्मान्तरञ्च शवभस्मविलेपनञ्च
भिक्षाटनञ्च नटनञ्च परेतभूमौ।
वेतालसंहतिपरिग्रहता च शम्भोः
शोभां वहन्ति गिरिजे तव साहचर्यात्।। इति।

अथवा - उः शिवः, तस्य मा मानप्रमाणम्, अनया शिवो मीयते ज्ञायत इत्युमा। यतो वाचो निवर्तन्ते अप्राप्य मनसा सह(तैत्तिरीयोपनिषत् २.४, ९) इति मायासंसर्गरहितस्य वस्त्य शिवस्य मानसमोचरत्वात् तस्य मायाशबलितस्य रूपस्यैव प्रमेयत्वमिति शिवरूपसाधनत्वाद् उमेति मात्रा तपसो निषिद्धेति। इदमपि स्तोत्रे दृश्यते -

पूर्वं करग्रहणमङ्गलतो भवत्याः
शम्भुं क एव बुबुधे गिरिराजकन्ये इति ।। २५ ।।

महीभृतः पुत्रवतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम्।
अनन्तपुष्पस्य मधोर्हि चूते द्विरेफमाला सविशेषसङ्गा।। २६ ।।

महीभृतः शैलस्य, पुत्रवतोऽपि दृष्टिः तस्मिन्नपत्ये तस्यां पार्वत्यां, तृप्तिं न जगाम। अपुत्रस्य तु कन्यायां विशेषेण प्रीतिर्भवति। पुत्रवतस्तु सा नास्तीति प्रसिद्धिः। तस्यास्तु बहुगुणविशिष्टं वपुर्दृष्ट्वा पितुर्दृष्टिस्तृप्तिं न जगाम। न प्राप्तवतीत्यर्थः। अपत्यशब्दः कन्यायां पुत्रेऽपि वर्तते।

आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी।
आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे।। (२.६.२७)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इत्यमरः। तदेव दृष्टान्तेनोपपादयति - अनन्तपुष्पस्य मधोर्वसन्तस्य, द्विरेफमाला वसन्तसम्बन्धिनी भृङ्गमाला, चूते सविशेषसङ्गा हि विशेषसङ्ग सहिता। हि प्रसिद्धौ। अत्र मधोरिति चूतापेक्षया सम्बन्धे षष्ठीति वल्लभदेवेन व्याख्यातं न ग्राह्यम्। दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यप्रसङ्गात्। तत्र पूर्वं महीभृतो दृष्टिः इत्युक्तम् । तस्मादत्रापि भृङ्गमालापेक्षया सम्बन्धे षष्ठी वेदितव्या।। २६ ।।

प्रभामहत्या शिखयेव दीपस्त्रिमार्गयेव त्रिदिवस्य मार्गः।

संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च।। २७ ।।

प्रभेति। तया दुहित्रा स पिता पूतश्च विभूषितश्चाभूत्। शिवप्रिया सा देवी सुता जातेति कुलेन सहासौ पूतोऽभूत्। प्रशस्तापत्यप्राप्तिरेव पितुः अलङ्कार इति तयालङ्कृतश्चाभूत्। तत्रोपमामाह - प्रभामहत्या प्रभाधिकया, शिखया ज्वालया, दीप इव। भाजनतैलवर्त्तिज्वालात्मकसमुदायोऽत्र दीपशब्देन उच्यते। ज्वालानामलाभे भाजनमप्यपूतमनलङ्कारं च भवतीति प्रसिद्धिः। त्रिमार्गया त्रिपथया, गङ्गया त्रिदिवस्य मार्गो यथा पूतोऽलङ्कृतश्च भवति, तद्वदिति। संस्कारवत्या गिरा व्याकरणसंस्कारयुक्तया गिरा, मनीषी विद्वान्, यथा पूतो विभूषितश्च भवति, तद्वदिति। व्याकरणसंस्कारसंस्कृतवचसां पूतत्वं (वृद्ध)मनुना दर्शितम् (मत्स्यपु.) -

यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम्।

तावुभौ पुण्यकर्माणौ पङ्क्तिपावनपावनौ।। इति।(हेमाद्रिः ३.१)

प्रभया महतीति तृतीयासमासः।। २७ ।।

मन्दाकिनीसैकतवेदिकाभिः सा कन्दुकैः कृत्रिमपुत्रकैश्च।

रेमे मुहुर्मध्यगता सखीनां क्रीडारसं निर्विशतीव बाल्यम्।। २८ ।।

मन्दाकिनीति। मन्दाकिनी गङ्गा, तस्याः सैकतं सिकतामयं पुलिनम्, तत्र वालुकासु सिकतासु। वेदिकास्विति वा पाठः। सैकताः सिकतामयाः वेदिकाः, ताभिः। सैकतभूमिषु इत्यर्थः। तत्र सखीनां मध्यगता सा गौरी सिकतवालुकाभिः कन्दुकैः कृत्रिमपुत्रकैश्च मुहुः रेमे। कृत्रिमैः पुत्रत्वेन सङ्कल्पितैः दारुशिलाविशेषकृत्रिमपुत्रकैर्मुहुश्चिक्रीड। पौनःपुन्ये भृशार्थे वा मुहुःशब्दः। क्रीडारसं क्रीडैव रसः सारो यस्मिंस्तत्। तथाभूतं बाल्यं यौवनं वयो निर्विशतीव

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निर्वर्तयन्ती। अनवरतक्रीडया बाल्यमतिक्रामतीवेत्युत्प्रेक्षा।

अथवा क्रीडेति पदच्छेदः कार्यः। बाल्ये रसं, बाल्यसारूप्यं बाल्ये भवं वा रसं सुखं, निर्विशन्ती अनुभवन्ती, क्रीडेव। अथवा - आरसं प्रभूतरसं, बाल्यं बालभावं निर्विशन्ती अनुभवन्ती क्रीडैव कुमारीरूपेणावतीर्णा सती सखीमध्ये सञ्चरन्ती साक्षात् क्रीडैवेति।आङ् ईषदर्थप्रकर्षाभिमुख्यमर्यादाभि-विधिषु। बाल्ये बाले भवं इत्यस्मिन् अर्थे बालशब्दात् तत्र भवः(पा.सू.४.३.५३) इत्यण् प्रत्ययः। तुल्यास्यप्रयत्नं सवर्णम् (पा.सू.१.१.९) इति आस्ये भवमास्यमिति यथा व्याख्यातं, तद्वदिहापीति ।। २८ ।।

तां हंसमालाः शरदीव गङ्गां महौषधिं नक्तमिवात्मभासः।

स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः।। २९ ।।

तामिति। हंसमालाः शरदि गङ्गामिवात्मभास ओषधिसम्बन्धिन्यो भासो नक्तं रात्रौ ओषधिमिव यथा प्रपद्यन्ते, तथा प्राक्तनजन्मनां विद्या उपदेशकाले शिक्षाकाले तां गौरीं प्रपेदिरे प्राप्तवत्यः। स्थिरोपदेशादिति हेतुः प्रतिभा-विशेषणम्। पूर्वोपदेशान्निमित्तात् तां प्रापुरिति।। २९ ।।

असम्भृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य।

कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात् परं साथ वयः प्रपेदे।। ३० ।।

असम्भृतमिति। अथ सा बाल्यात् परं यौवनं प्रपेदे। वयसो विशेषणान्याह। अङ्गयष्टेः शरीरलतायाः, असम्भृतं असम्पादितं असङ्गृहीतं मण्डनं अलङ्करणम्। सदा सन्निहितं भूषणमित्यर्थः। मदस्यानासवाख्यं मद्यव्यतिरिक्तं करणम्। सम्मोहानन्दश्चेतोविकारो मदः। तस्य कारणं इत्यर्थः। मदलक्षणमुक्तं भोजराजेन (सरस्वतीकण्ठाभरणम् ५.१५२) -

सम्मोहनानन्दसम्भेदो मदिरादिकृतो मदः।

तथा कामस्य कुसुमायुधस्य, पुष्पव्यतिरिक्तं पुष्पविलक्षणम्। पुष्पादन्यदस्त्रं लोकचेतोवशीकरणमित्यर्थः। एवम्भूतं यौवनं सम्पन्नं सम्प्राप्तवतीति। अत्र एकमेव वयोलक्षणं पदार्थमुद्दिश्यानेकमण्डनादेः सम्भृतत्वादिप्रसिद्धहेतुः व्यावर्तते। स्तनोद्भेदधातूपचयलावण्यश्रीप्राप्त्यादिकारणान्तरं च विभाव्यते। तस्मादियं चित्राणामकारणान्तरविभावनालङ्कृतिः (काव्यादर्शः २.१९९) -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रसिद्धहेतुव्यावृत्त्या यत् किञ्चित् कारणान्तरम्।
यत्र स्वाभाविकत्वं वा विभाव्यं सा विभावना।।
शुद्धा चित्रा विचित्रा च त्रिविधा सा निगद्यते। इति।। ३० ।।

उन्मीलितं तूलिकयेव चित्रं सूर्यांशुभिर्भिन्नमिवारविन्दम्।
बभूव तस्याश्चतुरश्रशोभं वपुर्विभक्तं नवयौवनेन।। ३१ ।।

उन्मीलितमिति। तूलिकया चित्रलेखनशलाकया, उन्मीलितं स्फुटीकृतं, प्रकटीकृतावयवं चित्रं यथा चतुरश्रशोभं वहति। सूर्यांशुभिर्भिन्नं विदलितं, विकसितमरविन्दमिव यथा चतुरश्रशोभं स्यात्, तथा नवयौवनेन विभक्तं पूर्वावस्थानात् पृथक्कृतं स्तननितम्बादिसंस्थानं तस्या वपुश्चतुरश्रशोभं बभूव। सर्वतोभद्रमभवदित्यर्थः। चतुरश्रा सर्वतोव्याप्तिमती शोभा यस्य तदिति। समन्ततः शोभत इति। चतुरश्रशोभीति केषाञ्चित् पाठः।। ३१ ।।

तस्याः पादादिकेशान्तानामङ्गानां शोभातिशयं वर्णयितुमारभते -

अभ्युन्नताङ्गुष्ठनखप्रभाभिर्विक्षेपणाद् रागमिवोद्गिरन्तौ।
आजह्रतुस्तच्चरणौ पृथिव्यां स्थलारविन्दश्रियमव्यवस्थाम्।। ३२ ।।

अभ्युन्नतेति। अभ्युन्नतौ गूढगुल्फौ पादौ रक्तनखौ शुभौ (सामुद्रिकम्) इति लक्षणेन अभ्युन्नतयोरङ्गुष्ठयोर्नखप्रभाभिः विक्षेपणात् पादन्यासान्तर्गतं रागं रक्तत्वं लाक्षादिकं वा, उद्गिरन्ताविव पादविक्षेपणायासान्तर्गतं रागं रक्तनखप्रभापदेशात् वमन्ताविव दृश्यमानौ तच्चरणौ पृथिव्यां अव्यवस्थां अव्यवतिष्ठमानां सञ्चारिणीं स्थलारविन्दश्रियं आजह्रतुः आहृतवन्तौ। स्वीकृतवन्तावित्यर्थः। रागोऽनुरागे लाक्षायामिति। अत्रोद्वमनस्य गौणत्वात् न ग्राम्यत्वम् (काव्यादर्शः १.९५) -

निष्ठ्यूतोद्गीर्णवान्तादिगौणवृत्तिव्यपाश्रयम्।
अतिसुन्दरमप्यत्र ग्राम्यकक्ष्यां विगाहते।। इति।। ३२ ।।

सा राजहंसैरिव सन्नताङ्गी गतेषु लीलाञ्चितविक्रमेषु।
व्यनीयत प्रत्युपदेशलुब्धैरादित्सुभिर्नूपुरशिञ्जितानि।। ३३ ।।

सेति। सा सन्नताङ्गी सन्नतं भद्रं स्तनभारादवनतं वा अङ्गं शरीरं यस्याः सा। नतं भद्रं च सन्नतमिति। सन्नतांसेति वा पाठः। लीलाञ्चितविक्रमेषु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लीलाचारुपदविक्षेपेषु गतेषु गमनेषु, सा गौरी, राजहंसैः व्यनीयतेव विनीता शिक्षिता, नूनमभूत्। नूपुरशिञ्जितानि आदित्सुभिः ग्रहीतुकामैः, अत एव प्रत्युपदेशलुब्धैः, एकां विद्यां दत्त्वा तत्सकाशाद् विद्यान्तरग्रहणलुब्धैः। नूपुरशब्द-रूपे तत्कार्ये प्रत्युपदेशलुब्धैः गृध्नुभिरिवेति भावः।। ३३ ।।

वृत्तानुपूर्वे च न चातिदीर्घे जङ्घे शुभे सृष्टवतस्तदीये।

शेषाङ्गनिर्माणविधौ विधातुर्लावण्यमुत्पाद्य इवास यत्नः।। ३४ ।।

वृत्तानुपूर्वेति। वृत्तानुपूर्वे वृत्ते वर्तुले सन्निवेशे अनुपूर्वे पूर्वानुरूपे द्वे ये च ये ते। न चातिदीर्घे मध्यमप्रमाणे। शुभे प्रशस्ते। तदीये जङ्घे सृष्टवतो विधातुः शेषाङ्गनिर्माणविधौ लावण्यं ऊरुजघनाद्यङ्गेषु सम्पाद्यं लावण्यं उत्पत्तुं उत्पादयितुं यत्न आसेवाभून्नूनमित्युत्प्रेक्षा। उत्पत्तुमित्यन्तर्भावितण्यर्थोऽयं शब्दः। अन्तर्भावितण्यर्था बहवो महाकविप्रयोगाः सन्ति। प्रशान्तघर्माभिभवः शनैर्विवान् इति भारविकाव्ये(८.२८)।

अथवा गत्यर्थाः ज्ञानार्थाः। पद गतौ इति गत्यर्थो धातुः। शेषाङ्गेषु सम्पाद्यं लावण्यं ज्ञातुं द्रष्टुं यत्नोऽभूदिति केचिदाहुः।

लावण्यं उत्पाद्य इवेति केषाञ्चित् पाठः। तद्वपुर्निर्माणार्थं सम्भृतस्य धर्मस्य जङ्घयोरेव निक्षिप्तत्वात् शेषाङ्गनिर्माणे श्रोणिजघनाद्यङ्गेषूत्पाद्येषु सम्पादनीये लावण्ये यत्न आसेवेति तत्रार्थः।

शेषाङ्गनिर्माणविधौ इतीयमनादरे सप्तमीति दक्षिणावर्तनाथेन व्याख्यातम्। तन्न ग्राह्यम्। षष्ठी चानादरे(पा.सू.२.३.३८) इति सूत्रेणानादराधिके भावलक्षणे सति तस्माद् भावतः षष्ठीसप्तम्यौ विधीयेते। पितरि रुदति रुदतो वा प्राव्राजीत्। रुदन्तं पितरमनादृत्येति व्याख्यातम्। तस्मादिह शेषाङ्गनिर्माण-विधावित्यस्य भावत्वाभावात् भावादनादरे सप्तमी न युक्ता। अधिकरणे सप्तमीति व्याख्येयम्।

ननु अस्तेर्भूरित्यार्धधातुके लिटि अस्तेर्भूवादेशे कृते बभूवेति प्रयोक्तव्यादासेति प्रयोगोऽनुपपन्न इति चेत्,

सत्यमेतद्। अत्र गतिं ब्रूमः। अस गतिदीप्त्यादानेष्विति धातुर्विद्यते। तस्येदं लिटि रूपमासेति। तस्मात् न दोषः। यत्न आस दीप्तोऽभूत्। यत्नः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

समिद्धोऽभूदित्यर्थः। तथा च वामनः (काव्यालङ्कारसूत्रवृत्तिः ५.२.२७) - आसेत्यसतेः लिटि इति।। ३४ ।।

नागेन्द्रहस्तास्त्वचि कर्कशत्वादेकान्तशैत्यात् कदलीविशेषाः।

लब्ध्वापि लोके परिणाहि रूपं जातास्तदूर्वोरुपमानबाह्याः।। ३५ ।।

नागेन्द्रेति। नागेन्द्रहस्ताः महागजकरदण्डाः, परिणाहि परिणाह युक्तं, वर्तुलं विशालं लब्ध्वापि त्वचि कर्कशत्वदोषात् तस्या ऊर्वोरुपमानबाह्याः जाताः, उपमानात् बहिर्भूताः, असदृशाः आसन्। कदळीविशेषा राजरम्भादिमहारम्भास्तम्भा अपि परिणाहिरूपं लब्ध्वापि एकान्तशैत्याद् एकान्तेन नियमेन शीतळत्वात् तदूर्वोरुपमानबाह्या जाताः। अयमभिप्रायः। नागेन्द्रहस्तानां त्वचि कर्कशत्वात् तदूरुसामान्यं नाभूदिति। कदळी-विशेषाणामेकान्तशैत्याद् उष्णकाले शीतळयोः शीतकाले चोष्णयोस्तदूर्वोः सामान्यं नाभूत्। परिणाहिरूपे सामान्यं अभूत्। न गुणेन। ततोऽनुपमं तदूरुयुगळमिति।। ३५ ।।

एतावता नन्वनुमेयशोभि काञ्चीगुणस्थानमनिन्दितायाः।

आरोपितं यद् गिरिशेन पश्चादनन्यनारीकमनीयमङ्कम्।। ३६ ।।

एतावतेति। अनिन्दितायाः सर्वदोषरहितायाः तस्याः काञ्चीगुणस्थानं एतावता अनुमेयशोभम्। ननु काञ्चीगुणो मेखलादाम तिष्ठत्यस्मिन्निति काञ्चीगुणस्थानं श्रोणीबिम्बं एतावता एतावन्मात्रेणैव अनुमेयशोभं अनुमीयमान-सौन्दर्यम्। नन्ववधारणे -

प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु

इत्यमरः(३.४.१०)। एतावतेत्युक्तमेव स्पष्टयति - पश्चाद् बाल्यानन्तरकाले तत् काञ्चीगुणस्थानं गिरिशेन शम्भुना, अनन्यनारीकमनीयं अन्यनारीणां कामयितुमप्ययोग्यं, अङ्कमारोपितमिति यत् अनन्यस्त्रीकमनीयं स्वमङ्कं शम्भुस्तामारोपितवानिति यदेतावता नितम्बस्य शोभा अनुमेया। वर्णयितुं न शक्येत्यर्थः। अनन्यनारीगमनीयमिति केषाञ्चित् पाठः ।। ३६ ।।

तस्याः प्रविष्टा नतनाभिरन्ध्रं रराज तन्वी नवरोमराजिः।

नीवीमतिक्रम्य सितेतरस्य तन्मेखलामध्यमणेरिवार्चिः।। ३७ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तस्या इति। तस्याः देव्याः, नतनाभिरन्ध्रं गम्भीरनाभीकुहरं, प्रविष्टा तन्वी तनीयसी, नवरोमराजिः रराज शुशुभे। तामेतामुत्प्रेक्षते - नीवीमिति।

स्त्रीकटीवस्त्रबन्धेऽपि नीवी परिपणेऽपि च (३.३.२१३)

इत्यमरः। तस्याः कटिवस्त्रबन्धनमतिक्रम्य नतनाभिरन्ध्रं प्रविष्टा सितेतरस्य नीलस्य तन्मेखलामध्यमणेः तदीयरशना मध्यस्थितनायकमणेरर्चिरिव ज्वालेव। अर्चिर्हेतिः शिखा स्त्रियामिति।। ३७ ।।

मध्येन सा वेदिविलग्नमध्या वलित्रयं चारु बभार बाला।
आरोहणार्थं नवयौवनेन कामस्य सोपानमिव प्रयुक्तम्।। ३८ ।।

मध्येनेति। वेदिविलग्नमध्या यज्ञवेदीव दुर्लभं विलग्नं विलीनं अदृश्यम्। अतिसूक्ष्ममित्यर्थः। कृशं मध्यं यस्याः सा। वेदिर्यथा कृशमध्या तथा। वेदिविलग्नमध्येन सा चारु वलीत्रयं बभार। तस्याः मध्ये वलीत्रयं जातमित्यर्थः। तद् इति उत्प्रेक्षते - नवयौवनेन कामस्यारोहणार्थं प्रयुक्तं कल्पितं सोपानमिव।

आरोहणार्थं नवयौवनस्य कामेन सोपानमिव प्रयुक्तम्

इति केषाञ्चित् पाठः। तत्र युक्तिः - कामस्य पूर्वभावित्वात् साधकत्वं, नवयौवनस्य साध्यत्वं च स्यादिति पूर्ववत् पाठः समञ्जसः।। ३८ ।।

तत्र तारुण्यं हि मदनाविर्भावस्य कारणमिति दर्शयति -

अन्योन्यमुत्पीडयदुत्पलाक्ष्याः स्तनद्वयं चारु तथा प्रवृद्धम्।
मध्ये यथा श्याममुखस्य तस्य मृणालसूत्रान्तरमप्यलभ्यम्।। ३९ ।।

अन्योन्यमिति। उत्पलाक्ष्याः तस्याः अन्योन्यं परस्परम्, उत्पीडयत् उत्थाय पीडयत् प्रेरयत् चारु स्तनद्वयं तथा तेन प्रकारेण प्रवृद्धम्, यथा श्याम-मुखस्य तस्य कृष्णचूचुकस्य स्तनद्वयस्य मध्ये मृणालसूत्रान्तरमप्यलभ्यम् बिसतन्तोरप्यवकाशः दुर्लभः स्यात्। तथा संश्लिष्य प्रवृद्धमासीद् इत्यर्थः ।।३९।।

शिरीषमालाधिकसौकुमार्यौ बाहू तदीयाविति मे वितर्कः।
पराजितेनापि कृतौ हरस्य यौ कण्ठपाशौ मकरध्वजेन।। ४० ।।

शिरीषेति। तदीयौ बाहू शिरीषमालाधिकसौकुमार्यौ शिरीषमाला-भ्यधिकं सौकुमार्यं ययोस्तौ। शिरीषकुसुममालाभ्योऽधिकं सुकुमारतराविति मे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वितर्कः ऊहः। पराजितेनापि कामेन मकरध्वजेन यौ हरस्य कण्ठपाशौ कृतौ। वशीकृत्य स्वेच्छयाकर्षणार्थं कण्ठे निक्षिप्तौ पाशौ कण्ठपाशौ। अयमत्राभिप्रायः - कुसुमायुधः कामः सुकुमारैः कुसुमास्त्रै- र्जगद् वशीकरोतीति प्रसिद्धिः। इतरकुसुमेभ्यः शिरीषकुसुमान्यतिसुकुमाराणि। पूर्वमपराजितः कामः शिरीष-कुसुमैरपि शम्भुं वशीकर्तुं न शक्तोऽभूत्। पश्चात् पराजितः शिरीष-मालाधिकसौकुमार्याभ्यां तद्बाहुभ्यामेव कण्ठपाशाभ्यां हरं कण्ठे बद्ध्वा स्ववशमानीतवानित्यर्थः। शिरीषमालाभ्यां असाध्यं कार्यमाभ्यां कृतमिति ताभ्यः सौकुमार्याधिक्यमनयोरनुमीयते। अत्र याविति पदं यदिति हेतुपरं केचिदाचक्षते ।। ४० ।।

कण्ठस्य तस्यास्तनुबन्धुरस्य मुक्ताकलापस्य च निस्तलस्य।
अन्योन्यशोभाजननाद् बभूव साधारणो भूषणभूष्यभावः ।। ४१ ।।

कण्ठस्येति। तनुबन्धुरस्य तनुश्चासौ बन्धुरश्च इति तनुबन्धुरः। श्लक्ष्णं दभ्रं कृशं तनु(३.१.६१) इत्यमरः। बन्धुरौ सुन्दरौ नम्रौ(७.४.२१) इति वैजयन्ती। श्लक्ष्णमनोहरस्येत्यर्थः। निस्तळस्य मुक्ताकलापस्य च। वर्तुलं निस्तलं वृत्तम् (३.१.७०) इति, कलापे भूषणे बर्हे तूणीरे संहतावपि (३.३.१२९) इत्यमरः। मुक्तानां कलापः संहतिर्मौक्तिकमाला, मौक्तिकभूषणं वा। मुक्ताकलापस्तनुबन्धुरस्य तस्याः कण्ठस्य निस्तळस्य मुक्ताकलापस्य चान्योन्यशोभाजननात् परस्परशोभोत्पादनाद् अन्योन्यकान्तिसम्पादकत्वात् द्वयोरपि भूषणभूष्यत्वं समानं आसीत्। जनी प्रादुर्भावे इत्यस्माद् धातोः णिजन्ताल्लटि रूपम्। जननं उत्पादनमित्यर्थः। कण्ठस्य मुक्ताकलापो भूषणमासीत्। मुक्ताकलापस्य च कण्ठो भूषणमासीदिति एकैकस्य भूषणत्वं भूष्यत्वं चासीदित्यभिप्रायः।

अथवा अर्थान्तरं ब्रूमः - अन्य इति पदच्छेदः कार्यः। अन्यशोभाजननात् अपूर्वशोभाप्रादुर्भावात् कण्ठस्य मुक्ताकलापस्य च साधारणो भूषणभूष्यभावः अन्यो बभूवेति योजना। साधारणाद् अन्यः असाधारणोऽभूद् इत्यर्थः।

अयमभिप्रायः - कण्ठस्य भूष्यत्वं मुक्ताकलापस्य भूषणत्वं च सर्व-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लोकसाधारणम्। तथापि इह तयोः समागमेन अनुपमकान्त्युदयाद् अनयोः भूषणत्वं असाधारणं आसीद् इति। अत्र जननं इति जनिधातोर्लिटि रूपम्। जननं प्रादुर्भाव इत्यर्थः। जनुर्जननजन्मानि(१.४.३०) इति अमरः।

अथवा अर्थान्तरम् - अन्योन्यशोभाजननात् तयोर्भूषणभूष्य भावः साधारणो बभूव। अनुरूपोऽभूद् इत्यर्थः। अयमभिप्रायः - भूष्यस्य तादृक्कण्ठस्य सम्बन्धात् मुक्ताकलापस्य भूषणता जाता। मुक्ताकलापस्य भूषणस्य सम्बन्धात् कण्ठस्य शोभाभूदिति मुक्ताकलापस्य भूषणत्वं कण्ठस्य भूष्यत्वं चानुरूपं आसीदिति। अत्र उपकार्योपकारभावस्य द्वयोरप्यभिहितत्वाद् अभिधीयमानानां अयमन्योन्यालङ्कारभेदः।(सरस्वतीकण्ठाभरणम् ३.२७) -

अन्योन्यमुपकारो यस्तदन्योन्यं त्रिधा च तत्।
वाच्यं प्रतीयमानं च तदन्यदुभयात्मकम्।। इति।। ४१ ।।

चन्द्रं गता पद्मगुणान्न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्याम्।
उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां कान्तिमवाप लक्ष्मीः ।। ४२ ।।

चन्द्रमिति। चन्द्रं गता प्राप्ता, पूर्णचन्द्रमण्डले स्थिता। लक्ष्मीः श्रीः। पद्मगुणान् कान्तिसौरभ्याधिकान् पद्मस्य गुणान् न भुङ्क्ते नोपभुङ्क्ते। पद्माश्रिता श्रीश्चान्द्रमसीं चन्द्रसम्बन्धिनीं, अभिख्यां शोभां, नानुभवति। एवं लोला निशि चन्द्राश्रयत्वाद् दिवा च पद्माश्रयत्वात् अव्यवस्थिता सा लक्ष्मीः उमामुखं प्रतिपद्य द्विसंश्रयां कान्तिमवाप। द्वौ पद्मचन्द्रौ संश्रयः आश्रयस्थानं यस्यास्तां पद्मचन्द्राश्रयां, शोभां प्राप। पद्माश्रयां चन्द्राश्रयां च शोभां प्राप्तवतीत्यर्थः। चन्द्रपद्मौ हि श्रियो निवासौ प्रसिद्धौ। तन्मुखं चन्द्रपद्मसमानशोभमासीद् इत्यर्थः। द्विसंश्रयां प्रीतिमिति केषाञ्चित् पाठः। तुशब्दो विशेषवाची।

तु स्याद् विशेषवाक्यालङ्कारहेत्ववधारणे

इति, शोभा कान्तिर्द्युतिश्छविः(अमरः १.३.१७) चेति भोजः।। ४२ ।।

पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम्।
ततोऽनुकुर्याद् विशदस्य तस्यास्ताम्रोष्ठपर्यस्तरुचः स्मितस्य।। ४३ ।।

पुष्पमिति। प्रकरणसामर्थ्याद् अन्यथानुपपत्त्या धवळं गृह्यते। धवळकुसुमं प्रवाळोपहितं किसलयमध्यनिहितं यदि स्याद् अथवा मुक्ताफलं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मौक्तिकं स्फुटविद्रुमस्थं निर्मलविद्रुमरत्नस्योपरि स्थितं यदि स्यात्, ततस्तर्हि ताम्रोष्ठपर्यस्तरुचः लोहिताधरबिम्बपतितकान्तेः विशदस्य सितस्य तस्याः स्मितस्य मन्दहासस्यानुकुर्यात् सदृशं स्यात्। उपमानं भवेद् इत्यभिप्रायः ।

तस्य चानुकरोतीति शब्दाः सादृश्यवाचका इति ।। ४३ ।।

स्वरेण तस्याममृतस्रुतेव प्रजल्पितायामभिजातवाचि।
अप्यन्यपुष्टा प्रतिकूलशब्दा श्रोतुर्वितन्त्रीरिव ताड्यमाना।। ४४ ।।

स्वरेणेति। अमृतस्रुता अमृतस्राविणा इव स्वरेण, अभिजातवाचि मनोहरवाचि। अथवा अभिजाता स्थानप्रयत्नादिगुणगणसंस्कार योगात् सम्यग् उत्पन्ना वाग् यस्याः सा। तथा तस्यां गौर्यां, प्रजल्पितायां जल्पितुमारब्धायां सत्यां, ताड्यमाना वितन्त्रीरिव अन्यपुष्टा अपि श्रोतुः प्रतिकूलशब्दा अभूद् इत्यन्वयः। अवितृस्तॄतन्त्रिभ्य इः(उणादि ४३८) इति प्रत्ययः। तन्त्री कुटुम्बधारण इति धातोः अप्रत्यये कृते तन्त्रीरिति रूपम्। अस्मात् विस्रस्ता विगतस्वरा तन्त्री वितन्त्रीः। प्रादिसमासः। शास्त्रानभिज्ञैः डिण्डिमादिवत् ताड्यमाना श्लथा वीणातन्त्री यथा श्रोतुरुद्वेगकारिणी भवति तद्वत् कोकिलवागपि मधुरतद्वचनश्रवणजनित हर्षाणां श्रोतॄणामुद्वेगकारिस्वरा जाता। कोकिलशब्देभ्योऽपि तद्वचनानि श्रवणानन्दकराण्यासन् इति भावः।। ४४ ।।

प्रवातनीलोत्पलनिर्विशेषमधीरविप्रेक्षितमायताक्ष्या।
तया गृहीतं नु मृगाङ्गनाभ्यस्ततो गृहीतं नु मृगाङ्गनाभिः।। ४५ ।।

प्रवातेति। प्रवाते प्रबले वायौ वाति सति यन्नीलोत्पलं तस्मिन् निर्विशेषं भेदरहितम्। तत्समानमित्यर्थः। अधीरविप्रेक्षितम्, अधीरं कातरं, विप्रेक्षितं विलोकितं, आयताक्ष्या तया मृगाङ्गनाभ्यो गृहीतं नु, मृगाङ्गनाभिः तस्याः सकाशाद् गृहीतं स्वीकृतं नु। तयोः समत्वाद् इत्थं कविना वितर्कः क्रियते। अत्र निश्चयाभावात् सन्देहान्तरास्थोऽयं वितर्कालङ्कारः(सरस्वती. ३.३९) -

ऊहो वितर्कः सन्देहो निर्णयान्तरधिष्ठितः
द्विधासौ निर्णयान्तश्चानिर्णयान्तश्च कीर्त्यते।। इति।

प्रलोकितविलोकितयोः पृथक्त्वं भोजराजेनोक्तम् -

दर्शनानि वरस्त्रीणां प्रलोकितविलोकिते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उल्लोकितानुवृत्ते च तथान्यदवलोकितम् इति।। ४५ ।।

तस्याः शलाकाञ्जननिर्मितेव कान्तिर्भ्रुवोरानतलेखयोर्या।
तां वीक्ष्य लीलाचतुरामनङ्गः स्वचापसौन्दर्यमदं मुमोच।। ४६ ।।

तस्या इति। शलाकाञ्जननिर्मितेव शलाकाग्रस्थिताञ्जनलिखितेव आनतरेखयोः कुटिललोमयोः द्विदलयोस्तस्याः भ्रुवोः या कान्तिः आसीत्, लीलाचतुरां तां वीक्ष्यानङ्गः कामः, स्वचापसौन्दर्यमदं मुमोच त्यक्तवान्। आनत्यवस्थानादिसौन्दर्यं स्वचापस्यास्तीति या मतिरासीत्, तां लीलाचतुरां तद्भ्रूकान्तिदर्शनात् कामस्त्यक्तवान्। तत्र तस्य असन्तुष्टिरभूत्। लीलाचतुरत्वादिगुणैस्तद्भ्रूयुगं कामचापाद् अतिविशिष्टमासीद् इत्यभिप्रायः। स्वचापसौन्दर्यमुदं इति केषाञ्चित् पाठः। स्वचापसौन्दर्यगर्वमित्यर्थः ।। ४६ ।।

लज्जा तिरश्चां यदि चेतसि स्याद् असंशयं पर्वतराजपुत्र्याः।
तं केशपाशं प्रसमीक्ष्य कुर्युः बालप्रियत्वं शिथिलं चमर्यः।। ४७ ।।

लज्जेति। तिरश्चां तिर्यग्योनिजातानां मृगादीनां चेतसि लज्जा यदि स्यात् तर्हि चमर्यः पर्वतराजपुत्र्याः केशपाशं प्रसमीक्ष्य असंशयं संशयाभावेन बालप्रियत्वं शिथिलं कुर्युः। स्वबालप्रीतिं शिथिलां स्वल्पां कुर्युः। चमरीबालभारादपि तस्याः केशपाशो विशिष्टसौन्दर्य आसीद् इत्यभिप्रायः। एते सर्वे उपमाया उक्तिभेदाः।। ४७ ।।

एवं प्रत्येकमङ्गानि वर्णयित्वा अथ सामान्येन तच्छरीरं वर्णयति -

सर्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिवेशितेन।
सा निर्मिता विश्वसृजा प्रयत्नाद् एकस्थसौन्दर्यदिदृक्षयेव।। ४८ ।।

सर्वेति। सर्वेषामुपमाद्रव्याणां स्थलारविन्दादीनां, समुच्चयेन समाहारेण, यथाप्रदेशं यथास्थानं, विनिवेशितेन पदस्थाने स्थलारविन्देन, गमनस्थाने राजहंसेन, ऊरुस्थाने कदळीस्तम्भेन, उचितस्थाने निवेशितेन, उपमाद्रव्यराशिना सा देवी, विश्वसृजा विधात्रा, एकस्थसौन्दर्यदिदृक्षयेव पृथगुत्पन्नसौन्दर्याणां तेषां सङ्घटनाद् एकस्थसौन्दर्यदर्शनेच्छया नूनं प्रयत्नानीतानि विप्रकीर्णान्युपमाद्रव्याणि प्रयत्नादेकीकृत्य तेषामेकस्थानावस्थितसौन्दर्यदर्शनेच्छया नूनं नीतवान् धाता इत्युत्प्रेक्षा।। ४८ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तस्याः शिवपरिचर्यादिप्रयत्नस्य निमित्तं नारदोपदेशमाह -

तां नारदः कामचरः कदाचित् कन्यां किल प्रेक्ष्य पितुः समीपे।
समादिदेशैकवधूं भवित्रीं प्रेम्णा शरीरार्धहरां हरस्य।। ४९ ।।

तामिति। ततः कदाचित् एवम्भूतां तां गौरीं, पितुः समीपे प्रेक्ष्य दृष्ट्वा, स्वेच्छया लोकेषु विचरन् नारदो मुनिः तां प्रेम्णा शरीरार्धहरां शिवस्य शरीरार्धहारिणीं, हरस्यैकवधूं शिवस्य मुख्यपत्नीं, भवित्रीं भाविनीं, समादिदेश किल आदिष्टवान् । किलेति वार्तायाम् । शरीरस्यार्धं शरीरार्धमिति षष्ठीसमासः। तस्मादर्धशब्देन समप्रविभागविवक्षया अर्धं नपुंसकम्(पा.सू.२.२.२) इति पूर्व-निपाताभावः। एका मुख्या असपत्नी केवलवधूः। मुख्यान्यकेवलेष्वेक इति शाश्वतः (४१९) ।। ४९ ।।

गुरुः प्रगल्भेऽपि वयस्यतोऽस्यास्तस्थौ निवृत्तान्यवराभिलाषः।
ऋते कृशानोर्न हि मन्त्रपूतमर्हन्ति तेजांस्यपराणि हव्यम्।। ५०।।

गुरुरिति। गुरुः अस्याः पिता हिमवान् अतो नारदोपदेशात्, अस्याः प्रगल्भे वयस्यपि यौवने सुपूर्णेऽपि, निवृत्तान्यवराभिलाषस्तस्थौ इति। अन्यस्मिन् वरे अभिलाषो निवृत्तो यस्य स तथा। अन्यवराभिलाषरहितः स्थितवान्। तथा हि। कृशानौ सुदीप्ते पावके पुरस्तात् स्थिते सति, अपराणि सूर्यादीनि तेजांसि, मंत्रपूतं हव्यं नार्हन्ति। हि यस्मात्, तस्माद् आचारपूतां गौरीं रुद्रायैव दास्यामीति, अतोऽन्यो वरो नार्हतीत्यपराभिलाषं अपहाय रुद्रे स्थिराभिलाषः स्थिरं स्थितवान् इत्यर्थः।। ५० ।।

यद्येवमद्रिः शिवाय सुतां प्रदातुं स्थिराभिलाषस्तर्हि किमर्थं शिवमभ्यर्थ्य तां न दत्तवानित्याह -

अयाचितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाक।
अभ्यर्थनाभङ्गभयेन मानी माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे।। ५१ ।।

अयाचितारमिति। अयाचितारं अप्रार्थयितारं देवं, अद्रिः सुतां प्रतिग्राहयितुं स्वीकारयितुं न शशाक। न शक्तोऽभूद् इत्यर्थः।

पत्नीस्वीकारशपथमूल्येष्वपि परिग्रहः(८.१.३०) इति वैजयन्ती।

नन्वत्र कर्मसंज्ञाविधानाभावाद् देवदेवमिति द्वितीया कथं स्यादिति चेद्,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अत्र गतिं ब्रूमः। धातूनामनेकार्थत्वात् प्रतिपूर्वो ग्राहिरत्र गत्यर्थो ग्राह्यः। तथा सति गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणां अणिकर्ता सणौ(पा.सू.१.४.५२) इति सकर्मकत्वाद् द्वितीया। अस्मिन्नर्थेऽन्वयभेदोऽप्यस्ति। अद्रिस्तां देवं प्रतिग्राहयितुं देवं गमयितुं न शशाक। देवेन सङ्गमयितुं नाशक्नोदित्यर्थः। हि यस्माद् मानी पुरुषः अभ्यर्थनाभङ्गभयेन इष्टेऽप्यर्थे माध्यस्थ्यमवलम्बते। प्रार्थनाया भङ्गो भवेदिति भयेन इष्टमप्यर्थं परं प्रति न याचते। अभिमतेऽपि प्रयोजने मध्यस्थो भवतीत्यर्थः।

अभ्यर्थनाभङ्गभयान्मनस्वीति केषाञ्चित् पाठः।। ५१ ।।

एवमुमाया जन्मादि यौवननिष्पत्तिपर्यन्तं वर्णयित्वा शिवस्यापि सतीकळत्रभङ्गानन्तरं व्यापारमाह -

यदैव पूर्वे जनने शरीरं सा दक्षरोषात्तु सती ससर्ज।

तदा प्रभृत्येव विमुक्तसङ्गः पतिः पशूनामपरिग्रहोऽभूत्।। ५२ ।।

यदैवेति। पूर्वे जनने पूर्वस्मिन् जन्मनि, यदा यस्मिन् काले, सा सती, दक्षरोषाच्छरीरं ससर्ज त्यक्तवती। तुशब्दोऽवधारणे। दक्षरोषादेवेत्यर्थः। सुदतीपाठोऽस्ति शोभनः। सुदती चारुदन्तेत्यर्थः। तदा प्रभृत्येव ततः प्रारभ्य, विमुक्तसङ्गः त्यक्तविषयासङ्गः, पशूनां पतिः शम्भुः, अपरिग्रहोऽभूत् अपत्नीकोऽभूत्। प्रेम्णा ब्रह्मचर्यमेव चचारेत्यर्थः। पत्नीपरिजनादानमूलशापाः परिग्रहाः(३.३.२३८) इत्यमरः।। ५२ ।।

स कृत्तिवासास्तपसे यतात्मा गङ्गाप्रपातोत्थितदेवदारु।

प्रस्थं हिमाद्रेर्मृगनाभिगन्धि किञ्चित्क्वणत्किन्नरमध्युवास।। ५३ ।।

स इति। कृत्तिवासाः कृत्तिर्गजचर्म वासो यस्य स शम्भुः, यतात्मा जितेन्द्रियः सन्, तपसे तपश्चर्यार्थं, हिमाद्रेः प्रस्थं सानुदेशं अध्युवास। सानुं गत्वा तस्मिन् निवासं अकरोद् इत्यर्थः। प्रस्थविशेषणमाह - गङ्गाप्रपातोत्थितदेवदारु गङ्गाप्रपाताद् उत्थिता ह्रदमूला देवदारवो यत्र। अथवा गङ्गाप्रपातेन सलिलासक्तमूलत्वाद् उत्थिता उन्नता देवदारवो यत्रेति। प्रपातोक्षितेति पाठः। उक्षिताः शीकराः सिक्ताः इति। मृगनाभिगन्धि मृगनाभिः मृगमदः कस्तूरिका-गन्धो यस्यास्तीति। तद्गन्धयुक्तं इत्यर्थः। किञ्चित्क्वणत्किन्नरम्। किञ्चिद् अल्पं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्वणन्तः किन्नरा यत्र विद्यन्ते। शिवतपोभङ्गभयाद् ईषद् गायत् किन्नरमिथुनमित्यर्थः। पुन्नपुंसकयोः प्रस्थम् इत्यमरः(३.३.८८)।। ५३ ।।

गणा नमेरुप्रसवावतंसा भूर्जत्वचः स्पर्शवतीर्वसानाः।
मनःशिलाविच्छुरिता निषेदुः शैलेयगन्धेषु शिलातलेषु।। ५४ ।।

गणा इति। नमेरुप्रसवावतंसाः। नमेरुः सुरपुन्नागः। नमेरूणां वृक्षाणां, प्रसवैः कुसुमैः, कल्पितावतंसाः स्पर्शवती मृदुः भूर्जत्वचो वसानाः परिदधानाः मनश्शिलाविच्छुरिताः मनश्शिलाख्येन धातुना विच्छुरिताः मिश्रिताः अनुलिप्ताः। एवम्भूता गणाः शम्भोः परिवाराः पार्षदाः, शैलेयगन्धेषु शिलातलेषु निषेदुः उपविविशुः। शैलेयं शिलाजतु, शिलाकुसुमं वा। शिलाजतु च शैलेयमिति वैजयन्ती(३.२.१६)।। ५४ ।।

तुषारसङ्घातशिलाः खुराग्रैः समुल्लिखन् दर्पकलः ककुद्मान्।
दृष्टः कथञ्चिद् गवयैर्विविग्नैरसोढसिंहध्वनिरुन्ननाद।। ५५ ।।

तुषारेति। तुषारसङ्घातशिलाः खुराग्रैः समुल्लिखन् अवदारयन् विष्किरमाणः दर्पकळः मदमधुरः विविग्नैः भीतैः। ओवीजी भयचलनयोः इति धातोः। विलग्नैरिति वा पाठः। भयान्निलीनैर्गवयैर्मृगविशेषैः, कथञ्चिद् दृष्टः असोढसिंहध्वनिः केसरिणां नादमप्यसहमानः। एवम्भूतः ककुद्मान् हरवृषभ उन्ननाद जगर्ज इदं वृषभस्य स्वभावाख्यानम्।। ५५ ।।

तत्राग्निमाधाय समित्समिद्धं स्वमेव मूर्त्यन्तरमष्टमूर्तिः।
स्वयं विधाता तपसः फलानां केनापि कामेन तपश्चचार।। ५६ ।।

तत्रेति। तत्र हिमगिरिसानौ, अष्टमूर्तिः शिवः, स्वमेव मूर्त्यन्तरं

भूमिरापोऽनलो वायुर्व्योम चात्मा रविः शशी।
इत्यष्टौ सर्वलोकानां प्रत्यक्षाः शिवमूर्तयः।।(लिङ्गपुराणम् १२)

इत्यग्नेरपि शिवमूर्तित्वात् स्वमेव मूर्तिविशेषं समित्समिद्धं समित्प्रदीप्तं अग्निमाधाय केनापि कामेन तपश्चचार अन्येषां तपसां फलानां स्वयं विधाताप्यनिर्देश्येन कामेन तपश्चचार। अन्येषां तपःफलानां स्वयं विधातापि केनाप्यनिर्देश्येन कामेन तपश्चचार। तपसा लब्धव्यस्याभावात् यत्किञ्चित् फलमभिसन्धाय तपः कृतवान् इत्यर्थः।। ५६ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अनर्घ्यमर्घ्येण तमद्रिनाथः स्वर्गौकसामर्चितमर्चयित्वा।

आराधनायास्य सखीसमेतां समादिदेश प्रयतां तनूजाम्।। ५७ ।।

अनर्घ्यमिति। अनर्घ्यं परमार्थतः पूजाविधेरप्यगोचरम्। मूल्ये पूजाविधावर्घ्य इत्यमरः(३.३.२७)। अनर्घममूल्यमिति वा। अपरिच्छेद्यं इत्यर्थः। अथवा अनर्घं पूजाविधेरकर्तारम्। अन्यैः पूज्यमानमेव, अन्येषां अपूजकमित्यभिप्रायः। अत एवोक्तं स्वर्गेति। देवैराराध्यमानम्। अत्र स्वर्गौकसां अर्चितमिति मतिबुद्धिपूजार्थेभ्यश्च(पा.सू.३.२.१८८) इति वर्तमाने क्तः। क्तस्य च वर्तमाने(पा.सू.२.३.६७) इति कर्तरि षष्ठी। एवम्भूतं शिवं अर्घ्येण अर्चयित्वा अद्रिनाथः अस्य शिवस्याराधनाय सखीसमेतां प्रयतां शुद्धां तनूजां समादिदेश। तस्याराधना त्वया क्रियतामिति पुत्रीमाज्ञापितवान्।। ५७ ।।

प्रत्यर्थिभूतामपि तां समाधेः शुश्रूषमाणां गिरिशोऽनुमेने।

विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः।। ५८ ।।

प्रत्यर्थिभूतामिति। गिरीशः समाधेः तपसः, प्रत्यर्थिभूतां विरोधिभूतां अपि, शुश्रूषमाणां आराधयन्तीं, अनुमेने अनुज्ञातवान्। ननु तपसः प्रत्यर्थिभूतां तां किमर्थमनुमेन इत्याशङ्क्याह - विकारहेतौ मनोविकारहेतौ सति, येषां चेतांसि न विक्रियन्ते विकारहेतुभिः विक्रियां न नीयन्ते, त एव पुरुषा धीरा धैर्यवन्तः। स्थिरचित्ता इत्यर्थः।

अथवा धियमीरयन्ति विषयेन्द्रियेभ्यो निवर्तयन्तीति धीराः। धूतात्मान इत्यर्थः। विक्रियन्त इति कर्मणि यङ्। केचित्तु कर्मकर्तरि रूपमित्याहुः। न विक्रियन्ते स्वयमेव विक्रियां नापद्यन्त इति। आत्मनो धीरत्वप्रकाशनार्थं तामनुमेन इत्यभिप्रायः।। ५८ ।।

अवचितबलिपुष्पा वेदिसंमार्गदक्षा

नियमविधिजलानां बर्हिषां चोपनेत्री।

गिरिशमुपचचार प्रत्यहं सा सुकेशी

नियमितपरिखेदा तच्छिरश्चन्द्रपादैः।। ५९ ।।

अवचितेति। अवचितबलिपुष्पा। बल्यानि पुष्पाणि बलिपुष्पाणि, अवचितानि लूनानि बलिपुष्पाणि यया। बल्यर्थं पुष्पावचयं कृतवतीत्यर्थः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वेदिसम्मार्गदक्षा। वेदिः शिवाश्रयवेदिका, तस्याः सम्मार्जनदक्षा निपुणा। नियमविधिजलानाम्।

यमाः स्युर्नियमाः शौचसन्तोषतपआदयः

(वैजयन्ती ३.६.२०९) इति। नियमविधये शौचादिकार्याय, यानि जलानि, तेषां बर्हिषां च उपनेत्री। नियमविधिजलानि दर्भांश्चाहृत्य समीपे स्थापयन्तीत्यर्थः। तच्छिरश्चन्द्रपादैः शिवमौलीन्दुकिरणैः, नियमितपरिखेदा परिहृतपुष्पावचया-दिश्रमा। एवम्भूता सा सुकेशी प्रत्यहं गिरिशमुपचचार, एवमाराधयामास। सर्गान्ते भूतिवृत्तस्य प्रयोक्तव्यत्वात् इदं मालिनीवृत्तं प्रयुक्तम्।। ५९ ।।

कुमारसम्भवस्येत्थमाद्यं व्याचष्ट तुष्टधीः।
सर्गं निसर्गमधुरं विद्यामाधवपण्डितः।।

इति विद्यामाधवीये कुमारसम्भवव्याख्याने प्रथमः सर्गः।। श्रीः।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वितीयः सर्गः

ब्रह्मदेवतासंलापः

अथ वक्ष्यमाणायाः कामाभिगमनतद्दहनादिकथायाः प्रथमकारणभूतं देवानां ब्रह्मलोकगमनादिकं वक्तुमुपक्रमते तस्मिन् इत्यादि -

तस्मिन् विप्रकृताः काले तारकेण दिवौकसः।

तुराषाहं पुरोधाय धाम स्वायम्भुवं ययुः।। १ ।।

तस्मिन् इति। तस्मिन् काले, तारकेण तारकाख्येन असुरेण, विप्रकृताः विरोधिताः बाधिताः, दिवौकसो देवाः, तुराषाहं इन्द्रं, पुरोधाय पुरस्कृत्य, स्वायम्भुवं धाम गृहं, ययुः प्राप्तवन्तः। स्वयम्भूः ब्रह्मा। स्वयम्भुव इदम् - स्वायम्भुवम्। संज्ञापूर्वको विधिरनित्य इति आद् गुणः (पा.सू.६.१.८७) इति प्राप्तस्य गुणस्याभावः। धाम तेजस्सदनयोरिति भोजः। तुरासाहमिति केषाञ्चित् पाठः। तुराषाट् छान्दसोऽपि भाषायामपि प्रयुज्यते। तुराषाण्मेघवाहनः (१.१.४४) इत्यमरः। तुरया त्वरया सहयत्यभिभवति अरातीनिति। षह मर्षण इति धातोर्णिचि क्विप् ।। १ ।।

तेषामाविरभूद् ब्रह्मा परिम्लानमुखश्रियाम्।

सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव।। २ ।।

तेषामिति। रिपुबाधया परिम्लानमुखश्रियां तेषां देवानां ब्रह्मा आविरभूत् प्रत्यक्षोऽभूत्। सुप्तपद्मानां सरसां प्रातर्दीधितिमानिव रविः यथाऽऽविर्भवति तद्वत् ।। २ ।।

अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम्।

वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे।। ३ ।।

अथेति। अथ ते सर्वे देवाः, सर्वस्य विश्वस्य, धातारं स्रष्टारं गोप्तारं वा, सर्वतोमुखं चतुर्मुखं, वागीशं वाचां वेदादीनां, ईशं प्रणयनाद् ईश्वरं, वाचः सरस्वत्याः पतिमिति वा। एवम्भूतं ब्रह्माणं प्रणिपत्य इष्टाभिः प्रियाभिः, वाग्भिः उपतस्थिरे इति। ब्रह्माणं देवाः ऋग्भिस्तुष्टुविरे। उपतस्थिरे इति उपान्मन्त्रकरणे (पा.सू. १.३.२५) इत्यात्मनेपदम्। उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वक्तव्यम्(वार्तिकम् २.२.१८) इति वा। तत्र देवपूजायां वाग्भिराराधयामासुः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इत्यर्थः। अर्थ्याभिरिति वा पाठः। अर्थाद् अनपेताभिरर्थयुक्ताभिरित्यर्थः।। ३ ।।

तां स्तुतिमेव दर्शयति -

नमस्त्रिमूर्तये तुभ्यं प्राक् सृष्टेः केवलात्मने।

गुणत्रयविभागाय पश्चाद् भेदमुपेयुषे।। ४ ।।

नमस्त्रिमूर्तय इत्यादि। सृष्टेः सर्गात्, प्राक् पूर्वं, केवलात्मने अभिन्नरूपाय एकात्मने, तुभ्यं नमः। ततः पश्चाद्, गुणत्रयविभागाय गुणत्रयेण सत्त्वरजस्तमोलक्षणेन विभागो यस्य स तथोक्तः।

अथवा गुणत्रयस्य विभागाय भेदमुपेयुषे प्राप्ताय, त्रिमूर्तये ब्रह्मविष्णुरुद्रस्वरूपाय, तुभ्यं नमः।

नमोऽस्त्वमूर्तये इति केषाञ्चित् पाठः । सृष्टेः प्रागेवामूर्तये शरीररहिताय तेजोरूपाय तुभ्यं नमोऽस्तु। पश्चात् गुणत्रयविभागाय भेदं भेदत्रयं ब्रह्मादित्रैरूप्यं, उपेयुषे प्राप्ताय, तुभ्यं नम इति। अयमेवार्थो वक्ष्यते (७.४४) -

एकैव मूर्तिर्बिभिदे त्रिधा सा सामान्यमेषां प्रथमावरत्वम् इति।

मूर्तीनां गुणभेदवत्त्वं वेदान्ते दर्शितम् (पञ्चपादिकामङ्गलपद्यम्) -

पालने विमलसत्त्ववृत्तये जन्मकर्मणि रजोजुषे लये।

तामसाय जगतः पराकृतद्वैतजालवपुषे नमः सते।। इति।। ४ ।।

यदमोघमपामन्तरुप्तं बीजमज त्वया।

अतश्चराचरं विश्वं प्रभवस्तस्य गीयसे।। ५ ।।

यदिति। हे अज, त्वया अमोघमवन्ध्यं कार्योत्पादनक्षमं, यद् बीजं वीर्यं, अपामन्तः जलमध्ये, उप्तं निक्षिप्तम्। अतो बीजात्, चराचरं जङ्गम-स्थावरात्मकं, विश्वं जगद्, उत्पन्नमिति शेषः। अत एव त्वं तस्य विश्वस्य, प्रभवः कारणं, गीयसे महर्षिभिः कथ्यसे। एतदुक्तं (स्कन्द) पुराणे (४.३१.३९. मनु. १.८-९) -

हिरण्यगर्भो भगवान् सिसृक्षुर्विविधाः प्रजाः।

अप एव ससर्जादौ तासु वीर्यमवासृजत्।।

तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।

तस्मादण्डात् समुत्पन्नं जगत् स्थावरजङ्गमम्।। इति।। ५ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन्।

प्रलयस्थितिसर्गाणामेकः कारणतां गतः।। ६ ।।

तिसृभिरिति। रुद्रविष्णुब्रह्मरूपाभिः तिसृभिः अवस्थाभिः तवरूपस्थिताभिः महिमानं माहात्म्यं, उदीरयन् कथयन् प्रकाशयन्, त्वमेक एव प्रलयस्थितिसर्गाणां कारणतां गतोऽसि प्राप्तोऽसि। पश्चाद्भेदमुपेयुषे(श्लो. ४) इत्यस्य चेदं विवरणम्।। ६ ।।

एवं मूर्तिमुक्त्वाथ मिथुनत्वेन ब्रह्मणः सृष्टिमाचष्टे -

स्त्रीपुंसावात्मभागौ ते भिन्नमूर्तेः सिसृक्षया।

प्रसूतिभाजः सर्गस्य तावेव पितरौ स्मृतौ।। ७ ।।

स्त्रीपुंसाविति। स्त्री च पुमांश्च स्त्रीपुंसौ। अचतुरविचतुरसुचतुरस्त्री पुंसेत्यादिना(पा.सू.५.४.७७) निपातनात् समासान्तः। स्त्रीपुंसौ प्रकृति पुरुषौ। सिसृक्षया स्रष्टुमिच्छया, भिन्नमूर्तेस्तावात्मभागौ आत्मनः अंशौ, प्रसूतिभाजः दम्पतिभावेन जन्मभाजः, सर्वस्य जगतस्तौ स्त्रीपुंसावेव पितरौ मातापितरौ स्मृतौ। मुनिभिरिति शेषः। पितराविति पिता मात्रा (पा.सू.१.२.७०) इति पितृशब्दस्य एकशेषः। अत्र (शिव)पुराणम् (उमासंहिता ५.२९.२४, ब्रह्मपुराणम् १.५२, द्र. मनु. १.२२) -

विधातुश्चात्मनो देहमर्धेन पुरुषोऽभवत्।

अर्धेन नारी तस्यां स ससृजे विविधाः प्रजाः।। इति।। ७ ।।

स्वकालपरिणामेन व्यस्तरात्रिन्दिवस्य ते।

यौ तु स्वप्नावबोधौ तौ भूतानां प्रलयोदयौ।। ८ ।।

स्वकालेति। स्वकालपरिणामेन आत्मीयकालस्य परिणामेन परिसमाप्त्या, चतुर्युगसहस्रसमाप्त्या, व्यक्तरात्रिन्दिवस्य व्यस्तं विभक्तं रात्रिन्दिवं अहोरात्रं यस्य। स्वकालपरिमाणेनेति वा पाठः। स्वकाल परिमाणेन युगसहस्रसङ्ख्यया व्यस्ताहोरात्रस्येत्यर्थः।

सहस्रयुगपर्यन्तमहर्यद् ब्रह्मणो विदुः।

रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः।।(८.१७)

इति भगवद्गीतायां अहोरात्रप्रमाणमुक्तम्। एवम्भूतस्य ते तव, स्वप्नबोधौ तावेव

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भूतानां प्रलयोदयौ विनाशाविर्भावौ। रात्र्यागमे स्वप्ने भूतानां प्रलयः। अहरागमे प्रबोधे सति लोकानामुत्पत्तिरित्यभिप्रायः। एतदुक्तं (स्कन्द)पुराणे (४.८.९४) -

यदा स देवो जागर्ति तदेदं चेष्टते जगत्।
यदा स्वपिति शान्तात्मा तदा सर्वं प्रलीयते।। इति।

रात्रिन्दिवशब्दस्तु अचतुर(पा.सू.५.४.७७) इत्यादिना सूत्रेण निपातितः इति।। ८ ।।

जगद्योनिरयोनिस्त्वं जगदीशो ह्यनीश्वरः।
जगदादिरनादिस्त्वं जगदन्तो निरन्तकः।। ९ ।।

जगदिति। त्वं जगद्योनिः जगतां योनिः कारणमसि। अनेन ब्रह्मणो जगदुपादानकारणत्वमुक्तम्। अयोनित्वात् कारणभूतस्यान्यस्य अविद्यमानत्वात् त्वं जगदीशः जगतामीश्वरः। त्वं निरीश्वरः ईश्वररहितः। तव सृष्टिस्थिति-प्रलयानां ईश्वरस्यास्याविद्यमानत्वाद्। त्वं जगदादिः जगतः आदिः। जगदुत्पत्तेः पूर्वमपि सत्त्वात्। त्वमनादिः आदिरहितः, तव नित्यत्वात्। त्वदादेरस्यासत्त्वात्। त्वं जगदन्तः जगतामन्तः संहर्ता। त्वं निरन्तकः, त्वत्संहारस्यासत्त्वात्। अनन्तो जगदन्तक इति वा पाठः ।। ९ ।।

आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना।
आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे।। १० ।।

आत्मानमिति। आत्मा त्वं आत्मानं आत्मना वेत्सि। स्वयमेवात्मरूपं जानासि। त्वत्स्वरूपवेत्ता अन्यः कश्चिदपि नास्तीत्यर्थः। अथवा आत्मरूपेण ज्ञानेनेत्यर्थः। त्वं आत्मना आत्मानं सृजसि। आत्मरूपैरेव महदहङ्कारादिभिः आत्मरूपं अव्यक्तं इदं विश्वं सृजसि। सृष्टिकाले त्वदन्यस्य सहायस्य अविद्यमानत्वात्। व्यक्तस्यात्मरूपत्वं उक्तं (विष्णु)पुराणे (१.२.१६) -

प्रधानपुरुषव्यक्तकालाख्यानि महात्मनः।
तस्य रूपाणि चत्वारि तत् परं धाम पञ्चमम्।। इति।

कृतिना कृतकृत्येन आत्मना जीवरूपेण व्यक्तरूपत्वं अव्यक्ताख्ये स्वात्मन्येव प्रलयं यासीत्यर्थः।

रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके (गीता ८.१८) इति।। १० ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्रवः सङ्घातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः।
व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु।। ११ ।।

(अस्य श्लोकस्य व्याख्या न दृश्यते।)

उद्धातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम्।
कर्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिराम्।। १२ ।।

उद्धात इति। यासां गिरां, प्रणवः ॐकारः, उद्धातः आरम्भः। आदौ प्रणवमुच्चार्य वेदाध्ययनं क्रियते। यासां त्रिभिर्न्यायैः व्यवस्थाभिः, उदीरणं अध्ययनम्। पादबन्धोपेता ऋचः। अपादबद्धानि यजूंषि। गानोपेतानि सामानीति त्रयो न्यायाः। संहितापदक्रमाख्या वा। संहिता- ब्राह्मणोपनिषदाख्या वा। उदात्तानुदात्तस्वरिताख्या वा। एतैस्त्रिभिर्न्यायैः यासां समुच्चारणं क्रियते। यासां कर्म यत्सम्बन्धिकर्म यज्ञः। यासां फलं स्वर्गः। तासां गिरां वेदवाक्यानां, त्वं प्रभवः उत्पत्तिस्थानम्। तन्मुखाद् वेदा उत्पन्ना इत्यर्थः। स्यादारम्भणमुद्धात इत्यमरः(३.२.२६)। उद्गीथ इति केषाञ्चित् पाठः। उद्गीथ इति कर्म स्यात् ते प्रारम्भसमापका इति च ब्राह्मणम् ।। १२ ।।

प्रकृतिपुरुषात्मकमाचष्टे -

त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्तिनीम्।
तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः।। १३ ।।

त्वामिति। पुरुषार्थप्रवर्तिनीम्। पुरुषस्यात्मनोऽर्थेषु प्रवर्तत इति पुरुषार्थप्रवर्तिनी। पुरुषस्य भोगापवर्गादिसिद्ध्यर्था हि सर्वा प्रकृतेः प्रवृत्तिः। अथवा पुरुषार्थान् आत्मनो भोगान् प्रवर्तयतीति पुरुषार्थप्रवर्तिनी। णिचि कर्तरि ल्युट्। बुद्धेर्भोग इवात्मनि(२.५९) इति माघेनोक्तम्। एवम्भूतां प्रकृतिं मूलप्रकृतिं प्रधानं त्वामामनन्ति। त्वद्रूपमित्याचक्षते। साङ्ख्यविदो मुनय इति शेषः। प्रधानं प्रकृतिः स्त्रियाम्(१.४.२९) इत्यमरः। पुरुषस्य भोगापवर्गार्थमेव प्रकृतेः प्रवृत्तिः इति साङ्ख्यैरुक्तम् (साङ्ख्यकारिका ५९) -

रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् ।
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः ।।

इति दर्शितम्। तस्याः प्रकृतेः द्रष्टारं उदासीनं कूटस्थं समस्तकर्तारं पुरुषं त्वामेव

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विदुः। क्षेत्रज्ञमपि त्वद्रूपमेव वदन्ति। मुनय इति शेषः। क्षेत्रज्ञ आत्मा पुरुषः (१.४.२९) इत्यमरः। पुरुषस्य दर्शनसामर्थ्यादेव हि प्रकृतिः प्रवर्तते। यथोक्तं भगवता(गीता ९.१०) - मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्। इति।। १३ ।।

सर्वेभ्योऽपि ब्रह्मणो वैशिष्ट्यमाह -

त्वं पितॄणामपि पिता देवानामपि देवता।
परतोऽपि परश्चासि विधाता वेधसामपि।। १४ ।।

त्वमिति। पितॄणामपि पितृगणानामपि, त्वं पिता जनयितासि। देवानामपि त्वं देवता। आराध्यं दैवतमसीत्यर्थः। त्वं परतोऽपि परोऽसि, सूक्ष्मादपि सूक्ष्मोऽसि। महतोऽपि महीयानसीति वा। अणोरणीयान् महतो महीयानिति श्रुतिः (कठोपनिषत् २.२० महानारायणोपनिषत् १०)। अथवा (गीता ३.४२) -

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः।। इति।
मनसः परमव्यक्तमव्यक्तात् पुरुषः परः।(कठ.१.३.११) इति।

त्वं वेधसां मरीच्यादीनां प्रजापतीनामपि विधाता स्रष्टासीति। सर्वत्रापि न त्वदधिक इत्यभिप्रायः।। १४ ।।

कर्ममार्गे होतृहव्यादीनां, ज्ञानमार्गे ज्ञातृज्ञेयादीनां च तत्त्वतो भेदाभावात् ब्रह्मैकत्वं दर्शयति -

त्वमेव हव्यं होता च भोज्यं भोक्ता च शाश्वतः।
वेद्यं च वेदिता चासि ध्याता ध्येयं च तत् परम्।। १५ ।।

त्वमेव हव्यमित्यादि। हव्यं हविः। होता च त्वमेवासि। भोज्यं भोक्ष्यमाणं अन्नादिकं, त्वमेवासि। भोग्यमिति वा पाठः। भोग्यं भोक्तव्यं स्वर्गादिकम्। शाश्वतः कर्मविनाशेऽप्यविनाशी। भोक्ता कर्मफलभोक्ता च त्वमेव। तथा वेद्यं वेदशास्त्रादिभिः ज्ञेयं सर्वं त्वम्। प्रमेयं त्वमेव। प्रमेयशब्देन प्रमाणमपि गृह्यते। आगमादिप्रमाणं त्वमेवेत्यर्थः। वेदिता ज्ञातृविशेषः। ज्ञानवांश्च त्वमेव। तथा ध्याता ध्यानकर्ता उपासकस्त्वमेव। तदिति तच्छब्दवाच्यं परं उत्कृष्टं ध्येयं सत्यज्ञानादिलक्षणं ब्रह्म त्वमेवासीतिब्रह्माद्वैतप्रतिपादनमिदम्।।१५।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अपरस्य वक्तव्यस्याभावात्स्तुत्युपसंहारद्योतनार्थं ज्ञेयं स्तुत्युपसंहारं स्तुत्यनन्तरं ब्रह्मणा कृतं दर्शयति -

इति तेभ्यः स्तुतीः श्रुत्वा यथार्था हृदयङ्गमाः।
प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः।। १६ ।।

इतीति। इति उक्तप्रकारेण, यथार्था हृदयङ्गमाः, याथार्थ्येन यथार्थत्वेन, हृदयङ्गमाः मनोरमाः, स्तुतीः स्तुतिवाक्यानि, तेभ्यो देवेभ्यः, श्रुत्वा प्रसादाभिमुखः प्रसादेनाभिमुखः, कार्यसाधनाभिमुखः सन्, वेधा ब्रह्मा, दिवौकसः देवान्, प्रत्युवाच।। १६ ।।

पुराणस्य कवेस्तस्य चतुर्मुखसमीरिता।
प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी।। १७ ।।

पुराणस्येति। पुराणस्य पुरातनस्य। कवेः प्राक्प्रबन्धकर्तुः। त्रिकालज्ञानवतो वा।

प्राक्प्रबन्धविधाता च सर्वज्ञश्च कविः स्मृतः

इति भोजः। तस्य ब्रह्मणः। चतुर्मुखसमीरिता चतुर्भिर्मुखैर्युगपदीरिता। चतुष्टयी चत्वारोऽवयवा यस्याः सा। चतुष्टयी शब्दानां प्रवृत्तिः सन्ततिः, चरितार्था आसीत्। साक्षाद् ब्रह्मणो मुखैश्चतुर्भिर्युगपदेवोक्तत्वात् चरितार्थाऽभवत्। जातिक्रियागुणद्रव्यभेदेन चतुष्टयीति केचिदाहुः। ध्वनिवर्णपदवाक्यानीत्यन्ये व्याचक्षते। यदुक्तं न्यासकारेण(सरस्वतीकण्ठाभरणम् १) -

ध्वनिर्वर्णाः पदं वाक्यमित्यास्पदचतुष्टयम्।
यस्याः सूक्ष्मादिभेदेन वाग्देवीं तामुपास्महे।।

इति। सूक्ष्मा पश्यन्ती मध्यमा वैखरी चेति क्रमेण चतुष्टयीति अपरे वदन्ति। अत्र श्रुतिः(तैत्तिरीयब्राह्मणम् २.८.८) -

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।। इति।

अत्र मनुष्यवाच एव तुरीयत्वनियमात् ब्रह्मणि वाक् चतुष्टयीत्यपि सम्भवेदिति चतुष्टयीत्यादि। चतुष्टयीति सङ्ख्याया अवयवे तयप्। ह्रस्वात्तादौ तद्धिते(पा.सू. ८.३.१०१) इति षत्वम्।। १७ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

किमुवाचेत्याकाङ्क्ष्य तद्वचनानि दर्शयति स्वागतेत्यादिभिः श्लोकैः -

स्वागतं स्वानधीकारान् प्रभावैरवलम्ब्य वः।

युगपद् युगबाहुभ्यः प्राप्तेभ्यः प्राज्यविक्रमाः।। १८ ।।

स्वागतमिति। हे प्राज्यविक्रमाः प्रभूतविक्रमाः इति सम्बोधनम्। प्राज्यं भूरि प्रभूतं चेति हलायुधः(श्लो.७०१)। वः युष्मभ्यम्। स्वागतं आगतं सु शोभनमागतम्। तदस्तु। आगमनं त्वस्य पूजाद्वारेण। सुशब्देन तेषामाशीः प्रतिपाद्यते। अत एवाशिष्ययोगे चतुर्थी। कीदृशेभ्यः। वः प्रभावैः स्वान् अधीकारानवलम्ब्य स्थितेभ्यः। अधीकारानिति उपसर्गस्य घञ्यमनुष्ये बहुलम् (पा.सू.६.३.१२२) इति दीर्घः। सामर्थ्यैः स्वकीयान् अधिकारान् नियोगान् अवलम्ब्य स्वेषु स्थानेषु पूर्वं स्थितेभ्य इत्यर्थः। इदानीमिह केनचित् कारणेन युगपत् प्राप्तेभ्यः युगबाहुभ्यः आजानुविलम्बिहस्तेभ्यः इत्यर्थः। युग इति अश्वादिस्कन्धनिधेयो दारुविशेषः। यानाद्यङ्गे युगः पुंसीत्यमरः(३.३.२४) ।।१८।।

किमिदं द्युतिमात्मीयां न बिभ्रति यथा पुरा।

हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः।। १९ ।।

किमिदमिति। किमिदं वो युष्माकं, मुखानि पुरा पूर्वं यथा, तथा आत्मीयां द्युतिं कान्तिं, न बिभ्रति न धारयतीति। हिमक्लिष्टप्रकाशानि हिमबाधितद्युतीनि, ज्योतींषीव चन्द्रग्रहतारकादीनि तेजांसि यथा आत्मद्युतिं न बिभ्रति तद्वदिति। तदिदं किं किमर्थं केन कारणेन वो मुखानि कान्तिं न बिभ्रतीति प्रश्ने किंशब्दः। व इति युष्मच्छब्दस्य षष्ठीचतुर्थीद्वितीयाबहुवचनेषु, बहुवचनस्य वस्नसौ(पा.सू.८.१.२१) इति वसादेशः।। १९ ।।

इन्द्रादिषु तद्विशेषमाह -

प्रशमादर्चिषामेतदनुद्गीर्णसुरायुधम्।

वृत्रस्य हन्तुः कुलिशं कुण्ठिताश्रीव लक्ष्यते।। २० ।।

प्रशमादीति। किमिदमिति अनुवर्तते। वृत्रस्य हन्तुः वृत्रारेरिन्द्रस्य, एतत् कुलिशं वज्रं, कुण्ठिताश्रीव भग्नधारेव, लक्ष्यते। इदं किम्, अश्रीः कोटिः। पाल्यश्रिकोटयः इति कोशः(अमर.२.८.५५९)। कुलिशस्य विशेषणमाह -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अर्चिषां ज्वालारूपाणां तेजसां, प्रशमात् परिक्षयात्, अनुद्गीर्णसुरायुधं अनिष्ठ्यूतेन्द्रचापं, इन्द्रधनुराकारो नानावर्णविशेषो, हि वज्रादुदेति। तस्मादुद्गीर्णधनुरिव सततं दृश्यते। वज्रं इदानीं तस्याभावाद् अनुद्गीर्णेन्द्रचापमित्यभिप्रायः। दक्षिणावर्तनाथेनापि अनुद्गीर्णनानावर्णं इति व्याख्यातम्। केचिदनुद्गूर्णसुरायुधं इति वदन्ति। गूरी उद्यमन इत्यस्माद् धातोः निष्ठायां गूर्णमिति पदम्। अनुद्गूर्णानि अनुद्यतानि सुरायुधानि यस्मात् निमित्तभूतात् अनुद्गीर्णसुरायुधं, यत्सामर्थ्यनिमित्तात् अन्यदेवा- युधानामुद्यमो दृश्यते। तदानीं असमर्थत्वाद् असम्पादितान्यदेवा- युधोद्यममिन्द्रस्य वज्रमित्यर्थः। अर्चिषां प्रशमात् कुण्ठिताश्रीव लक्ष्यते इत्यत्रान्वयः।। २० ।।

किं चायमरिदुर्वारः पाणौ पाशः प्रचेतसः।
मन्त्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः।। २१ ।।

किञ्चेति। किञ्च एतावदेव न। अरिदुर्वारः। पूर्वमरिभिः दुर्वारः सन् प्रचेतसो वरुणस्य, पाणावयं पाशः इदानीं मन्त्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः। मन्त्रहतशक्तेर्नागस्य यद् दौर्बल्यं तत् प्राप्तवान् इत्यर्थः। मन्त्रहतशक्तिर्नाग इव दुर्बलो दृश्यत इति यावत्।। २१ ।।

कुबेरस्य मनःशल्यं शंसतीव पराभवम्।
अपविद्धगदो बाहुर्भग्नशाख इव द्रुमः।। २२ ।।

कुबेरस्येति। अपविद्धगदः त्यक्तगदः गदारहितः, कुबेरस्य बाहुः भग्नशाखतरुवद् दृश्यमानः मनःशल्यं मनसः शल्यभूतं दुःखजननं, पराभवं शंसतीव। कथयतीत्यभिप्रायः। पराभवागमने मानी स्वायुधानि क्षिपति। अत एव बाहुः पराभवं प्रायेण शंसतीति।। २२ ।।

यमोऽपि विलिखन् भूमिं दण्डेनास्तमितत्विषा।
कुरुतेऽस्मिन्नमोघेऽपि निर्वाणालातलाघवम्।। २३ ।।

यमइति। यमोऽपि अस्तमितत्विषा नष्टतेजसा, दण्डेन स्वायुधेन, भूमिं विलिखन्। यथा कश्चिद् दुःखाक्रान्तः परेषां मुखमनीक्षमाणोऽधोमुखः सन् केनचित् भूमिं विलिखन् तिष्ठति, तद्वद् दण्डेन विलिखन् यमोऽपि अमोघेऽपि पूर्वं सफलवीर्येऽपि, अस्मिन् दण्डेऽपि निर्वाणालातलाघवं कुरुते। निर्वाणस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नष्टाग्निकस्य, अलातस्य उल्मुकस्य, यल्लाघवमनादरं, नष्टतेजसि दण्डे तल्लाघवं कुरुते। निर्वाणालातवदनादरेण दण्डं बिभर्तीत्यर्थः।। २३ ।।

अमी च कथमादित्याः प्रतापक्षयशीतलाः।
चित्रन्यस्ता इव गताः प्रकामालोकनीयताम्।। २४ ।।

अमीति। प्रतापक्षयशीतलाः अमी द्वादशादित्याः चित्रन्यस्ता आलेख्यसमर्पिता इव प्रकामालोकनीयतां कथं गताः। शीतलत्वात् भृशं दर्शनीयतां दर्शनयोग्यतां कथं प्राप्ताः। अत्र प्रकामालोकधर्षणमिति केषाञ्चित् पाठः। प्रकामालोकः सुखदर्शनमेव धर्षणमभिभवं प्राप्ताः आदित्यानां तेजोहान्या सुखदर्शनीयत्वमेवाभिभव इति।। २४ ।।

पर्याकुलत्वान्मरुतां वेगभङ्गोऽनुमीयते।
अम्भसामोघसंरोधः प्रतीपगमनादिव।। २५ ।।

पर्याकुलत्वादिति। मरुतः प्रवहाद्याः सप्त वायवः। अथवा स्मृत्युक्ता गगनादयोऽष्टौ वायवो ग्राह्याः।

गगनः स्पर्शनो वायुरनिलो मारुतस्तथा।
प्राणः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्तिता इति।

तेषां पर्याकुलत्वात् सम्भ्रान्तत्वाद्धेतोर्वेगभङ्गोऽनुमीयते, तेषां जवभङ्ग ऊह्यते। पर्याकुलत्वलिङ्गेन मरुतां भग्नवेगत्वमनुमीयते इत्यनुमानालङ्कारः। अथवा - मरुत एकोनपञ्चाशत्सङ्ख्या देवगणास्तेषां तुल्यबलवत्त्वेन शीघ्रगमनसामर्थ्यं वेगः। तद्भङ्गो दौर्बल्यमित्यर्थः। तत्रोपमानमाह - अम्भसां प्रतीपगमनात् ओघसंरोध इव। प्रतीपगमनात् प्रवाहसंरोधो यथानुमीयते तद्वदिति। प्रतीपं प्रतिकूलः स्यात्। ओघः प्रवाह इत्युक्तो जलस्रोतःपरम्परेति।। २५ ।।

आवर्जितजटामौलिविलम्बिशशिकोटयः।
रुद्राणामपि मूर्धानः क्षताहङ्कारशंसिनः।। २६ ।।

आवर्जितेति। जटा एव मौलयो जटामौलयः एव आवर्जितेष्वानतेषु जटामयमकुटेषु विलम्बिन्यो लम्बमानाः शशिकोटयः चन्द्रकलाशृङ्गाणि येषां ते तथाभूताः। रुद्राणामेकादशसङ्ख्यानां मूर्धानोऽपि क्षताहङ्कारशंसिनः क्षतं भग्नं अहङ्कारं गर्वं शंसन्तीति तथा। गर्वभङ्गशंसिन इत्यभिप्रायः। गर्वोऽभिमानोऽ

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

हङ्कार इत्यमरः(१.७.२२)। आवर्जितजटा इति केचित् पदच्छेदं कुर्वन्ति। तत्रावर्जिताः स्रस्ता इत्यर्थः।। २६ ।।

लब्धप्रतिष्ठाः प्रथमं यूयं खलु बलोत्तरैः।

अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः।। २७ ।।

लब्धेति। प्रथमं लब्धप्रतिष्ठाः प्राप्तस्थितयो यूयं बलवत्तरैर्बला- धिकैः परैः शत्रुभिः कृतव्यावृत्तयो न स्थ खलु, कृतप्रतिष्ठाविच्छेदा न भवथ किम्। प्रतिष्ठाविच्छेदः किं न कृत इति जिज्ञासायां खलुशब्दः।

वाक्यालङ्कारजिज्ञासानिषेधेऽवगमे खलु। (अमरः ३.४.१७)

अपवादैरुत्सर्गा इव। सामान्यविधय उत्सर्गाः, न हिंस्यात् सर्वा भूतानीत्यादयः। विशेषविधयोऽपवादाः। अग्नीषोमीयं पशुमालभेतेत्यादयः। तत्र पूर्वं लब्धप्रतिष्ठा उत्सर्गा बलवत्तरैरपवादैः कृतस्थानविधयो यथा भवति तद्वद्।

अयमस्याभिप्रायः - न हिंस्यात् सर्वभूतानीति सामान्यविधिः पशावपि पूर्वं प्राप्तप्रतिष्ठः सन्नपि ततोऽग्नीषोमीयं पशुमालभेत(तै.सं. ६.१.११.६) इति विशेषविधिना पशुस्थानात् यथा निराकृतो भवति तद्वत् प्राप्तस्वर्गस्थितयो यूयमसुरैः स्वस्थानात् निराकृता न स्थ किमिति ब्रह्मणोऽयं प्रश्नः।। २७ ।।

तद् ब्रूत वत्साः किमितः प्रार्थयध्वे समागताः।

मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता।। २८ ।।

तदिति। हे वत्साः पुत्रकाः, समागताः सम्भूयागताः, यूयमितो मत्तः, किं वस्तु प्रार्थयध्वे। प्रार्थयध्वमिति वा पाठः। तत् प्रार्थनीयं ब्रूत। हि यस्माल्लोकानां सृष्टिर्मय्यवस्थिता। लोकानां रक्षा युष्मासु अवस्थिता। तस्माल्लोकपालानां युष्माकं रक्षाप्रार्थना युक्तैवेत्यभिप्रायः। इह प्रार्थयध्वं इति लोडन्तपाठोऽयं कथञ्चित् निर्वक्तुं शक्यो वा।। २८ ।।

ब्रह्मवचनानन्तरं देवैः किंकृतमित्याह -

ततो मन्दानिलोत्कम्पिकमलाकरशोभिना।

गुरुं नेत्रसहस्रेण चोदयामास वासवः।। २९ ।।

तत इति। ततो ब्रह्मवचनानन्तरं, वृत्रहा शक्रः। मन्दानिलोत्कम्पित-कमलाकरवत् शोभत इति मन्दानिलोद्धूतकमलाकरशोभी। कर्तर्युपमाने (पा.सू.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३.२.७९) इति णिनिः। तादृशेन नेत्रसहस्रेण, गुरुं देवगुरुं बृहस्पतिं, चोदयामास। अस्मदागमनप्रयोजनं आचक्ष्व इति। दृक्संज्ञया चोदितवानिति भावः।। २९ ।।

चोदितेन तेन किं कृतमित्याह -

स द्विनेत्रो हरेश्चक्षुर्दशचक्षुःशताधिकम्।

वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनम्।। ३० ।।

स इति। स वाचस्पतिः, प्राञ्जलिः कृताञ्जलिपुटः सन्, जलजासनं कमलासनं, इदं वक्ष्यमाणमुवाच। तस्य विशेषणमाह - द्विनेत्रः नेत्रद्वययुक्तः। तथापि हरेरिन्द्रस्य, दशचक्षुःशताधिकं चक्षुः। दशगुणितानि चक्षुःशतानि दशचक्षुःशतानि। चक्षुःसहस्रमित्यर्थः। नेत्रसहस्राधिकं नेत्रम्, भविष्यच्छुभाशुभ-दर्शननिमित्तभूतत्वात् बृहस्पतिरिन्द्रस्य नेत्रवत् स्थित इति यत्नेनायं परिगुणितचक्षुःसहस्रादतिरिक्तं चक्षुर्गौणवृत्त्या व्यपदिशते। स विनेतृहरेश्चक्षुरिति केषाञ्चित् पाठः। विनेतृ विनयोपदेशकमित्यर्थः। अस्य बृहस्पतिरूपस्य चक्षुषो विनेतृत्वाद् अस्य चक्षुर्भ्य आधिक्यम्। द्विनेत्रचक्षुरिति अन्येषां चक्षुषां स्वयमेव नेत्रत्वात् अस्य नेत्रभावादस्य चक्षुषो नेत्रद्वययुक्तत्वाद् अन्येभ्य आधिक्यं इत्यभिप्रायः। एवमिति, इन्द्रस्य चक्षुर्भूतो बृहस्पतिः ब्रह्माणं इदमुक्तवानिति सम्बन्धः। जीव आङ्गिरसो वाचस्पतिरित्यमरः (१.३.२४)।

विष्णुचन्द्रेन्द्रवातार्कयमाश्वांशुशुकाग्निषु।

कपिभेकाहिसिंहेषु हरिर्ना कपिले त्रिषु।। (६.५.९९ - १००)

इति वैजयन्ती ।। ३० ।। किमुवाचेत्याह -

एवं यदात्थ भगवन् आमृष्टं नः परैः पदम्।

प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो।। ३१ ।।

एवमिति। हे भगवन्, अतीतानागतवर्तमानयुक्तं लब्धप्रतिष्ठाः प्रथमम्(श्लोकः २७) इत्यादिभिर्यदात्थ त्वं वदसि, तदेवम्। सत्यमित्यर्थः। तदेव स्पष्टमाह - अस्माकं पदं परैः आमृष्टं आक्रान्तम्। पदं स्थानं अधिकारः। बलात्कारेण स्पर्शनमामर्शनम्। अस्माकमधिकारः शत्रुभिः बलवदाक्रान्तोऽभूत्। अपहृतोऽभूदित्यर्थः। हे प्रभो, प्रत्येकं विनियुक्तात्मा सर्वभूतेषु प्रत्येकं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विनिवेशितात्मा आत्मरूपेण सर्वभूतेषु अवस्थितस्त्वं कथं न ज्ञास्यसीति। जानास्येव अस्मत्पदापहरणम्। त्वया ज्ञातमेव इत्यभिप्रायः। अत्र ज्ञास्यसीति लिङर्थे लृट्प्रयोगः अयम्। न तु भविष्यत्कालविषये । कथंशब्द उपपदे लिङ्लृटौ प्रयुज्येते। तथा हि प्रयोगः (शिशुपालवधम् १६.२४) -

खलतां खलतामिवासतीं प्रतिपद्येत कथं बुधो जनः।

कथमेतद् विजानीयाम्(गीता ४.३) इति च।

कथं स लक्ष्यप्रभवो भविष्यतीति(५.८१)

भविष्यति प्रार्थितदुर्लभः कथमिति(५.४६)।। ३१ ।।

आत्मपदबाधामेव समूलं प्रपञ्चयति -

त्वया दत्तवरोदीर्णस्तारकाख्यो महासुरः।
उपप्लवाय लोकानां धूमकेतुरिवोत्थितः।। ३२ ।।

त्वयेत्यादि। त्वया दत्तेन वरेण उदीर्ण उद्वृत्तो दृप्त इत्यर्थः। तारकाख्यो महासुरः, लोकानामुपप्लवाय क्षयाय, धूमकेतुरिवोत्थितः उत्पन्नः। धूमाकारः केतुः धूमकेतुः, उत्पातविशेषः। स चोत्तिष्ठति यदाभ्युदेति, तदा लोकस्य उपप्लवः भवतीति प्रसिद्धिः। तथा चोक्तं गार्ग्यसंहितायाम् -

उत्तिष्ठति यदा भीमो धूमकेतुर्नभस्तले।
तदा समस्तभूतानां बहुधा स्यादुपप्लवः।। इति।। ३२ ।।

तद्भयेन देवानां तत्सेवापरत्वं दर्शयति -

पुरे तावन्तमेवास्य करोति रविरातपम्।
दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते।। ३३ ।।

पुरइति। अस्य तारकस्य पुरे रविस्तावन्तमेवातपं करोति, यावन्मात्रेण यावतेत्यर्थः। मात्रं कार्त्स्न्येऽवधारणे(अमरकोशः ३.३.३३३) इति। दीर्घिकाकमलोन्मेषः सिध्यति। वापीपद्मविकासः सम्पद्यते। तावद् रविस्तपति, नाधिकमित्यभिप्रायः। वापी तु दीर्घिकेत्यमरः(१.१०.२८)।।

सर्वाभिः सर्वदा चन्द्रस्तं कलाभिर्निषेवते।
नादत्ते केवलां लेखां हरचूडामणीकृताम्।। ३४ ।।

सर्वेति। चन्द्रः सर्वाभिः कलाभिः, सर्वदा सर्वस्मिन् काले, तं तारकं,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निषेवते उपास्ते। हरचूडामणीकृतां केवलां एकां, रेखां नादत्ते न स्वीकरोति। अयमभिप्रायः - हरचूडामणीकृतामेकां कलां त्यक्त्वान्याभिः सर्वाभिः कलाभिः युक्तः सदा पूर्ण एव चन्द्रस्तमाराधयतीति।। ३४ ।।

व्यावृत्तगतिरुद्यानकुसुमस्तेयसाहसात्।
न वाति वायुस्तत्पार्श्वे तालवृन्तानिलाधिकम्।। ३५ ।।

व्यावृत्तेति। उद्यानकुसुमस्तेयसाध्वसात्। उद्यानकुसुमानां स्तेयं चौर्यमपहरणं, तदेव साहसं क्रूरकर्म।

साहसं क्रूरकर्म स्यादपि चौर्यं बलात् कृतमिति भोजः।
विषशस्त्रानलाद्यैश्च परेषामतिबाधनम्।
धनस्त्रीहरणाद्यं च दोषकृत् कर्म साहसम्।।

इति स्मृतिः। वेगगमने सति तदुद्यानकुसुमानि पतेयुः। अतस्तदपहरण-मेवापराधः स्यादिति तत्कुसुमापहारिण्या गत्या रहित इत्यभिप्रायः। एवं मन्दगतिर्वातोऽपि तत्पार्श्वे तत्समीपे तालवृन्तानिलाधिकं न वाति। तालवृन्तं व्यजनम्। घर्मादिशमनाय तद्वीजनाद् यो वायुरुत्पद्यते स तालवृन्तानिलः। तस्मादधिकं तद्भयेन त्वरितगतिं विहाय तालवृन्तानिल समान एव वायुस्तत्सन्निधौ वाति इत्यर्थः। अत्र उद्यानकुसुमस्तेयसाहसादिति ल्यब्लोपे पञ्चमी। यत् कुसुमापहरणं दण्डमाशङ्क्येत्यर्थः इत्यादि दक्षिणावर्तनाथेन व्याख्यातम्। दण्डो दमः साहसोऽस्त्री(३.७.४६) इति वैजयन्त्युक्तार्थः। अत्र साहसशब्दस्यार्थो दण्डः परिगृह्यते। इदं व्याख्यानं कथं स्यादिति विचारणीयम्। व्यावृत्तशब्दस्य पञ्चमीसापेक्षत्वनियमात्। पापाद् व्यावृत्तः, प्राणिवधाद् व्यावृत्त इत्यादिप्रयोगात्। तस्माद्दण्डमाशङ्क्य व्यावृत्तगतिरित्युक्ते गत्यभावः स्यादिति च ।। ३५ ।।

पर्यायसेवामुत्सृज्य पुष्पसम्भारतत्पराः।
उद्यानपालसामान्यमृतवस्तमुपासते।। ३६ ।।

पर्यायेति। पुष्पसम्भारतत्पराः शीतोष्णवर्षणादिकं स्वगुणमपहाय केवलं कुसुमसम्पादनपरायणाः वसन्तादयः षडृतवः पर्यायसेवां क्रम सेवामुत्सृज्य उद्यानपालसामान्यं उद्यानपालसमं उद्यानपालवत् तमुपासते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सामान्यमिति समानशब्दाच्चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्।। ३६ ।।

तस्योपायनयोग्यानि रत्नानि सरितां पतिः।
कथमप्यम्भसामन्तरानिष्पत्तेः प्रतीक्षते।। ३७ ।।

तस्येति। सरितां पतिः समुद्रः, तस्योपायनयोग्यानि - उपचारार्थं प्रदानमुपायनं, तद्योग्यानि रत्नानि स्वकीयानामम्भसामन्तः स्वजलान्तरे आनिष्पत्तेः कथमपि प्रतीक्षते। निष्पत्तिः परिपाकः। उपायनयोग्यावस्था-निष्पत्तिपर्यन्तं कथञ्चित् सेवते। निष्पन्नानि सर्वाणि रत्नानि रत्नाकरस्तस्मै समर्पयति इत्यभिप्रायः।। ३७ ।।

ज्वलन्मणिशिखाश्चैनं वासुकिप्रमुखा निशि।
स्थिरप्रदीपतामेत्य भुजङ्गाः पर्युपासते।। ३८ ।।

ज्वलदिति। ज्वलन्मणिशिखाः स्फुरत्फणरत्नज्वालाः, वासुकि प्रमुखा वासुक्यादयो नागाः, भुजङ्गाः फणीश्वराः, स्थिरप्रदीपतामेत्य स्थिरप्रदीपत्वं प्राप्य, एनं तारकं, निशि रात्रौ, पर्युपासते परितः सेवन्ते। अन्येषां दीपानां तैलवर्तिक्षयाद् वातागमनाद्वा नाशदर्शनाद्, एषां तदभावाद् स्थिरं अविनाशित्वं इत्यभिप्रायः।। ३८ ।।

तत्कृतानुग्रहापेक्षी तं मुहुर्दूतहारितैः।
अनुकूलयतीन्द्रोऽपि स्वर्गद्रुमविभूषणैः।। ३९ ।।

तदिति। इन्द्रोऽपि तत्कृतानुग्रहापेक्षी सन् दूतहारितैः दूतप्रापितैः अस्यादेशाद् दूतानीतैः, स्वर्गद्रुमविभूषणैः कल्पद्रुमोत्पन्नैः विचित्रैराभरणैः, तं तारकं, मुहुः अभीक्ष्णं प्रतिदिनमनुकूलयति अनुकूलं करोति। प्रसादयति इत्यभिप्रायः।। ३९ ।।

इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम्।
शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः।। ४० ।।

इत्थमिति। इत्थमुक्तप्रकारैर्देवैराराध्यमानोऽपि सन् तारको जगत्त्रयं क्लिश्नाति बाधते। तत् किमित्याशङ्क्य दुर्जनस्यायं स्वभाव इत्याह - दुर्जनः प्रत्यपकारेण शाम्येत्। उपकारेण न शाम्येत्। परबाधनादुपरतो न भवेदिति।। ४० ।।

देवानां तत्कृतं बाधान्तरं दर्शयति -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तेनामरवधूहस्तैः सदयालूनपल्लवाः।
अभिज्ञाश्छिन्नपातानां क्रियन्ते नन्दनद्रुमाः।। ४१ ।।

तेनेत्यादि। तेन छिन्नपातानां अभिज्ञाः क्रियन्ते नन्दनद्रुमाः इति। अमरवधूहस्तैः सदयालूनपल्लवाः। अमरवधूनां हस्तैः, सदयालूनाः पल्लवाः येषां ते। नन्दनद्रुमाः तेन च्छिन्नपातानां अभिज्ञाः क्रियन्ते। छिन्नानां पाताः छिन्नपाताः। अथवा छिन्नं छेदः। भावे निष्ठा। पतनं पातः। छेदपातानां अनुभविका इत्यर्थः। छिन्नपातानामिति कर्मणि षष्ठी। सुरवध्वो येषाम् पल्लवान् कोमलैर्हस्तैः सदया लुनन्ति तान् सुरोद्यानपादपान् सम्प्रति तारकः छित्वा पातयित्वा कुसुमान्यपहरति। अत एव तान् छेदपातवेदनाभिज्ञान् करोतीत्यभिप्रायः।। ४१ ।।

वीज्यते स हि सन्तप्तः श्वाससाधारणानिलैः।
चामरैः सुरवन्दीनां बाष्पशीकरवर्षिभिः।। ४२ ।।

वीज्यत इति। सन्तप्तो घर्माभिभूतः, स तारकः, सुरवन्दीनां भुजबलाद् अपहृतानां देवस्त्रीणां, चामरैः ताभिर्धृतैश्चामरैः वीज्यते। हि प्रसिद्धौ। सर्वलोक-प्रसिद्धमेतदित्यर्थः। संसुप्त इति केषाञ्चित् पाठः। चामराणां विशेषणमाह - श्वाससाधारणानिलैः सुरवन्दिनिश्वाससमान वायुभिरिति चामरानिलवत् तासां निश्वासा अपि भवन्तीत्यभिप्रायः। तथा बाष्पशीकरवर्षिभिः अश्रुधाराणां संसर्गैः बाष्पशीकरान् वर्षद्भिरिति। सन्तापश्वाससाधारणानिलैरिति वा पाठः। वन्दी परस्य वनिता हृता बाहुबलेन या इति भोजराजः।। ४२ ।।

उत्पाट्य मेरुशृङ्गाणि क्षुण्णानि हरितां खुरैः।
उद्यानपर्वतास्तेन कल्पिताः स्वेषु वेश्मसु।। ४३ ।।

उत्पाट्येति। हरितां सूर्याश्वानां, खुरैः क्षुण्णानि। अत्युन्नतत्वात् रवितुरगखुरैः पिष्टानि। मेरुशृङ्गाण्युत्पाट्य उद्धृत्य, तेन स्वेषु वेश्मसु उद्यानपर्वताः कल्पिताः, क्रीडार्थमुद्यानपर्वताः निर्मिताः। पुमानाक्रीड उद्यानम् (२.४.२) इत्यमरः। आक्रीडपर्वता इति केषाञ्चित् पाठः। अत्यर्थं क्रीडा आक्रीडा तदर्थं पर्वताः। अयमर्थः। तुङ्गानि मेरुशृङ्गाण्युत्पाट्याहृत्य स्वगृहेषु क्रीडापर्वतान् कृतवानिति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सूर्ये सूर्यतुरङ्गे च वर्णे च हरिदिष्यत इति भोजः।। ४३ ।।

मन्दाकिन्याः पयःशेषं दिग्वारणमदाविलम्।

हेमाम्बुरुहसस्यानां तद्वाप्यो धाम साम्प्रतम्।। ४४ ।।

मन्दाकिन्या इति। मन्दाकिन्याः स्वर्गदीर्घिकायाः आकाशगङ्गायाः, पयःशेषं आत्मीयजलमेव शिष्टमासीत्। तदपि दिग्वारणमदाविलं क्रीडार्थं आगतदिग्गजमदकलुषम्। तस्मात् किमपहृतमित्याह - हेमाम्बुरुहाण्येव उत्खातप्रतिरोपणात् सस्यान्युच्यन्ते। तेषां साम्प्रतमिदानीं तद्वाप्यो धाम तदीयदीर्घिका एव स्थानं भवन्ति। सुरदीर्घिकाजलात् कनकारविन्दानि हृत्वा स्वपुरदीर्घिकासु स्थापितवानित्यभिप्रायः। सम्प्रत्येव साम्प्रतम्। प्रज्ञादित्वात् तङ्। आवासार्थे जसोर्डमेति भोजः।। ४४ ।।

भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते।

खिलीभूते विमानानां तदाघातभयात् पथि।। ४५ ।।

भुवनेति। भुवनालोकनप्रीतिः स्वर्गव्यतिरिक्तानां भुवनानां लोकानां, आलोकनेन या प्रीतिः, सा नाकिभिर्देवैर्नानुभूयते नाधिगम्यते। तत्र निमित्तमाह - विमानानां पथि विमानसञ्चारमार्गे, तदाघातभयात् तत्कर्तृकादाघाताद् यद् भयं तस्मात्, खिलीभूते खिलत्वं प्राप्ते सति। खिलमप्रतिहतं स्थानम्। पूर्वं प्रहतेऽपीदानीमप्रतिहते सततसञ्चाराभावात् भुवनालोकनप्रीतिः देवानां न भवतीत्यभिप्रायः। खिलीभूत इति निमित्त सप्तमीयम्। अत्र खिलीकृत इति केषाञ्चित् पाठः। तत्र तदाघातभियेति पाठेन भवितव्यम्। तदाघातभयात् खिलीकृत इति योज्यम्।। ४५ ।।

यज्वभिः सम्भृतं हव्यं विततेष्वध्वरेषु सः।

जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः।। ४६ ।।

यज्वभिरिति। यज्वभिः विधिना कृतयज्ञैः दीक्षितैर्ब्राह्मणैः, विततेषु प्रसृतेषु, सम्भृतं आर्जितं, हव्यं चरुपुरोडाशादिकं, मायी मायावी, स तारको नः अस्माकं, मिषतां अस्मासु मिषत्सु स्पर्धमानेषु सत्सु, जातवेदोमुखादाच्छिनत्ति। यज्ञेषु यज्वभिर्भृतं हव्यं स्पर्धमानान् अस्माननादृत्याग्निमुखादपहरतीत्यर्थः। मिषतामिति मिष स्पर्धायां इत्यस्माद्धातोः शतरि, षष्ठी चानादरे(पा.सू.२.३.३८)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इति षष्ठी। सङ्घर्षेत् स्पर्धयेन्मिषेदिति क्रियाः निष्पन्नाः। यज्वभिरिति सुयजोर् ङ्वनिप् (पा.सू. ३.२.१०३) इति। अत्र यज्वभिर्यायजूकैरिति वल्लभदेवेन व्याख्यातम्। तदनादरणीयम्। तच्छील्ये ङ्वनिपो विधानाभावात्। यज्वयायजूकयोर्भेदो ह्यमरसिंहेन प्रकाशितः (२.७.८) -

इज्याशीलो यायजूको यज्वा तु विधिनेष्टवान्

इति। अत्र मिषतामित्यस्य पश्यतामित्यर्थं केचिदाहुः, धातूनां अनेकार्थत्वात्। मिषतां पश्यतां नः, पश्यतोऽस्माननादृत्येत्यर्थः।। ४६ ।।

उच्चैरुच्चैःश्रवास्तेन हयरत्नमहारि च।
देहबन्धमिवेन्द्रस्य चिरकालार्जितं यशः।। ४७ ।।

उच्चैरिति। उच्चैरुन्नतः, हयरत्नं हयानां रत्नभूतः तुरगश्रेष्ठः, उच्चैःश्रवाः उच्चैःश्रवस्संज्ञ इन्द्राश्वश्च, तेनाहारि अपहृतः। अश्वस्य धवलत्वात् यशसां साम्यमुच्यते। देहबन्धमिति। देहं बध्नातीति देहबन्धः। कर्मण्यण्। (पा.सू.३.२.१) देहसम्बन्धि चिरकालार्जितमिन्द्रस्य यश इव, मूर्तिमद् इन्द्रस्य यश इव, लक्ष्यमाणः उच्चैर्गततत्सञ्चाराभावात् उच्चैःश्रवाश्च। तेन हृतमित्यर्थः।। ४७ ।।

तज्जयार्थं उपायप्रयोगः किं न कृत इत्याशङ्क्याह -

तस्मिन्नुपायाः सर्वे नः क्रूरे प्रतिहतक्रियाः।
वीर्यवन्त्यौषधानीव विकारे सान्निपातिके।। ४८ ।।

तस्मिन्निति। क्रूरे तस्मिन् असुरे, नः सर्वेऽपि साम-दान-भेद-दण्डाख्याश्चत्वारोऽप्युपायाः, प्रतिहतक्रियाः निष्क्रियाः प्रयोगा आसन्। तत्र उदाहरणमाह - सान्निपातिके वातपित्तश्लेष्मणां सन्निपत्य प्रकोपः सान्निपातिकः। तदुद्भवे विकारे ज्वरादौ व्याधौ, वीर्यवन्त्यौषधानीव यथा प्रतिहतसामर्थ्यानि भवन्ति तद्वदिति। तदुक्तं वैद्यशास्त्रे -

वातपित्तकफानाञ्च सन्निपातो यदा भवेत्।
तदा जातो ज्वरस्तीव्रो ह्यसाध्यः सर्वभेषजैः।। इति।। ४८ ।।

जयाशा यत्र चास्माकं प्रतिघातोत्थितार्चिषा।
हरिचक्रेण तेनास्य कण्ठे निष्कमिवार्पितम्।। ४९ ।।

जयाशेति। चशब्दोऽवधारणे। यत्र च यस्मिन् चक्र एवास्माकं जयाशा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दुर्जयानपि शत्रून् अनेन जयेमेत्याशा स्थिता, तेन प्रतिघातोत्थितान्तर्चिषा वज्रनिष्ठुरतत्कण्ठप्रतिघाताद् उत्थितमर्चिः स्फुलिङ्गो यस्य तथाभूतेन हरिचक्रेणास्य कण्ठे निष्कमर्पितमिव वक्षोभूषणं स्थापितमिवाभूत्।

निष्कमष्टोत्तरस्वर्णशतदीनारकर्षयोः।

वक्षोलङ्करणे हेममात्रे हेमफलेऽपि च।।

इति विश्वप्रकाशिकायामुक्तम्।

नन्वत्रार्पणकर्तुश्चक्रस्य तत्कण्ठस्पर्शनानन्तर मेवापसृतत्वादर्प्यमाणस्य निष्कस्थानीयस्यान्यस्यानुक्तत्वात् कथमेतद् उपपद्यते। यदि चक्रमेव निष्कमभूत् तर्हि चक्रेण निष्कत्वमुपजातमिति प्रयोक्तव्यम्। तस्माद् अनुपपन्नमिदं व्याख्यानमिति चेत्, सत्यमेतत्। अत्र कविना दृष्टं अन्यैः व्याख्यातृभिरदृष्टं विशिष्टमर्थं वयं ब्रूमः। तेन हरिचक्रेणास्य कण्ठे प्रतिघातोत्थितार्चिषा निष्कमर्पितमिवेति पदानां अन्वयः। तत्कण्ठप्रतिघातोत्थितं यदर्चिः तेनैवाकारेण निष्कमर्पितमिव तदर्चिर्मयं निष्कं नूनमर्चिरेषु सर्वेषु अर्पितमिव इत्युत्प्रेक्षा। सर्वेषु देवेषु तत्परिचर्यापरेषु सत्सु हरिचक्रेणापि तत्कण्ठप्रतिघातोत्थितं अर्चिरेव वक्षोभूषणमस्य कण्ठे निहितमित्यभिप्रायः।। ४९ ।।

तदीयास्तोयदेष्वद्य पुष्करावर्तकादिषु।

अभ्यस्यन्ति तटाघातं निर्जितैरावता गजाः।। ५० ।।

तदीयाइति। निर्जितैरावता गजाः परिभूतेन्द्रगजाः तदीया गजा अद्य पुष्करावर्तकादिषु तोयदेषु कल्पान्तवर्षकेषु महामेघेषु गिरिवप्रबुद्ध्या तटाघातं अभ्यस्यन्ति। गिरिवप्रादिषु तिर्यग्दन्तप्रहारक्रीडातटाघातः सुरेन्द्रपुरे गलितेषु पुष्करावर्तसंज्ञेषु महामेघेषु गिरिवप्रप्रबुद्ध्या दन्तप्रहारं शीलयन्तीत्यभिप्रायः ।। ५० ।।

एवं तत्कृतां सुराणां बाधां प्रदर्श्याथ स्वाभीष्टमर्थमाचष्टे -

तदिच्छामो विभो सृष्टं सेनान्यं तस्य शान्तये।

कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षवः।। ५१ ।।

तदिति। हे विभो प्रभो, यस्मादेवमासीत्, तस्मात् कारणात्, त्वया सृष्टं निर्मितं, सेनान्यं देवसेनानेतारं, तस्य तारकस्य, शान्तये परिक्षयाय, वयं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इच्छामः प्रार्थयामः इत्यर्थः। स्रष्टुमिति केषाञ्चित् पाठः। सेनान्यं स्रष्टुं त्वां इच्छामः प्रार्थयामह इति तत्रार्थः। प्रार्थने लोट्। मुमुक्षवो योगिनो भवस्य संसारस्य, शान्तये कर्मबन्धच्छिदं धर्ममिव कर्मबन्ध च्छेत्तारं आत्मानुरूपं निवृत्तिलक्षणं धर्मं यथेच्छन्ति तद्वत्।

क्षमायां निर्विकारत्वेऽप्यनिष्टं विनिवर्तते।

परिक्षये च शान्तिः स्यादिति

श्रीभोजराजः। भवः संसाररुद्रयोः। ज्ञानेनैव हि कर्मक्षयः। यथोक्तं वसिष्ठेन -

ज्ञानादेव मनुष्याणां कर्मबन्धक्षयो भवेत्। इति।। ५१ ।।

सेनान्यां सृष्टे कस्तस्य कर्मपरिचार इत्याह -

गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित्।

प्रत्यानेष्यति शत्रुभ्यो बन्दीमिव सुरश्रियम्।। ५२ ।।

गोप्तारमिति। सुरसेनायाः गोप्तारं रक्षितारं, तं सेनान्यं पुरस्कृत्याग्रतः कृत्वा, गोत्रभिदिन्द्रः, शत्रुभ्यः शत्रूणां सकशाद्, वन्दीमिव सुरश्रियं प्रत्यानेष्यति। शत्रून् जित्वा शत्रुवशे स्थितां देवश्रियं प्रत्यानेतुं समर्थो भविष्यतीत्यर्थः। वन्दीमिवेत्युपमा। अथवा वन्दीभूतां नारीं यथा तथा सुरश्रियमिति वन्दीं च श्रियं च प्रत्यानेष्यति। सहोक्त्यलङ्कारः।। ५२ ।।

एवं बृहस्पतिवचनानन्तरं ब्रह्मणा किं कृतमित्यत्राह -

वचस्यवसिते तस्य ससर्ज गिरमात्मभूः।

गर्जितानन्तरां वृष्टिं सौभाग्येन जिगाय सा।। ५३ ।।

वचसीति। तस्य गुरोर्वचसि वचने, अवसिते सति समाप्ते सति, आत्मभूः ब्रह्मा, गिरं ससर्ज प्रोक्तवान्। सा गीः सौभाग्येन गुणविशेषेण, गर्जितानन्तरां मेघगर्जनादनन्तरं सञ्जातां वृष्टिं सौभाग्येन जिगाय जितवती। गर्जितस्येव गुरुवचनस्यानन्तरं जातवाक् लोकानन्दिनी वृष्टिरिव सुभगा अभूदित्यर्थः।। ५३ ।।

तां गिरं प्रपञ्चयति -

सम्पत्स्यते वः कामोऽयं कालः कश्चित् प्रतीक्ष्यताम्।

न त्वस्य सिद्धौ यास्यामि सर्गव्यापारमात्मना।। ५४ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सम्पत्स्यत इति। अयं वः कामः सम्पत्स्यते। शत्रुविजयाय सेनानी समुत्पत्तिलक्षणो भवतां मनोरथः सफलो भविष्यति। कश्चित् स्वल्पः कालः प्रतीक्ष्यताम्। कालान्तरे कार्यसिद्धिर्भविष्यतीत्यभिप्रायः। इदानीमेव तस्य सर्गः किमर्थं न क्रियते इत्याशङ्क्याह - अस्य तारकवधरूपस्य कामस्य सिद्धौ सिद्धिनिमित्तं आत्मना मयैव सर्गव्यापारं सेनानीसर्गाख्यव्यापारं न तु यास्यामि। तु अवधारणे। आत्मन इति पाठे आत्मनो मे सर्गव्यापारमिति संयोज्यम्। सर्गव्यापारस्य मदीयत्वात् तद्वधनिमित्तं मदीयं सर्गव्यापारमहं न यास्यामीति। तद्वधार्थं सर्गव्यापारो मम न युक्त इत्यर्थः।। ५४ ।।

अत्र सर्गव्यापारस्तव कथं न युक्त इत्याशङ्क्याह -

इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम्।
विषवृक्षोऽपि संवर्ध्यः स्वयं छेत्तुमसाम्प्रतम्।। ५५ ।।

इत इति। स दैत्यस्तारकः, इतः मत्तः, प्राप्तश्रीः। तपोभिस्तुष्टान्मत्प्राप्तैश्वर्यः। तस्मात् कारणात् इत एव क्षयं प्राप्तुं नार्हति। मदेव क्षयं प्राप्तुं नार्हतीत्यभिप्रायः। तदेवार्थान्तरन्यासेन स्पष्टयति। विषवृक्षोऽपि संवर्ध्यः, विषवृक्षः कारस्करः, कुतश्चित् स्नेहात् संवर्धनीयः। स्वयं छेत्तुमसाम्प्रतम्। तेन संवर्धयित्रा स वृक्षः स्वयमेव छेत्तुमयुक्तः। अथवा स्वयमेव तं छेत्तुं संवर्धयितुरयुक्तमित्यर्थः। अत्र संवर्ध्येति ल्यबन्तं केचित् पठन्ति। तत्रायमन्वयः - स्वयमेव संवर्ध्य स्वयमेव च्छेत्तुं विषवृक्षोऽप्यसाम्प्रतम्। विषवृक्षोऽप्ययुक्तं छेत्तुम्। योग्यो न भवतीत्यर्थः। साम्प्रतं शब्दो योग्यवाची। इदानीन्तनकाले च ज्ञेयम्। ज्ञेये युक्ते च साम्प्रतमिति भोजः। असाम्प्रतशब्दस्त्वयोग्यवाची। स चाप्यव्ययत्वात् त्रिषु लिङ्गेषु समानस्वभावः। अङ्गीकृतः कामात् छेत्तुं न युज्यत इति। तेन कर्मणोऽभिहितत्वाद् विषवृक्षशब्दाद् द्वितीयाभावः। कर्मणीदृशाः प्रयोगाः विद्यन्ते -

आहूय पूज्यतां विप्रः, कन्यालङ्कृत्य दीयताम् इति।। ५५ ।।

तादृशो वरस्त्वया किमर्थं दत्त इत्याह -

वृतं तेनेदमेव प्राङ् मया चास्मै प्रतिश्रुतम्।
वरेणाशमितं लोकानलं दग्धुं हि तत्तपः।। ५६ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वृतमिति। प्राक् पूर्वं, तेन दैत्येन, इदमेव वृतम्। एवमहं सर्वदेवानां विजेता, शिवांशव्यतिरिक्तैः सुरैरवध्यश्च भूयासमिति प्रार्थितम्। इदमेव मया तस्मै प्रतिश्रुतम्। तथास्त्विति प्रतिज्ञातम्। वरप्रदानकारणदोषमाह - वरेणाशमितं अकृतशमनं चेत् तत् तपः लोकान् दग्धुं अलं पर्याप्तं हि। तस्माद् अस्मै दत्तेन वरेण तत्तपः शमितमासीदित्यभिप्रायः। प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता (पा.सू.१.४.४०) इति सम्प्रदानत्वाद् अस्माइति चतुर्थी।। ५६ ।।

कस्तर्हि तस्य जेता स्यादित्याह -

संयुगे सम्मुखीनं तमुद्यदं प्रसहेत कः।
अंशादृते निषिक्तस्य नीलरोहितरेतसः।। ५७ ।।

संयुगइति। संयुगे युद्धे, सम्मुखीनं सम्मुखागतं, उद्गदमुद्धृतगदं, तं दैत्यं, क एव प्रसहेत सोढुं शक्नुयात्। निषिक्तस्य स्त्रीयोनौ कृतनिषेकस्य, नीलरोहितरेतसः शम्भुवीर्यस्यांशादृते हरस्य रेतोंशाद् विना, क एवान्यस्तं प्रसहेत। न कश्चिदपीति यावत्। हररेतोंशः कुमार एव तस्य हन्ता स्यादित्यभिप्रायः। सम्मुखीनमिति, यथामुखसम्मुखस्य दर्शनः खः(पा.सू. ५.२.६) इति खप्रत्ययः। धूर्जटिर्नीललोहित इत्यमरः(१.१.३३)।। ५७ ।।

विष्णुशक्रादिभिरजय्यं जेतुं भवांशः कथं समर्थः स्याद् इत्याशङ्क्यान्यदेवेभ्यस्तस्याधिक्यमाह -

स हि देवः परं ज्योतिस्तमःपारे प्रतिष्ठितम्।
परिच्छिन्नप्रभावर्द्धिर्न मया न च विष्णुना।। ५८ ।।

स इति। स देवः शम्भुः, तमःपारे तमसः अविद्यारूपस्य प्रपञ्चस्य पारे, प्रतिष्ठितं तमोतीतं परमुत्कृष्टं ज्योतिः। तेजो हि परं ब्रह्मेति प्रसिद्धं इत्यर्थः। स देवो मया न परिच्छिन्नप्रभावर्द्धिः, विष्णुना न च परिच्छिन्नप्रभावर्द्धिः। परिच्छिन्ना इयत्तया परिमिता प्रभावस्य सामर्थ्यस्य ऋद्धिः समृद्धिः अतिशयो यस्य स तथा। तदीयं प्रभावातिशयमियत्तया परिच्छेत्तुं विष्णुरहं चोभावपि न समर्थावित्यर्थः।। ५८ ।।

यतात्मनः तस्य देवस्य का स्त्री वल्लभा स्यात्, तदंशस्योत्पादने कोऽभ्युपाय इत्याशङ्क्याह -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उमारूपेण ते यूयं संयमस्तिमितं मनः।

शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत्।। ५९ ।।

उमेति। संयमस्तिमितम्। रागद्वेषादिविरहः संयमः, तेन निश्चलं निर्विकारम्। शम्भोर्मनः उमारूपेण पार्वतीरूपेण, आक्रष्टुं वशीकर्तुं, यतध्वम्। तद्रूपेणाकृष्टवस्तुना तच्चित्ताकर्षणं कर्तुं यत्नं कुरुध्वम्। अयस्कान्तेन लोहवत्। लोहमिवायस्कान्तेष्वाकर्षणेन अयो यथाकर्षति तद्वदिति ।। ५९ ।।

हरवीर्यधारणसामर्थ्यं उमायाः किमस्तीत्याशङ्क्य तदेव प्रतिपादयति -

उभे एव क्षमे वोढुमुभयोर्वीर्यमाहितम्।

सा वा शम्भोस्तदीया वा मूर्तिर्जलमयी मम।। ६० ।।

उभे इति। आहितं निक्षिप्तं, उभयोः वीर्यं वोढुं धारयितुं, उभे एव स्त्रियौ, क्षमे समर्थे। कस्य केत्याह। वाशब्दोऽवधारणे। सा वा, सैव शम्भोर्वीर्यं वोढुं क्षमा। तदीया शम्भुसम्बन्धिनी जलमयी मूर्तिरेव मम वीर्यं वोढुं क्षमा। जलं हि अष्टमूर्तेः शिवस्य एका मूर्तिः इत्युक्तं (लिङ्ग)पुराणे -

भूमिरापोऽनलो वायुरात्मा व्योम रविः शशी।

इत्यष्टौ देवदेवस्य मूर्तयः परिकीर्तिताः।। (उत्तर.१२)

अयं कश्चिदुपमाभेदः। ननु वाशब्दस्य कथमवधारणार्थता स्यात्। वा विकल्पोपमाद्वन्द्वसमुच्चयेष्विति निपातशब्दस्य चत्वार एवार्था उक्ता इति चेदत्र गतिं ब्रूमः। निपातोऽनेकार्थ इति वचनात् अवधारणमेवात्र कविनाभिप्रेतम्। तथा च वक्ष्यति -

योषित्सु तद्वीर्यनिषेकभूमिः सैव क्षमेत्यात्मभुवोपदिष्टम्(३.१६)

इति। अथवा सावा शम्भोस्तदीया अवा इति पदच्छेदः कार्यः। अव रक्षण इत्येतस्माद् धातोः पचाद्यचि कृते अवतीत्यवा स्त्री। तद्वीर्यस्य परिणामपर्यन्तं रक्षतीत्यर्थः। सा शम्भोर्वीर्य सोढुं क्षमेति योज्यम्। उभे एव क्षमे वोढुमिति पूर्वमेवावधारणस्योक्तत्वात् पुनस्तद्ग्रहणस्य वैयर्थ्यादिति।। ६० ।।

जातस्तदंशः किं करिष्यतीत्याह -

तस्यात्मा शितिकण्ठस्य सेनापत्यमुपेत्य वः।

मोक्ष्यति स्वर्गवन्दीनां वेणीर्वीर्यविभूतिभिः।। ६१ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तस्येति। शितिकण्ठस्य कालकूटपानात् नीलकण्ठस्य, तस्य शम्भोः, आत्मा पुत्रो वः सेनापत्यमुपेत्य, सेनापतित्वं प्राप्य, वीर्य विभूतिभिः आत्मशक्तिसमृद्धिभिः, स्वर्गवन्दीनां वेणीः संश्लिष्टकबरीबन्धान्मोक्ष्यति। वन्दीनां अभ्यङ्गादिकेशसंस्काराभावात्। संश्लिष्टकेशा वेणीत्युच्यते। वन्दीनां वेण्या विमोचनं भर्त्रा क्रियते। इह सुरवन्दीनां वेणी- विमोचनं कुमारः करिष्यतीत्यर्थः। आत्मा वै पुत्रनामासीत् (कौषीतकिब्राह्मणम् २.१२) इति श्रुतेरिह पुत्र एवात्मेत्युच्यते।। ६१ ।।

इत्युक्त्वा ब्रह्मणा किं कृतमित्याह -

इति व्याहृत्य विबुधान् विश्वयोनिस्तिरोदधे।
मनस्याहितकर्तव्यास्तेऽपि देवा दिवं ययुः।। ६२ ।।

इतीति। इत्युक्तप्रकारेण, विबुधान् व्याहृत्य, विश्वयोनिः ब्रह्मा, तिरोदधे तिरोहितोऽभूत्। देवाः किं कृतवन्त इत्याह - मनस्याहितकर्तव्याः निहितकार्याः, तत्कार्यं मनसा स्मरन्तः, देवा अपि दिवं प्रतिययुः।। ६२।।

दिवं गतैर्देवैः किं कृतमित्याह -

तत्र निश्चित्य कन्दर्पमगमत् पाकशासनः।
मनसा कार्यसंसिद्धौ त्वराद्विगुणरंहसा।। ६३ ।।

तत्रेति। तत्र तस्मिन् कार्ये, हरगौरीसमागमनार्थं कन्दर्पं निश्चित्य, काम एव समर्थ इति निश्चित्य, पाकशासनः इन्द्रः, मनसा कन्दर्पमगमत्। कामं सस्मार इत्यर्थः। मनसो विशेषणमाह - कार्यसंसिद्धाविति। कार्यसंसिद्धौ या त्वरा यः सम्भ्रमः, तेन द्विगुणं रंहो वेगो यस्य तेन। कार्यसंसिद्धिसम्भ्रमद्विगुणित वेगेनेत्यर्थः। कार्यसंसिद्धौ औत्सुक्यात् प्रवृद्धजवेन मनसा कामं स्मृतवानिति भावः। इन्द्रो मरुत्वान् मघवा विडौजाः पाकशासन इत्यमरः(१.१.४१)। अगमदिति गमेर्लुङि लृदित्वादङ्।। ६३ ।।

अथ स ललितयोषिद्भ्रूलताचारुशृङ्गं
रतिवलयपदाङ्के चापमासज्य कण्ठे।
सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थे प्राञ्जलिः पुष्पकेतुः।। ६४ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथेति। अथ स्मरणानन्तरं, सललितायाः सविलासायाः, योषितः भ्रूलतावच्चारु शृङ्गं कोटिर्यस्य तत्। तादृशं चापं कण्ठे आसज्य न्यस्य, रतिवलयपदाङ्के, रतेरात्मभार्यायाः, वलयपदं कण्ठनिहितहस्तस्थानमेवाङ्कं चिह्नं यस्य। तस्मिन् कण्ठे चापमासज्य निधाय। तस्य हस्तस्य तत्रैव सदास्थितिः। तस्मात् तस्य कण्ठवलयलाञ्छनं अस्तीत्यभिप्रायः। सहचरमधुहस्तन्यस्त चूताङ्कुरास्त्रः। सहचरस्य सख्युः, मधोर्वसन्तस्य, हस्ते न्यस्तं चूताङ्कुर एव अस्त्रं यस्य सः। चूतपल्लवायुधः शरयुक्तः तथा प्राञ्जलिः कृताञ्जलिः, पुष्पकेतुः कामः, शतमखं शतक्रतुं इन्द्रं, उपतस्थे उपगतवान्। सङ्गतकरणे आत्मनेपदम्। एवम्भूतः कामः शक्रस्य समीपं प्राप्तवानित्यर्थः। मालिनीवृत्तमिदम्।। ६४ ।।

(कुमारसम्भवस्येत्थं स्पष्टं व्याचष्ट तुष्टधीः।
द्वितीयसर्गमखिलं विद्यामाधवपण्डितः।।)

इति विद्यामाधवीये कुमारसम्भवव्याख्याने द्वितीयः सर्गः।। श्रीः।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृतीयः सर्गः

कामदहनम्

अथ कामागमनानन्तरं इन्द्रसम्भावनेन्द्रवचनकामवचनादि कामदहनान्तं तृतीयसर्गेण वर्णयति -

तस्मिन् मघोनस्त्रिदशान् विहाय सहस्त्रमक्ष्णां युगपत् पपात।
प्रयोजनापेक्षितया प्रभूणां प्रायश्चलं गौरवमाश्रितेषु ।। १ ।।

तस्मिन्नित्यादि। मघोनः इन्द्रस्य, अक्ष्णां सहस्त्रं त्रिदशान् विहाय युगपत् तस्मिन् पपात। इन्द्रस्य सुरेषु क्षणमनादरः कथमासीदित्याह - प्रयोजनेति। प्रयोजनमपेक्षत इति प्रयोजनापेक्षी, तस्य भावः प्रयोजना- पेक्षिता, तया। प्रभवः प्रयोजनापेक्षिण इति, तस्मात् प्रभूणां आश्रितेषु परिजनेषु, गौरवं प्रायश्चलमस्थिरं हि। यस्तु स्वेषु प्रयोजनसाधको भवति, तस्मिन् प्रभूणामादरो भवति। यस्तु स्वप्रयोजनसाधको न स्यात्, तस्मिन्नाश्रिते विद्यमानमपि गौरवं विनश्यतीत्यर्थः। चिरकालाश्रितेषु प्रयोजनसाधनासमर्थेषु सुरेष्वनादरं कृत्वा तत्समर्थे कामे बहुमानातिशयेन दृक्सहस्त्रं निविष्टमासीदित्यभिप्रायः। अथवा - अर्थान्तरं वाच्यम्। आश्रितेषु प्रयोजनापेक्षितया प्रभूणामात्मनि गौरवं चलं प्रायः। यदा प्रभवः परिजनात् कार्यमपेक्षन्ते तदा आत्मनि गौरवमपहाय परिजनमेव सम्भावयन्ति इत्यर्थः। अत्र सर्गे सर्वमुपजातिवृत्तम्।। १ ।।

स कामः किं कृतवानित्याह -

स वासवेनासनसन्निकृष्टमितो निषीदेति निसृष्टभूमिः।
भर्तुः प्रसादं प्रतिगृह्य मूर्ध्ना वक्तुं मिथः प्राक्रमतैवमेनम्।। २ ।।

स इति। स कामो भर्तुः प्रसादं मूर्ध्ना प्रतिगृह्यैनमिन्द्रं मिथो रहस्येवं वक्तुं प्राक्रमत प्रारब्धवान्। मिथ इति एनमुद्दिश्येत्यर्थो वा ग्राह्यः। तमवस्थाप्य अनुग्रहं दर्शयन् तस्य विशेषणमाह - इतो निषीदेति। वासवेनासनसन्निकृष्टं निसृष्टभूमिः। सन्निकृष्टं सन्निकर्षं समीपस्थानम्। भावे निष्ठा। आसनसन्निकृष्टं आसनसन्निकृष्टपर्यङ्कमित्यर्थः। इतोऽस्मिन् मत्पार्श्वे निषीदेति शक्रेण कामस्थितप्रदेशादारभ्यात्मीयासनपर्यन्तं हस्तेन समर्पितस्थान इति। आसन सन्निकृष्टं इत्यस्य सन्निकृष्टासनं निषीदेति क्रियाविशेषणत्वं केचिदाहुः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वाहिताग्न्यादिषु(पा.सू.२.२.३७) इति पाठात्तस्य साधुत्वमिति। आसनं सन्निकृष्टमिति यथा भवति तथा निषीदेति क्रियाविशेषणमेतद् इत्यन्ये प्राहुः। तन्न ग्राह्यम्, क्रियाविशेषणानां निष्ठान्तविशेषणयोः पूर्वनिपात इति नियमात्। विस्रस्तवस्त्रमवरोधवधूः पपात, लीलामृदुपदं ययाविति प्रयोगेण च।। २ ।।

किमुक्तवानित्याह -

आज्ञापय ज्ञातविशेष पुंसां लोकेषु यत्ते करणीयमस्ति।
अनुग्रहं संस्मरणप्रवृत्तमिच्छामि संवर्धितुमाज्ञया ते।। ३ ।।

आज्ञापयेति। हे पुंसां ज्ञातविशेष। ज्ञाताः पुंसां विशेषा येन स तथा, तस्य सम्बोधनमिदम्। ननु ज्ञातपुंसविशेषेति प्रयोक्तव्ये ज्ञातविशेषेति कथं प्रयोगः, समासश्च कथं स्यादिति चेदत्रोच्यते - अस्मिन् छन्दसि इन्द्रात्पुंविशेषेति प्रयोक्तुमशक्यत्वात् ज्ञातविशेषेति समासः कृतः। विशेष शब्दस्य साकाङ्क्षत्वात् पुंसामिति पृथक् पदसन्निधापनं कृतमिति न दोषः। तथा माघकाव्येऽपि प्रयोगः (१.४८) - बभूव रक्षःक्षतरक्षणं दिवः इति। हे ज्ञातपुंविशेष पुरुषविशेषज्ञ, हे भगवन् इन्द्र, त्वं मां तत्कार्यमाज्ञापय। एषु लोकेषु ते तव, यत् करणीयं कार्यमस्ति। अहं संस्मरणप्रवृत्तं तवानुग्रहमाज्ञया संवर्धितुमिच्छामि। त्वया मम यत् संस्मरणप्रवृत्तं कृतं, यस्मात् प्रवृत्तं जातं तं मयि तवानुग्रहं स्मृत इत्येवंरूपप्रसादं त्वदिष्टकार्यं प्रत्याज्ञया पोषयितुमिच्छामि। स्मरणे कृते मयि तवानुग्रहो जात एव स्यात्। आज्ञायां कृतायां स पूर्णः स्यात्। अतस्तं पूर्णं कर्तुं इच्छामीत्यर्थः। तदर्थमाज्ञा त्वया दातव्येत्यभिप्रायः। अत्र संवर्धयितुमिति प्रयोक्तव्ये संवर्धितुमिति प्रयोगः कृतः। सोऽपि लावण्यमुत्पत्तुमिवास यत्नम् इति प्रयोगवदिति, अन्तर्भावितण्यर्थोऽयमिति कालिदासस्य महाकवित्वात् क्षन्तव्यः। एतद्दोषपरिहारार्थं केचित् संवर्धितमिति पठन्ति। आज्ञया संवर्धितं इच्छामि स्मरणाज्ञातमात्रं आज्ञया सम्पादिताभिवृद्धिं अनुग्रहं इच्छामीत्यर्थः।। ३ ।।

इदानीं कामः स्वात्मन उचितां उक्तिं दर्शयति -

केनाभ्यसूया पदकाङ्क्षिणा ते नितान्तदीर्घैर्जनिता तपोभिः।
यावद् भवत्वाहितसायकस्य मत्कार्मुकस्यास्य निदेशवर्ती।। ४ ।।

केनेत्यादि। पदकाङ्क्षिणा इन्द्रपदाभ्यर्थिना, केन नितान्तदीर्घैस्तपोभिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तवाभ्यसूया अक्षान्तिः, जनिता उत्पादिता, तां वद। स एव तावदिदानीमेव आहितसायकस्य निहितशरस्य, अस्य मत्कार्मुकस्य, निदेशवर्ती आज्ञावर्ती, भवतु भवेदिति। लिङर्थे लोट्। मत्कार्मुकस्यैष निदेशवर्तीति पाठः। अन्यथा कर्तृपदमध्याहार्यं स्यात् ।। ४ ।।

पुरुषार्थत्रयनिराकरणसामर्थ्यं कामस्यास्तीति दर्शयन्मोक्षं अधिकृत्याह -

असम्मतः कस्तव मुक्तिमार्गं पुनर्भवक्लेशभयात् प्रपन्नः।

बद्धश्चिरं तिष्ठतु कामिनीनामारेचितभ्रूचतुरैः विलासैः।। ५ ।।

असम्मत इति। पुनर्भवक्लेशभयात् पुनर्जननायासभयात्, मोक्षमार्गं यियासुः प्राप्तुकामः, तवासम्मतो विरोधी, कः पुमान् कामिनीनां सुन्दरीणां, आरेचितभ्रूचतुरैः विलासैः चिरं बद्धः तिष्ठत्वित्येकवाक्यतया योज्यम्। आरेचिताभिर्नर्तिताभिः एकोत्क्षेपणयुक्ताभिः भ्रूभिश्चतुरैर्मनोहरैः विलासैः लीलाविशेषैः बद्धश्चिरं वशीकृतः कस्तिष्ठेदिति तवानिष्टं मोक्षार्थिनं स्त्रीवशं कुर्यामित्यर्थः। आरेचितं नर्तितं स्यादिति भोजः। सङ्गीतशास्त्रे एकस्या भ्रुवो ललितोत्क्षेपणं रेचितं नाम नेत्रकर्मोच्यते - रेचितं पुनरेकस्या ललितोत्क्षेपणं भ्रुवः इति। ईषद्रेचितं आरेचितम्, आरेचिताभिः ईषद्रेचितयुक्ताभिः भ्रूभिरित्यर्थः ।। ५ ।। धर्मार्थावधिकृत्याह -

अध्यापितस्योशनसापि नीतिं प्रयुक्तरागप्रणिधिर्द्विषस्ते।

कस्यार्थधर्मौ वद पीडयानि सिन्धोस्तटावोघ इव प्रवृद्धः।। ६ ।।

अध्यापितस्येति। उशनसा शुक्रेण। उशना भार्गवः कविरित्यमरः (१.३.२५)। शुक्रस्य खलु नीतिशास्त्रातिशयो लोके प्रसिद्धः। भार्गवेण समो नये इति स्तवराजमाहात्म्येऽप्युक्तम्। शुक्रेणापि नीतिमध्यापितस्य कारितनीति शास्त्राध्ययनस्य। शुक्राद् अधीतनीतिशास्त्रस्येत्यर्थः। एवं नीतिशास्त्रज्ञस्यापि ते द्विषः त्वच्छत्रोः, कस्य प्रयुक्तरागप्रणिधिरहमर्थधर्मौ पीडयानि, वद। रागो विषयाभिलाषः, स एव प्रणिधिश्चरो गूढपुरुषः, प्रयुक्तः प्रेषितो रागप्रणिधिर्येन सः प्रहितरागचरः सन्, अहं कस्यार्थधर्मौ पीडयेयं क्षपयेयं, कथय। त्वया कथितस्य शत्रोः प्रथमं रागमुत्पाद्य ततोऽहं विषयासङ्गेन मोहं विधाय तस्यार्थधर्मौ विनाशयेयमित्यभिप्रायः। पीडयानीति लोडुत्तमैकवचनम्। लोडन्तस्यैव

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रकृतत्वात्। पीडयामीत्येव वा पाठः। तत्रोपमामाह - प्रवृद्धः प्रावृषि महान् सिन्धोः नद्याः ओघः प्रवाहः, तटाविव तटप्रदेशौ यथा पातयति। सिन्धुः स्त्री कथ्यते नद्यां देशसागरयोः पुमान् इति भोजः।। ६ ।।

एवं पुरुषेषु स्वशक्तिं प्रकाश्य स्त्रीषु तां दर्शयति -

कामेकपत्नीव्रतदुःखशीलां लोलं मनश्चारुतया प्रविष्टाम्।
नितम्बिनीमिच्छसि मुक्तलज्जां कण्ठे स्वयङ्ग्राहनिषक्तबाहुम्।। ७ ।।

कामिति। एकपत्नीव्रतदुःखशीलां एकस्यैव पत्नीति व्रतम् एकपत्नीव्रतं पातिव्रत्यम्। तदेव दुःखं शीलं स्वभावो यस्यास्ताम्। पातिव्रत्यदुःखस्वभावाम् इत्यर्थः। शीलं स्वभावे सद्वृत्त इत्यमरः (३.३.२०१)। चारुतया लोलं मनः प्रविष्टां, तस्याश्चारुतया चञ्चलं तच्चारुतया पर्युत्सुकं त्वदीयं हृदयं प्रविष्टाम्। त्वया मनसा चिन्त्यमानां इत्यर्थः। इन्द्रचेतसो लोलत्वमहल्याकामनया प्रसिद्धम्। एवम्भूतां कां नितम्बिनीं सुश्रोणीं मुक्तलज्जां कण्ठे स्वयङ्ग्राहनिषक्तबाहुं इच्छसि। लज्जात्यागादालिङ्गनार्थं स्वयमेव ग्रहणं स्वयङ्ग्राहः। तेन कण्ठे विषक्तौ संसक्तौ बाहू यस्यास्तामिति। एषा ममाभीष्टा पतिव्रता लज्जां त्यक्त्वा स्वयमेवागत्य मत्कण्ठसक्तभुजा भवेदिति कां कामयसे त्वमित्यभिप्रायः। तां वदेति शेषः। विलम्बिनीमिति केचित् पठन्ति। तत्र मुक्तलज्जमिति विषक्तबाहु इति च क्रियाविशेषणम्। मुक्तलज्जं स्वयङ्ग्राहविषक्तबाहु च भूत्वा विलम्बिनीमिच्छसि। विलम्बत इति विलम्बिनी, ताम्। विलम्बमानामित्यर्थः। ननु ग्रहवृदृनिश्चिगमश्च(पा.सू. ३.३.५८) इति णिचि घञपवादश्चेति ग्रहेरपो विधानात् ग्राह इति पदं कथं स्यात्। न च, विभाषा ग्रहः (३.१.१४३) इति विकल्पेन णविधानात् स्यादिति, वाच्यम्। व्यवस्थितविभाषा चेयं, जलचरे ग्राहः, एवञ्ज्योतिषि ग्रह एवेति वृत्तिकारेण विशेषाभिधानात्। स्वयङ्ग्रहाश्लेषसुखेन निष्क्रयम्(१.५०) इति माघकाव्ये प्रयोगदर्शनात्। ग्राहशब्दस्य गतिं न पश्याम इति चेत्, सत्यमेतत्। तथापि स्थितस्य कामपि गतिं ब्रूमः - ग्रहेर्णिचि कृते ग्राहेः सनाद्यन्ता धातवः(पा.सू.३.१.३२) इति पृथग्धातुत्वं स्यात्। ततो भावे घञिति ग्राह इति स्यात्। ग्रहणमित्यर्थः। स्वयं ग्राहेण तया स्वयं हस्ताभ्यां ग्राहितेन ग्रहणेन इति गतिरनवद्या। अत्र

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पूर्वानुरागाख्यो विप्रलम्भशृङ्गारो दर्शितः(शृङ्गारतिलकम् १.२१) -

सम्भोगो विप्रलम्भश्च शृङ्गारो द्विविधो मतः।
संयुक्तयोस्तु सम्भोगो विप्रलम्भो वियुक्तयोः।।
चतुर्विधो विप्रलम्भः प्रोक्तावस्थाविशेषतः।
पूर्वानुरागो मानश्च प्रवासः करुणस्तथा।। इति।। ७ ।।

मानाख्यं विप्रलम्भं दर्शयति -

कयासि कामिन् सुरतापराधात् पादानतः कोपनयावधूतः।
तस्याः करिष्यामि दृढानुतापं प्रवालशय्याशरणं शरीरम्।। ८ ।।

कयेति। हे कामिन्, अतिशयेन कामयुक्तः, अपराद्धः कृतान्य स्त्रीसङ्गापराधः सन्, पादानतः तदपराधहरणार्थं प्रियायाः पादयोः प्रणतश्च त्वं, कोपितया लज्जासञ्जातकोपया, कया मानिन्या, सहसा निर्विचारं, अवधूतोऽसि निराकृतोऽसि। अपराधशमनार्थं प्रणतं त्वां प्रणामाद्यनुनयं अगृहीत्वा का स्त्री निराकृतवती। तस्याः शरीरं दृढानुतापं प्रवालशय्याशरणं करिष्यामि। प्रवालशय्यैव शरणं रक्षकं यस्य तत् तथा। मदीयशराभिघातजनितासह्य पश्चात्तापवशात् शीतलकिसलयशय्याशयनेन शरीरं सा यथा रक्षेत्, तथा करिष्यामि। तस्याः तादृशं अनुतापं जनयिष्यामीत्यर्थः। प्रवालशय्याशयनमिति वा पाठः। अत्र मानाख्य विप्रलम्भो दर्शितः (सरस्वतीकण्ठाभरणम् ५.५२)

न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते

इति सम्भोगपुष्ट्यर्थम्। कामिनः प्रियाया अपराधं कुर्वन्ति। ततो गृहीतमानां प्रियामनुनेतुं पादे प्रणमन्ति। तत्पाद प्रहारसहनादिकमनुग्रहं मन्यते। सर्वोऽप्ययं कामिनां विनोदः। तथा चोक्तं खण्डनकारेण(१.२) - मानापनोदनविनोदनते गिरीशे इति। मानस्य लक्षणं च शृङ्गारतिलके रुद्रटेनोक्तम् (२.४४) -

स मानो नायिका यस्मात् ईर्ष्यया नायकं प्रति।
धत्ते विकारमन्यस्त्रीसङ्गदोषवशाद् यथा।। इति।। ८ ।।

शत्रुविजयशक्तिरपि ममास्तीत्याह -

प्रसीद विश्राम्यतु वीर वज्रं शरैर्मदीयैः कतमः सुरारिः।
बिभेतु मोघीकृतबाहुवीर्यः स्त्रीभ्योऽपि कोपस्फुरिताधराभ्यः ।। ९ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रसीदेति। हे वीर, त्वं प्रसीद मयि प्रसादं कुरु। मामाज्ञापयेत्यभिप्रायः। वज्रं विश्राम्यतु। चिरं शत्रुप्रहारायासञ्जातश्रमं वज्रं इदानीं श्रमापनयनाय निरायासं आस्ताम्। मदीयैः शरैः मोघीकृबाहुवीर्यः निष्फलीकृतभुजबलः सन्, कतमः सुरारिः कोपस्फुरिताधराभ्यः स्त्रीभ्योऽपि बिभेतु। कतमं तव शत्रुं मोहयित्वा कोपप्रकम्पिताधरात् स्त्रीजनादपि भीतिमन्तं कुर्यामित्यर्थः। अयमभिप्रायः - योऽहितः पुमान् स्त्रीकोपभयात् सर्वारम्भान् परित्यज्य स्त्रीप्रसादनपरायणो भवेत्, स ततो दुर्बलः सन् जेतुं शक्यः स्यात्, तथाविधं कतमं शत्रुं अहं कुर्यामिति। अत्र कतम इति दैत्यदानवराक्षसादीनां सुरारीणां बहुत्वेन जातिपरिप्रश्नत्वाद्, वा बहूनां जातिपरिप्रश्ने डतमच्(पा.सू.५.३.९३) इति किमो डतमच् ।। ९ ।। देवानामभिमतमेव कार्यमजानन्नपि स्वकीय सामर्थ्यातिशयप्रकाशनेनैव कथयति -

भवत्प्रसादात् कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा।
कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये।। १० ।।

भवदिति। भवत्प्रसादादिति आत्मप्रशंसादोषपरिहारार्थमुक्तम्। कुसुमायुधोऽपि सन्, अहमेकं मधुं वसन्तमेव सहायं लब्ध्वा, पिनाकपाणेः धृतपिनाकस्य हरस्यापि धैर्यच्युतिं कुर्याम्। रुद्रस्यापि धैर्यं विनाशयेयं इत्यर्थः। अन्ये धन्विनो मम के ? अगण्यास्तृणसमा इत्यर्थः। अत्र किंशब्दः क्षेपे वर्तते। वसन्ते चैव दैत्ये च मधौ मद्ये च माक्षिके इति भोजः। पिनाकः शूलिनो धनुरिति च।। १० ।।

एवं कामेनोक्ते शक्रः किं कृतवानित्याह -

अथोरुदेशादवतार्य पादमाक्रान्तिसम्भावितपादपीठम्।
सङ्कल्पितार्थे विवृतात्मशक्तिमाखण्डलः काममिदं बभाषे।। ११ ।।

अथेति। अथानन्तरं, आखण्डलः शक्रः, काममिदं बभाषे। तस्य विशेषणमाह - ऊरुदेशात् पादमवतार्य, आदरातिशयेन ऊरुदेशात् पादं अधःप्रसार्य। आक्रान्तिसम्भावितपादपीठम्। आक्रान्त्या आक्रमणेन पाद विन्यासेन, सम्भावितमनुगृहीतं, पादपीठं येन। उपरि पादविन्यास एव हि पादपीठस्यानुग्रहः। एवम्भूत इन्द्रः, सङ्कल्पिते चिकीर्षितेऽर्थे प्रयोजने

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

हरवशीकरणे, विवृतात्मशक्ति प्रकाशितात्मसामर्थ्यं, कामं इदं वक्ष्यमाणं उक्तवान्।। ११ ।। किमुक्तवानित्याह -

सर्वं सखे त्वय्युपपन्नमेतदुभे ममास्त्रं कुलिशं भवांश्च।
पूर्वं तपोवीर्यमहत्सु कुण्ठं त्वं सर्वतोगामि च साधकं च।। १२।।

सर्वमिति। हे सखे। आदरातिशयप्रकाशनार्थमिदं सम्बोधनम्। एतत् सर्वं उक्तं, त्वय्युपपन्नं घटितं युक्तम्। उक्तसामर्थ्यं त्वय्यस्त्येवेत्यर्थः। तदेव उपपादयति - मम उभे अस्त्रे कुलिशं भवांश्च। एकमस्त्रं कुलिशम्। एकं त्वमिति द्वे। तत्रापि कामस्य विशेषणमाह - पूर्वमिति। तयोः पूर्वमस्त्रं तयोः वज्रं तपोवीर्यमहत्सु तपःशक्त्या महत्सु मुनिषु, कुण्ठं गमनस्वार्थ क्रिययोरसमर्थम्। तान् प्रति गन्तुं हननक्रियायाञ्चाक्षमम्। कुण्ठः स्वार्थक्रियामन्द इति भोजः। सर्वतोगमि च साधकं चास्त्रं त्वमसि। मदस्त्रभूतस्य तव सर्वत्र गमनशक्तिः स्वार्थसाधनशक्तिश्चास्तीत्यभिप्रायः। अस्त्रापेक्षया नपुंसकत्वम्।। १२ ।।

अवैमि ते सारमतः खलु त्वां कार्ये महत्यात्मसमं नियोक्ष्ये।
व्यादिश्यते भूधरतामवेक्ष्य कृष्णेन देहोद्वहनाय शेषः।। १३ ।।

अवैमीति। अहं ते सारं बलं, अवैमि जानामीति यतः, अतः खलु अतो हेतोः, त्वा महति कार्ये आत्मसमं नियोक्ष्ये। आत्मानं मामिव त्वां नियोक्ष्ये इत्यर्थः। तथाहि। भूधरतां शेषस्य भूमण्डलधारणशक्तिं, अवेक्ष्य कृष्णेन विष्णुना, देहोद्वहनाय स्वशरीरोद्धरणाय, शेषः अनन्तः, व्यादिश्यते आज्ञाप्यते हि। विष्णुर्नारायणः कृष्ण इत्यमरः(१.१.१८)। सारः स्यात् स रणे धैर्ये न्याये रत्ने बले रस इति भोजः।। १३ ।।

आशंसता बाणगतिं वृषाङ्के कार्यं त्वया नः प्रतिपन्नकल्पम्।
निबोध यज्ञांशभुजामिदानीमुच्चैर्द्विषामीप्सितमर्थमत्र।। १४ ।।

आशंसतेति। वृषाङ्के वृषध्वजे रुद्रे, बाणगतिं बाणस्य गतिं शरप्रवेशं, रुद्रेऽपि मे शरस्य गतिरस्तीत्याशंसता वदता, भवता त्वया, नः कार्यं प्रतिपन्नकल्पं जातकल्पम्। प्रायेण जातमित्यर्थः। यत इदानीं उच्चैर्द्विषां उन्नतद्विषां, बलवद्भिः शत्रुभिर्युक्तानां, यज्ञांशभुजां देवानां ईप्सितमर्थं प्रयोजनम्। अत्र वृषाङ्के, निबोध जानीहि। अत्रेति निमित्त सप्तमी। वृषाङ्कनिमित्तं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इत्यवेहीत्यर्थः। आशंसतेति शंसु स्तुताविति धातोः आङ्पूर्वस्य शत्रन्तस्य रूपम्। भाषणार्थकमिह गृह्यते। तायेत्कीर्तयति रयेः पदशेच्छंसेत् गृणातीति चेति क्रियानिघण्टुः। आशंसा इच्छायामिति धातुरात्मनेपदित्वात् इह न गृह्यते।

आशंसते स्यादिच्छायां शंसतीति स्तुतौ भवेत्।
हिंसायां शसतीच्छायामाशास्ते शास्ति शासने।।

इति देवैः कथ्यते(दैवम् १८३ - १८४)। निबोधेति बुधधातोः उभयपदित्वात् लोण्मध्यमैकवचनान्तं रूपम्। बोधेत् बोधयतेऽवगच्छति निबोधेतावबुध्येत चेति (क्रियानिघण्टुः)।। १४ ।।

देवानामिष्टार्थस्य हरनिमित्तत्वमेव प्रकाशयति -

अमी हि वीर्यप्रभवं भवस्य जयाय सेनान्यमुशन्ति देवाः।
स च त्वदेकेषुनिपातसाध्यो ब्रह्माङ्गभूर्ब्रह्मणि योजितात्मा।। १५ ।।

अमीति। अमी देवा जयाय शत्रून् जेतुं भवस्य शम्भोर्वीर्यप्रभवं सेनान्यमुशन्ति इच्छन्ति हि। अत्र मया किं कार्यमित्याशङ्क्याह - स शम्भुश्च त्वदेकेषुनिपातसाध्यः तवैकशरस्य निपातेन हरणीयः। तस्य विशेषणद्वयम्। ब्रह्माङ्गभूः, ब्रह्मा अङ्गभूस्तनुजो यस्य सः।

शिवदर्शनेन ब्रह्मण उत्पत्तिर्वेदे दृश्यते - विश्वाधिगो रुद्रो महर्षिः, हिरण्यगर्भं पश्यति जायमानमिति। पूर्वमपि तस्य पुत्रवत्त्वं दर्शयितुमिदं विशेषणम्। ब्रह्मणि परस्मिन् धाम्नि योजितात्मा योगेन निवेशितान्तःकरणः। इदानीं समाधिस्थ इत्यर्थः। गणैः सह क्रीडन् भवता स दुरासदः। ध्यानस्थस्य तस्य बहिरवलोकनाभावात् समीपे गमनं त्वया सुकरं स्यादिति ज्ञापयितुं विशेषणम्। एवम्भूतः स भवता एकशरप्रहारमात्रेणैव वशीकर्तुं शक्य इत्यभिप्रायः। उशन्तीति वश कान्तावित्यस्माद् धातोः लट् प्रथमपुरुष बहुवचनान्तं कृतसम्प्रसारणं रूपम्। आशंसते स्पृहयतीच्छति वष्टि च वाञ्छतीति क्रियानिघण्टुः। ब्रह्माङ्गभूरित्यस्य व्याख्यान्तरं स्यात्। ब्रह्मादीनि ईशानादीनि पञ्चब्रह्माणि अङ्गभुवः अङ्गप्रदेशा यस्य स तथा। ईशान-तत्पुरुषा(-)घोर - वामदेव - सद्योजातात्मकमूर्ध - वक्त्र - हृदय - गुह्य प्रदेशा इत्यर्थः।। १५ ।। तस्य चित्तं कस्या योषितो वशवर्ति कुर्यामित्याशङ्क्याह -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तस्मै हिमाद्रेः प्रयतां तनूजां यतात्मने रोचयितुं यतस्व।

योषित्सु तद्वीर्यनिषेकभूमिः सैव क्षमेत्यात्मभुवोपदिष्टम्।। १६ ।।

तस्मायिति। तस्मै यतात्मने विषयव्यावृत्तचित्ताय हराय प्रयतां शुद्धां हिमाद्रेस्तनूजां रोचयितुं यतस्व। योग्यपदार्थेषु प्रीतिविशेषो रुचिः। सा यथा तस्मै रोचयते तथा कर्तुं प्रयत्नं विधेहीत्यर्थः। रुच्यर्थानां प्रीयमाणः (पा.सू.१.४.३३) इति सम्प्रदानत्वात् तस्मादिति चतुर्थी। सैव कस्माद् रोचनीयेत्याह - योषित्सु स्त्रीणां मध्ये क्षमा तद्धारणसमर्था तद्वीर्यनिषेकभूमिः सैवेत्यात्मभुवोपदिष्टम्। ब्रह्मणा उपदिष्टमुक्तमिति यावत्। तस्मात् तयोः सङ्गमनाय यत्नस्त्वया विधेय इति भावः। तस्याः प्रयतत्वात् तस्य च यतात्मत्वात् तयोः स्वयमेव सङ्गमनं न स्यादिति दर्शयितुं प्रयतां यतात्मने चेति विशेषणद्वयम्।। १६ ।।

दूरस्थां पार्वतीमपश्यते हराय रोचयितुं कथं यत्नः स्यादित्याशङ्क्याह -

गुरोर्नियोगाच्च नगेन्द्रकन्या स्थाणुं तपस्यन्तमधित्यकायाम्।

अन्वास्तइत्यप्सरसां मुखेभ्यः श्रुतं मया मत्प्रणिधिः स वर्गः।। १७ ।।

गुरोरिति। गुरोः हिमाद्रेः पितुर्नियोगात् नगेन्द्रकन्या च अधित्यकायां हिमाद्रेः उपरिभूमौ, तपस्यन्तं तपश्चरन्तं, स्थाणुं अन्वास्त इति मया अप्सरसां मुखेभ्यः श्रुतं, यस्मात् स वर्गोऽसरसां सङ्घातः, मत्प्रणिधिः मम चारः, मया प्रेषितोऽसरसां गणः छन्नरूपो गत्वा दृष्ट्वा सर्वलोकवर्तमानं कथयतीत्यर्थः। उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका इत्यमरः(२.३.७)। अपसर्पश्चरश्चारः प्रणिधिर्गूढपूरुषः(२.४२५) इति हलः ।। १७ ।।

तद् गच्छ सिद्ध्यै कुरु देवकार्यमर्थोऽयमर्थान्तरभाव्य एव।

अपेक्षते प्रत्ययमुत्तमं त्वां बीजाङ्कुरः प्रागुदयादिवाम्भः।। १८ ।।

तदिति। तत् तस्मात् कारणात्, सिद्ध्यै गच्छ, काङ्क्षितसिद्ध्यै प्रयाहि। इदं देवकार्यं कुरु। अयमर्थोऽर्थान्तरभाव्य एव। इदं हरचित्त विमोहनलक्षणं प्रयोजनं, अर्थान्तरेण पार्वतीसन्निधानादिलक्षणेन, भाव्यं साध्यमुत्पाद्यमेव। स त्वां, प्रत्ययमुत्तमं, प्रत्ययं हेतुं त्वामपेक्षते। गौरीसन्निधानादिभिर्बहुभिर्हेतुभिः साध्य एव सन्नयमर्थः सिद्धये भवन्तमेव प्रधानं हेतुं सहकारिणमपेक्षत इत्यर्थः। तत्र दृष्टान्तमाह - बीजाङ्कुर उदयात् प्रागम्भ इव

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मृत्तिकापेक्षणादिभिः हेत्वन्तरसापेक्ष एव सन् बीजाङ्कुरः स्वोदयात् पूर्वमुदयाय जलमेव प्रधानकारणं यथा अपेक्षते तद्वदिति।

अर्थः स्याद् विषये मोक्षे शब्दवाच्ये प्रयोजने।

व्यवहारे धने शास्त्रे वस्तुहेतुनिवृत्तिषु ।।(वैजयन्ती ६.१.३)

इति। प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु इत्यमरः(३.३.१४८)।। १८ ।।

तमेव प्रोत्साहयितुं स्तौति अस्मिन्नित्यादिश्लोकैः -

अस्मिन् सुराणां विजयाभ्युपाये तवैव नामास्त्रगतिः कृती त्वम्।

अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म।। १९ ।।

अस्मिन् इति। अस्मिन् सुराणां विजयाभ्युपाये तवैव गतिः प्रवेशः करणशक्तिरस्ति। नाम प्रसिद्धौ। अस्ति गतिरिति केषाञ्चित् पाठः। तवैवास्त्राणां गतिः सम्भाविता। त्वं कृती दक्षः। कृतकृत्य इति वा। अन्यैर्दुष्करस्य देवकार्यकरणसामर्थ्यमेव कृतार्थत्वम्।

न च प्रारब्धेऽस्मिन् महति कर्मण्यसाधिते सति मम यत्नो वृथा स्यादिति शङ्कनीयमित्याह - अपीति। अनन्यसाधारणं यत् तदेव कर्म अप्रसिद्धमपि असाधितमपि, पुंसां यशसे कल्पितं हि। साधारणस्य कर्मणः सर्वैः अपि सुकरत्वात् असाधारणे दुष्करे महति कर्मणि प्रारब्धे दैवादसंसिद्धेऽपि कर्तुर्महद् यशो भवतीत्यभिप्रायः। ज्ञानिना महेन्द्रेण भविष्यत् ज्ञात्वा चेदमुक्तम्।। १९ ।।

सुराः समभ्यर्थयितार एते कार्यं त्रयाणामपि विष्टपानाम्।

चापेन ते कर्म न चाधिहिंस्रमहो यथासि स्पृहणीयवीर्यः।। २०।।

सुरा इति। एते सुराः एते देवाः समभ्यर्थयितारः त्रयाणामपि विष्टपानां जगतां कार्यम्। त्रैलोक्यहितं कार्यमित्यर्थः। ते तव चापेन धनुषैव कर्म तदपि अधिहिंस्रं ह्यधिगतं हिंसाशीलं न, अहो आश्चर्यम्। स्पृहणीयवीर्योऽसि, अभिलषणीयवीर्योऽसि। यथा योग्यमेतत्। योग्यतायां अयं यथाशब्दः। वृत्तिकारेण यथाशब्दस्य चत्वारोऽर्थाः कथिताः - योग्यता वीप्सा पदार्थानतिवृत्तिः सादृश्यञ्चेति यथार्थाः इति। अहो बतेति पाठः।

खेदानुकम्पासन्तोषविस्मयामन्त्रणे बत इति। (अमरः ३.४.६)।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

बतशब्दोऽत्र सन्तोषे वर्तते। अहो बत, त्वद्वीर्यदर्शनाद् आश्चर्यसन्तोषौ मम जातावित्यर्थः।। २० ।।

एकेनैव मया कथं गम्यते इति न च शङ्कनीयमित्याह -

मधुश्च ते मन्मथ साहचर्यादसावनुक्तोऽपि सहाय एव।

समीरणो नोदयिता भवेति व्यादिश्यते केन हुताशनस्य।। २१ ।।

मधुरिति। हे मन्मथ, असौ मधुर्वसन्तः, अनुक्तोऽपि मयानाज्ञापितोऽपि, साहचर्यात् सदा त्वत्सहचरत्वात्, ते सहाय एव भविष्यति। तत्रोदाहरणमाह - हे समीरण वायो, उ सम्बुद्धौ। त्वं हुताशनस्य वह्नेः, नोदयिता चोदयिता प्रेरयिता, दहनादिकर्मसु सारथित्वेन तथा भवेति केन व्यादिश्यते आज्ञाप्यते। न केनचिद् इति शेषः। यथाग्नेर्वायुः स्वयमेव सखा भवति, तथा वसन्तोऽपि स्वयमेव सहायो भवतीत्यर्थः।। २१ ।।

एवं इन्द्रवचननान्तरं कामः किं कृतवानित्याह -

तथेति शेषामिव भर्तुराज्ञामादाय मूर्ध्ना मदनः प्रतस्थे।

ऐरावतास्फालनकर्कशेन हस्तेन पस्पर्श तदङ्गमिन्द्रः।। २२ ।।

तथेति। यथोक्तं त्वया तथा करोमीत्युक्त्वा शेषामिव भर्तुराज्ञां मूर्ध्नादाय मदनः प्रतस्थे। मङ्गलार्थं स्वजनेन स्नेहाद् दीयमानं माल्यादिकं शेषेत्युच्यते -

पुंसि नागाधिपे शेषे उपयुक्ततरे त्रिषु।

शेषा स्त्रियां मङ्गलार्थदत्तमाल्याक्षतादिकम्।।

इति भोजः। सहोक्ताविवशब्द इति केचिदाहुः। शेषां च भर्तुराज्ञां शिरसा सङ्गृह्य कामः प्रतस्थिवान्। ऐरावतेति। ऐरावतस्य आत्मदिग्गजस्य तेजोभिवृद्धये पाणितलेन वात्सल्याद् यत् सन्ताडनं क्रियते तदास्फालनम्। तन्निमित्तेन कर्कशेन हस्तेनेन्द्रस्तदङ्गं तस्य कामस्याङ्गं पस्पर्श संस्पृष्टवान्। वात्सल्यद्योतनमेतत्।। २२ ।।

स माधवेनाभिमतेन सख्या रत्या च साशङ्कमनुप्रयातः ।

अङ्गव्ययप्रार्थितकर्मसिद्धिः स्थाण्वाश्रमं हैमवतं जगाम।। २३ ।।

स इति। अभिमतेनातिप्रियेण, सख्या सुहृदा, माधवेन वसन्तेन, रत्या वल्लभया च, साशङ्कमाशङ्कासहितं, अनुप्रयातः। हरपरिभवरूपं दुष्करमिदं कर्म

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

किं स्यादिति शङ्कायुक्तं कृत्वा रतिवसन्ताभ्यामनुगत इत्यर्थः। अङ्गव्ययप्रार्थितकर्मसिद्धिः। अङ्गव्ययः शरीरत्याग एव प्रार्थित कर्मणः सिद्धिर्यस्य स तथा। अथवा अङ्गव्ययाय प्रार्थिता देवैर्याचिता कर्मसिद्धिः कर्मफलं यस्य स तथा। अथवा अङ्गव्ययाय प्रार्थिता आज्ञापयेत्यादिभिर्वचनैरात्मार्थिता कर्मसिद्धिर्येनेति। स एवम्भूतः कामः हैमवतं हिमाद्रिवनान्तरकृतं स्थाण्वाश्रमं जगाम। अत्र माधवशब्दो मधुशब्दवद् वसन्ते वर्तते। मधुश्च माधवश्च वासन्तिकावृतू इति (तै.सं.) श्रुतिः(१.४.१४)। उद्दीपना हि माल्यर्तुचन्दनेन्दूदयादयः इति।। २३ ।।

कामोद्दीपनविभावरूपं वसन्तमृतुं वर्णयितुमारभते -

तस्मिन् वने संयमिनां मुनीनां तपस्समाधिप्रतिकूलवृत्तिः।
सङ्कल्पयोनेरभिमानभूतमात्मानमाधाय मधुर्जजृम्भे।। २४ ।।

तस्मिन्निति। संयमिनामुपरमयुक्तानां शान्तानां मुनीनां तपःसमाधि-प्रतिकूलवृत्तिः। तपः प्रसिद्धम्। समाधिरेकाग्रता। तपस्समाधेश्च प्रतिकूला विरोधिनी वृत्तिर्यस्य स मधुः सङ्कल्पयोनेः मनोभवस्याभिमानभूतं अभिमानप्राप्तं, गर्वस्वरूपमित्यर्थः। एवम्भूतं आत्मानं आत्मरूपं आदाय तस्मिन् वने मधुर्जजृम्भे उल्ललास। अकालवसन्तः प्रादुर्बभूव।। २४ ।।

वसन्तकालाभिव्यञ्जकानि मलयमारुतागमनादिकानि वर्णयति -

कुबेरनाथां दिशमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलङ्घ्य।
दिग्दक्षिणा गन्धवहं सुखेन व्यलीकनिश्वासमिवोत्ससर्ज।। २५ ।।

कुबेरनाथामिति। कुबेरो नाथो यस्यास्ताम्, उदीचीमित्यर्थः। दिशम्। उष्णरश्मौ समयं दक्षिणाशास्थितिकालं, विलङ्घ्य अतिक्रम्य, उत्तरां दिशं गन्तुं प्रवृत्ते सति, दक्षिणदिङ्मुखेन व्यळीकनिश्वासमिव गन्धवहं वायुं उत्ससर्ज।

व्यलीकमप्रियाकार्यवैलक्ष्येष्वपि पीडने

इति विश्वप्रकाशिकायाम्। व्यलीकेनाप्रियेण, निश्वासमिव वायुं सृष्टवती। दक्षिणाशामुखान्मलयमारुत आगतवानित्यर्थः। अत्र शब्दसामर्थ्यात् वर्ण्योऽन्योऽर्थः प्रतीयते। दक्षिणा प्रगल्भा काचन नायिका भर्तरि समयमात्मकृतशपथं विलङ्घ्यान्यनाथां स्त्रियं गन्तुं प्रवृत्ते सति व्यलीकनिश्वासं यथा मुञ्चति, मामयं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विहायान्यां गच्छतीति दुःखेन निश्वासं मुखेन यथा मुञ्चति तद्वदिति। अत्र व्यलीकं व्रीडेति दक्षिणावर्तनाथेन व्याख्यातम्। तन्न युक्तम्। लज्जोदयस्यात्र कारणाभावात्। क्रोधशोकाभ्यामृते निश्वासोदयस्यासम्भवादिति।। २५ ।।

असूत सद्यः कुसुमान्यशोकः स्कन्धात् प्रभृत्येव सपल्लवानि।
पादेन नापैक्षत सुन्दरीणां सम्पर्कमाशिञ्जितनूपुरेण।। २६ ।।

असूतेति। अशोकः अशोकतरुः, सद्यस्तदानीमेव, स्कन्धात् प्रभृत्येव स्कन्धादारभ्यैव, सपल्लवानि कुसुमान्यसूत प्रसूतवान्। कुसुम प्राचुर्यप्रकटनार्थं स्कन्धात् प्रभृत्युक्तम्। स्कन्धादारभ्य जातैर्निरन्तरैः कुसुम किसलयैः आचितोऽभूदित्यर्थः। प्रभृतियोगे स्कन्धादिति पञ्चमीप्रयोगः साधुः। ततः प्रभृतीति भाष्यकारप्रयोगात्। ननु विसरणं नूपुरेण स्त्रीचरणाभिताडनं दोह उक्तः। अशोकस्य पुष्पं ततो भवेदिति वृक्षायुर्वेददर्शनात्। शिञ्जितनूपुरेण स्त्रीपादेन ताडनाभावात् कथमशोकपुष्पसम्पादमभूद् इत्याशङ्क्याह पादेनेति। आशिञ्जितनूपुरेण कामिनीनां पादेन सम्पर्कं नापैक्षत। अयमभिप्रायः। कालक्रमाद् आगते वसन्ते स्त्रीचरणसम्पर्कमपेक्षते। तदानीं तु सद्यो मूर्तिमद्वसन्तजृम्भणाद् अशोकस्तरुणीचरणप्रहारं नापेक्षितवानिति ।। २६ ।।

सख्युः प्रवालोद्गमचारुपत्रे नीते समाप्तिं नवचूतबाणे।
निवेशयामास मधुर्द्विरेफान् नामाक्षराणीव मनोभवस्य।। २७ ।।

सख्युरिति। प्रवाळोद्गमचारुपत्रे। प्रवालोद्गमाः किसलयोद्गमा एव चारूणि पत्राणि पक्षा यस्य तस्मिन्। समाप्तिं सम्पूर्णतां, नीते प्रापिते, नवचूतबाणे। नूतनकुसुममेव बाणः शरस्तस्मिन्। मधुः सख्युर्मनोभवस्य नामाक्षराणीव द्विरेफान् निवेशयामास। यथा चारुपक्षे उत्तेजनादिशर संस्कारेण समाप्तिं नीते बाणे स्वामिनो नामाक्षराणि निवेश्यन्ते तद्वत् चारुप्रवालोद्गमे सम्पूर्णे चूतकुसुमे वसन्तो भृङ्गान् निवेशितवान्। नामाक्षराणीवेत्युत्प्रेक्षा, नोपमा। इवशब्दस्याप्युत्प्रेक्षाव्यञ्जकत्वात्।। २७ ।।

वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः।
प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः।। २८ ।।

वर्णप्रकर्षे कान्त्यतिशये सत्यपि, कर्णिकारं कर्णिकारद्रुमकुसुमं,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निर्गन्धतया गन्धरहितमिति हेतुना, चेतो दुनोति स्म अदुनोत्, पश्यतां मनः पर्यतपत्। वर्णवत् गन्धोऽपि तस्य किं नाभूदित्याह - प्रायेणेति। विश्वसृजो विधातुः, प्रवृत्तिः चेष्टा, गुणानां सामग्र्यविधौ प्रायेण पराङ्मुखी हि। गुणसामग्र्यकरणे विमुखी प्रायशो भवति। यत्र क्वापि गुणसामग्र्यं दृश्यते। न बहुष्विति दर्शयितुं प्रायेणेत्युक्तम्। प्रायशः एकत्र सम्पूर्णतापादने विमुखो विधिः प्रवर्तत इति भावः।। २८ ।।

बालेन्दुवक्राण्यविकासभावाद् बभुः पलाशान्यतिलोहितानि।
सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम्।। २९ ।।

बालेति। अविकासभावात् विकासरहितत्वात्, बालेन्दुवक्राणि बालेन्दुवद् वक्राणि, अतिलोहितानि पलाशानि पलाशतरुकुसुमानि, बभुः शुशुभिरे। अत्रोत्प्रेक्षते - वसन्तेन भर्त्रा, समागतानां वनस्थलीनां सद्यो नखक्षतानीव, तान्यपि सरक्तत्वादतिलोहितानि तद्वद्दृश्यमानानीवेति।। २९ ।।

लग्नद्विरेफाञ्जनभक्तिचित्रं मुखे मधुश्रीस्तिलकं प्रकाश्य।
रागेण बालारुणकोमलेन चूतप्रवालोष्ठमलञ्चकार।। ३० ।।

लग्नेति। मधुश्रीः वसन्तलक्ष्मीर्मुखे आरम्भे, तिलकं तिलकसंज्ञद्रुम कुसुमं, प्रकाश्य। कीदृशं तिलकम्। लग्नद्विरेफेति। लग्नाः प्रसक्ताः, द्विरेफाः एवाञ्जनभक्तिः अञ्जनविन्यासः, तेन चित्रं, तिलककुसुममुत्पाद्य बालारुण-कोमलेन नूतनारुणवन्मनोहरेण, रागेण रक्तवर्णेन, चूतप्रवालोष्ठं चूतकिसलयाधरं, अलञ्चकार आभूषयत्। यथा काचन विलासिनी कान्तागमनकाले अञ्जनभक्तिचित्रं तिलकं मुखे प्रकाश्य, ललाटे तिलकं कृत्वा निवेश्य, अतिरक्तेन रागेण लाक्षारसेन, ओष्ठमलङ्करोति रञ्जयति, तद्वदिति।

रक्तवर्णेऽनुरागे च रागो लाक्षारसेऽपि च

इति भोजः। अत्र तिलकचूतप्रवालरागौ मधुश्रिया सञ्जनितौ। तत्र श्लेषरूपसामर्थ्यात् उत्प्रेक्षार्थो व्यज्यते।। ३० ।।

मृगाः प्रियालद्रुममञ्जरीणां रजःकणैर्विघ्नितदृष्टिपाताः।
मदोद्धताः प्रत्यनिलं विचेरुर्वनस्थलीर्मर्मरपत्रमोक्षाः।। ३१ ।।

मृगा इति। प्रियालेति। प्रियालसंज्ञद्रुममञ्जरीणां, रजःकणैः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कुसुमरेणुकणैः, विघ्नितदृष्टिपाताः। विघ्नितः प्रतिहतः, दृष्टिपातो नेत्रविक्षेपः, येषां ते। प्रतिहतालोकनसामर्थ्याः इत्यर्थः। मदोद्धताः मदादतिगर्विता एवम्भूता मृगाः प्रत्यनिलं वाताभिमुखं, वनस्थलीः काननभूमीः, विचेरुः परिचक्रमुः। कीदृशीः वनस्थलीः। मर्मरपत्रमोक्षाः। मर्मरशब्दयुक्तः पत्रमोक्षः पर्णपातो, यासां ताः। सशब्दनिपतत्पर्णयुता इत्यर्थः। तदा हि शुष्कानि पर्णानि पतन्ति, नवानि जायन्त इति। राजादनं प्रियालः स्यात् इत्यमरः(२.४.३४)। मर्मरः पत्रशब्दः स्यात् इति भोजः। विघ्नित इति विघ्नोऽस्य सञ्जात इत्यर्थे तदस्य सञ्जातं इति तारकादिभ्य इतच्(पा.सू. ५.२.३६) इति इतच्।। ३१ ।।

चूताङ्कुरास्वादकषायकण्ठः पुंस्कोकिलो यन्मधुरं चुकूज।
मनस्विनीमानविघातदक्षं तदेव जातं वचनं स्मरस्य।। ३२ ।।

चूतेति। चूताङ्कुरास्वादेन कषायः कषायवत्सरसः कण्ठो यस्य स तथा।

रागे क्वाथे कषायोऽस्त्री निर्यासे सौरभे रसे

इति वैजयन्ती(७.५.२२)। पुंस्कोकिलो यन्मधुरं चुकूज इति कूजितप्रागल्भ्यार्थं पुङ्ग्रहणम्। मधुरमिति क्रियाविशेषणम्। पुंस्कोकिलः मधुरं यथा भवति तथा यत् कूजनं कृतवान्, तत् कूजनमेव मनस्विनीमानविघातदक्षं मानिनी-मानहरणक्षमं स्मरस्य तद्वचनं जातम्। हे योषितः, मानं मुञ्चतेति कामस्याज्ञापनमिव जातमित्यभिप्रायः। तदाकर्णनादेव योषितां प्रियेषु अभिमुखीभावादिति ।। ३२ ।।

हिमव्यपायाद् विशदाधराणामापाण्डरीभूतमुखच्छवीनाम्।
स्वेदोद्गमः किम्पुरुषाङ्गनानां चक्रे पदं पत्रविशेषकेषु।। ३३ ।।

हिमेति। हिमव्यपायात् शीतकालापगमात्, विशदाधराणां अलक्तकरसा-र्पणाभावात् निर्मलोष्ठीनां, तथा हिमव्यपायादेवापाण्डरीभूत मुखच्छवीनां कुङ्कुमाद्यनर्पणादीषद्धवलीभूतमुखकान्तीनां स्वाभाविकपाण्डुर त्ववन्मुखयुक्तानां इत्यर्थः। एवम्भूतानां किम्पुरुषाङ्गनानां पत्रविशेषकेषु पत्राकारतिलकेषु स्वेदोद्गमः पदं चक्रे स्थानं कृतवान्। अयमस्याभिप्रायः - हिमव्यपायेन तासामधरमुखयोः स्वेदावकान्तिर्दर्शिता हिमव्यपायजं दाहमपि पत्रविशेषकापनयने तत्स्थानेषु स्व भावकान्तीर्दर्शयिष्यामीति स्वेदोद्गमं पत्रतिलकेषु स्थितं कृतवानिति ।। ३३ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तपस्विनः स्थाणुवनौकसस्तामाकालिकीं वीक्ष्य मधुप्रवृत्तिम्।
प्रयत्नसंस्तम्भितविक्रियाणां कथञ्चिदीशा मनसां बभूवुः।। ३४ ।।

तपस्विन इति। स्थाणुवनौकसः स्थाणुवनवासिनः, तपस्विनः आकालिकीं अकालजातां, तां मधुप्रवृत्तिं वसन्तविजृम्भणं, वीक्ष्य अतीव प्रयत्नेन संस्तम्भिता विक्रिया विकारा येषां, तेषां मनसां कथञ्चिदीशाः प्रभवो बभूवुः। कथञ्चिन्मनोनिग्रहसमर्था आसन् इत्यभिप्रायः। आकालिकीमिति कालाट्ठञ्(पा.सू.४.३.११)।। ३४ ।।

तं देशमारोपितपुष्पचापे रतिद्वितीये मदने प्रपन्ने।
काष्ठागतस्नेहरसानुविद्धं द्वन्द्वानि भावं क्रियया विवव्रुः।। ३५ ।।

तमिति। तं देशं आरोपितपुष्पचापे सज्जीकृतपुष्पाख्यचापे रति द्वितीये रतिरेव द्वितीया यस्य तस्मिन्। केवलरतिसहायः इत्यर्थः। मदने तं देशं वनप्रदेशं, प्रपन्ने प्राप्ते सति। स यदा रत्या सह प्राप्तः तदेत्यर्थः। द्वन्द्वानि वनवासीनि मिथुनानि, भावं क्रियया विवव्रुः। कीदृशं भावम्। काष्ठागतस्नेहरसानुविद्धम्। काष्ठोत्कर्षे सीम्नि चेति वैजयन्ती (६.२.८)। काष्ठां गतेन उत्कर्षं प्राप्तेन परां कोटिं प्राप्तेन, स्नेहरसेनानुविद्धं सहितमिति भावविशेषणमेतत्। रत्याख्यं भावं ललितया चेष्टया प्रकाशयामासुरित्यर्थः। अथवा स्नेहः प्रीतिः, रसो रागस्ताभ्यामनुविद्धमिति।। ३५ ।।

मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः।
शृङ्गेण संस्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः।। ३६ ।।

मध्विति। स्वां प्रियामनुवर्तमानः प्रियया सह वर्तमानो द्विरेफो भ्रमरः, कुसुमैकपात्रे कुसुममेवैकपात्रं तस्मिन्, मधु पपौ। अथवा प्रियामनुवर्तमानः प्रियायाः पश्चाद् वर्तमानः इति। प्रियापीतशेषं मधु तस्मिन्नेव पात्रे पीतवानित्यर्थः। यथा कश्चित् कामी प्रियया सह वा प्रियया पीतशेषं वा मद्यं पिबति तद्वत्। भ्रमरस्य पुष्परसाभिधमधुपाने एकपात्रग्रहणं स्नेहातिशयद्योतनार्थम्। कृष्णसारः कृष्णसाराख्यो मृगः, संस्पर्शनिमीलिताक्षीं स्वभर्तृसंस्पर्शेन निमीलिताक्षीं सुखनिमीलितलोचनां मृगीं, शृङ्गेणाकण्डूयत कण्डूतवान्। तत्रैकपात्रे मधुपानं शृङ्गेण कण्डूयनं चाभ्यां अनुभावाभ्यां

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभिव्यज्यमानो रत्याख्यो भावः। स शृङ्गारात्मना जातः। एवं तिर्यगण्डजादिषु रसजन्माख्या रसोक्तिरलङ्कृतिरियम्।

भावो जन्मानुबन्धोऽथ निष्पत्तिः पुष्टिसङ्करौ।

ह्रासाभासौ ...

इत्यादयश्चतुर्विंशतिसङ्ख्या रसोक्तयः।(सरस्वतीकण्ठाभरणम् ५.९)

वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्च वाङ्मयम्।

सर्वानुग्रहणीं तां तु रसोक्तिं प्रतिजानते।।(५.८) इति ।। ३६ ।।

ददौ सरःपङ्कजरेणुगन्धि गजाय गण्डूषजलं करेणुः।

अर्धोपभुक्तेन बिसेन जायां सम्भावयामास रथाङ्गनामा।। ३७ ।।

ददाविति। करेणुः करिणी, गजाय गण्डूषजलं ददौ। पीत्वा मुखान्तस्थं जलं दत्तवती। जलस्य विशेषणमाह सर इति। सरसि यानि पङ्कजानि तेषां रेणुः परागस्तस्य गन्धो विद्यते यस्य तत् तथा। एवम्भूतं गण्डूषजलं गजाय प्रादात्। यथा काचन योषा सुगन्धिमुखासवं प्रियाय ददाति तद्वत्। ननु पङ्कजरेणुगन्धि इत्येतावता पर्याप्तत्वात् सरःपदं व्यर्थमिति चेत्, उच्यते - नदीजलस्य प्रवाहरूपत्वात् कमलरेणुसुरभित्वं न स्यादिति सरःपदग्रहणमिति न दोषः। रथाङ्गनामा चक्रवाकः। अर्धोपयुक्तेनार्धकबलितेन बिसेन कमलकन्देन जायां सम्भावयामास। अर्धोपयुक्तबिसदानेन प्रियां सम्भावितवान् इत्यर्थः। अत्र करिमिथुनेन गण्डूषजलपानाभ्यां चक्रवाकमिथुनेन अर्धोपयुक्तबिसदानेन भक्षणाभ्याञ्च प्रकाशीभावो रसाभाससंज्ञो भवति। यथोक्तं भोजराजेन(सरस्वती.)

हीनपात्रेषु तिर्यक्षु नायकप्रतियोगिषु।

गौणेषु च पदार्थेषु तमाभासं विजानते।।(५.३०)

पक्षे तिर्यग्गजादीनां समं द्रष्टव्यम् ।। ३७ ।।

गीतान्तरेषु श्रमवारिलेशैः किञ्चित् समुच्छ्वासितपत्रलेखम्।

पुष्पासवाघूर्णितनेत्रशोभि प्रियामुखं किम्पुरुषश्चुचुम्बे।। ३८ ।।

गीतेति। किम्पुरुषः गीतान्तरेषु गीतमध्येषु प्रियामुखं चुचुम्बे। मुखविशेषणमाह - श्रमवारिलेशैः स्वेदजललवैः, किञ्चित्समुच्छ्वासितपत्र लेखं ईषदुच्छ्वसितभक्तिच्छेदम्। पुष्पासवाघूर्णितनेत्रशोभि - पुष्पासवेन आघूर्णिताभ्यां

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नेत्राभ्यां शोभत इति तथा। एवम्भूतं प्रियामुखं किम्पुरुषः चुचुम्बे चुम्बितवान् इति। अत्र गीतान्तरे किन्नर्या मुखार्पणेन किन्नरस्य चुम्बनेन भावप्रकाशनम्। अत्र शृङ्गाररसस्य निष्पत्तिरुक्ता (सरस्वतीकण्ठाभरणम् ५.२६) -

विभावस्यानुभावस्य सात्त्विकव्यभिचारिणोः।
संयोगस्तस्य निष्पत्तिमात्रं निष्पत्तिरिष्यते।। इति।। ३८ ।।

पर्याप्तपुष्पस्तबकस्तनाभ्यः स्फुरत्प्रवालोष्ठमनोहराभ्यः।
लतावधूभ्यस्तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि।। ३९ ।।

पर्याप्तेति। अपिच पर्याप्ताः परिपूर्णाः, पुष्पस्तबकाः कुसुमगुच्छा एव स्तना यासां ताभ्यः। स्फुरदिति। स्फुरन्तः कम्पमानाः प्रवाला एव ओष्ठा यासां तैः मनोहराभ्यः लतावधूभ्यः। तरवोऽपि स्थावरात्मकाः द्रुमा अपि विनम्रशाखाभुजबन्धनानि विनम्राः शाखा एव भुजास्तेषां बन्धनानि अवापुः। यथा पर्याप्तस्तनीभ्यः स्फुरदोष्ठमनोहराभ्यो वधूभ्यः कामिनो भुजालिङ्गनानि लभन्ते, तद्वत् तरवोऽपि लतावधूभ्यः शाखाबन्धनानि लेभिर इत्यर्थः। स्थावरेषु जङ्गमवत् चैतन्यं उक्तम्। अनेन विकारो निरस्तः ।। ३९ ।।

एवं वसन्तं वर्णयित्वाथ प्रकृतमनुसरति -

श्रुताप्सरोगीतिरपि क्षणेऽस्मिन् हरः प्रसङ्ख्यानपरो बभूव।
आत्मेश्वराणां न हि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति।। ४० ।।

श्रुतेति। श्रुता आकर्णिता अप्सरसां गीतयो गानानि येन स तथा। सुराङ्गनानां गेयमाकर्णयन्नपि हरः शम्भुरस्मिन् क्षणे वसन्तागमनकाले प्रसङ्ख्यानपरो बभूव, निर्विकारमनाः समाधिपरः आसीत्। परमात्मानुसन्धानप्रसङ्ख्यानसमाधय इति भोजः। तत्रार्थान्तरन्यासमाह - आत्मेश्वराणां मनोनिग्रहसमर्थानां स्ववशमनसां, विघ्ना जातु कदाचिदपि समाधिभङ्गप्रभवः समाधिभेदसमर्था न भवन्ति हि यस्मादिति।। ४० ।।

लतागृहद्वारगतोऽथ नन्दी वामप्रकोष्ठार्पितहेमवेत्रः।
मुखार्पितैकाङ्गुलिसंज्ञयैव मा चापलायेति गणान् व्यनैषीत्।। ४१ ।।

लतेति। लतागृहद्वारगतः शिवलतागृहस्य द्वारं प्राप्तः। द्वारि स्थित इत्यर्थः। वामेति। दक्षिणहस्तस्य गणशासनार्थं मुखे समर्पणात्, वामहस्तप्रकोष्ठे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अर्पितं हेमवेत्रं येन स तथा। वेत्रलताकृतो दण्डो वेत्रशब्देनोच्यते। प्रकोष्ठशब्देन कोर्पराधोभाग उच्यते। वामप्रकोष्ठस्थापित सुवर्णमयवेत्र इत्यर्थः। एवम्भूतो नन्दी शिवद्वारपालः, अथानन्तरं, नासार्पितैकाङ्गुलिसंज्ञयैव नासार्पिततर्जनीसूचनया, मा चापलायेति गणान् व्यनैषीत्। चापलं गन्तुं मा भूतेति गणाननुशशास। संज्ञाशब्दोऽत्र सूचनायां वर्तते। संज्ञा स्याच्चेतना नाम हस्ताद्यैरर्थशासनेत्यमरः (३.३.३३)। अत्र चापलायेति चतुर्थ्या दुर्घटत्वादर्थान्तरं ब्रूमः। चापलाया इति प्रथमैक वचनम्। आयानमाया। आतश्चोपसर्गे(पा.सू.३.३.१०६) इत्यङ्प्रत्ययः। चापलस्यायानं चापलाया, सा माभूत्। युष्माकं चपलत्वं चापलम्। युष्माभिश्चापलं विहाय एकाग्रचित्तैर्भवितव्यमित्यभिप्रायेण एकाङ्गुलिसूचना कृता इति।। ४१ ।।

निष्कम्पवृक्षं निभृतद्विरेफं मूकाण्डजं शान्तमृगप्रचारम्।
तच्छासनात् काननमेव सर्वं चित्रार्पितारण्यमिवावतस्थे।। ४२ ।।

निष्कम्पेति। तच्छासनान्नन्दिशासनात् तत् सर्वं काननमेव चित्रार्पितारण्यमिवावतस्थे। चित्रार्पिता आलेख्यलिखिता आरण्या अरण्योद्भवाः पक्षिमृगादयो यस्मिन् तत् तथा। चित्रार्पिततरुपक्षिमृगादिकमिव अरण्यं स्थितमासीत्।

तदेव विशेषणैर्व्यनक्ति - निष्कम्पवृक्षं चलनरहितद्रुमम्। निभृतद्विरेफं भ्रमणरहितभ्रमरम्। मूकाण्डजं निःशब्द विहगम्। शान्तमृगप्रचारं शान्तो मृगप्रचारो यत्र तद्। विरतहरिणादि प्राणिसञ्चारमित्यर्थः। एवम्भूतं तद्वनमेव तथाभूत्। किं पुनर्गणाः स्थिरा आसन्निति विवक्षाशेषः। अत्र चतुर्विधानामपि निश्चलत्वमासीद् इति द्योतयितुं चत्वारि विशेषणानि कृतानि। भूतानां भेदश्च भोजराजेन दर्शितं दर्शयामः -

उद्भिज्जा वृक्षगुल्माद्याः पक्षिसर्पादयोऽण्डजाः।
स्वेदजाः कृमिदंशाद्या नृमृगाद्या जरायुजाः।। इति।

अवतस्थ इति समवप्रविभ्य स्थः(पा.सू.१.३.२२) इत्यात्मनेपदम्।। ४२ ।।

दृष्टिप्रतीपं परिहृत्य तस्य कामः पुरः शुक्रमिव प्रयाणे।
प्रान्तेषु संसक्तनमेरुशाखं ध्यानास्पदं भूतपतेर्विवेश।। ४३ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दृष्टीति। अथ कामः भूतपतेः शम्भोः, ध्यानास्पदं समाधिस्थानं लतागृहं, विवेश। कीदृशं तत्। प्रान्तेषु परिसरेषु, संसक्तनमेरुशाखं, संसक्ताः क्षितितलपर्यन्तं निरन्तरमाश्लिष्टा नमेरुद्रुमशाखा यत्र तत् तथा। किं कृत्वा। तस्य हरस्य दृष्टिप्रतीपं नेत्रप्रतिमुखप्रदेशं, परिहृत्य वर्जयित्वा। किमिव। प्रयाणे पुरः शुक्रमिव। यात्रायां यथा शुक्रं वर्जयन्ति तद्वत्, रुद्रस्य दृष्ट्यभिमुखं परिहृत्य, यथा हरो न पश्यति। कामः शिवायतन समीपं प्रविष्टवानित्यर्थः। पुरः शुक्रदृष्टीक्षणं यात्राविधानेन दर्शितम् -

आग्नेयाद्यास्तारकाः साभिजित्काः प्रागाद्याशासंश्रिताः सप्त सप्त।
यस्यां तिष्ठेद् भार्गवो दिश्यमुष्यां यात्रा पुंसां प्राणमानार्थहन्त्री।। इति।।

स देवदारुद्रुमवेदिकायां शार्दूलचर्मव्यवधानवत्याम्।
आसीनमासन्नशरीरपातस्त्रियम्बकं संयमिनं ददर्श।। ४४ ।।

स इति। शार्दूलचर्मव्यवधानवत्यां व्याघ्रचर्माच्छादितायां देवदारु द्रुमवेदिकायां देवदारुसंज्ञकद्रुममूलभूमौ आसीनम्। देवदारुद्रुमवेदिकायां शार्दूलचर्मणि निषण्णमित्यर्थः। संयमिनं संयमयुक्तं विषयव्यावृत्तेन्द्रियं, त्रियम्बकं त्रिनेत्रं देवं, स कामो ददर्श। कीदृशः सः। आसन्नः समीपवर्ती शरीरपातो देहविध्वंसो यस्य सः। क्षणकालभाविशरीरनाश इत्यर्थः।

अत्र त्रियम्बकः, त्र्यम्बक इति उभयथापि नाम्नो विद्यमानत्वात्, त्रियम्बकं नान्यमुपस्थितासौ(१.३) इति भर्तृकाव्ये प्रयोगाच्च नामव्युत्पादनं संज्ञायां, संज्ञादयो बहुलं भवन्तीति। अथवा त्रीन् कान्त्यात्येति प्राप्नोतीति त्रियं त्रिकालव्यापि अम्बकं चक्षुर्यस्य स त्रियम्बक इति। क्षतत्राणात्क्षत्रं, पूति त्राणात् पुत्र इति आदिपदस्यापि सा पुनर्ग्राह्या।। ४४।।

त्रियम्बकस्य विशेषणानि उत्तरैः श्लोकैराह -

पर्यङ्कबन्धस्थिरपूर्वकायमृज्वायतं सन्नमितोभयांसम्।
उत्तानपाणिद्वयसन्निवेशात् प्रफुल्लराजीवमिवाङ्कमध्ये।। ४५ ।।

पर्यङ्केति। पर्यङ्कः परिपार्श्वः। पर्यङ्कः परिपार्श्वेऽपीति भोजः। पर्यङ्कबन्धेन परिपार्श्वबन्धनेन। उड्यानबन्धनेनेत्यर्थः। उड्यानबन्धं द्विविधम्, बाह्यमान्तरञ्च। यथोक्तं योगरत्नकोशे -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्राणापानिरोधार्थमन्तरे नाभिमेढ्रयोः।
तन्तुचर्मादिना गाढं कुर्यादुड्यानबन्धनम्।।
ऊर्ध्वं समाकृष्य शनैरपानं प्राणस्य चापाननिरोधनेन।
मध्ये तयोः स्थापनमैक्ययोगादुड्यानबन्धं मुनयो वदन्ति।। इति।

उड्यानबन्धेन स्थिरः पूर्वकायो यस्य। तन्नाभेरुपरितनः कायः पूर्वकायः। अधस्तनोऽपरकायः, उड्यानबन्धनेन निश्चलपूर्वशरीरमित्यर्थः। ऋज्वायतम् ऋजुश्चायतञ्च। ऋजुत्वादायतमित्यर्थः। सन्नमितोभयांसम्, अङ्के पाणि द्वयस्य सन्निवेशात् संस्थापनाद् अंसद्वयं नमितं भवति। तथा सन्नमित उभयः अंसः स्कन्धो यस्य तम्। उपनतांसं सन्नमितांसद्वयमित्यर्थः। उत्तान पाणिद्वयसन्निवेशात् उत्तानस्य ऊर्ध्वमुखस्य पाणिद्वयस्य सन्निवेशात् संस्थापनाद् अङ्कमध्ये प्रफुल्लराजीवमिव विकासितारुणाम्बुजयुक्तमिव दृश्यमानं त्र्यम्बकं ददर्शेति पूर्वेण सम्बन्धः। पर्यङ्कबन्ध आसन विशेषणमिति केचिदाहुः।

एकं योनिपदे निधाय सुदृढं पादादिमन्यं पुनः
मेढ्यं मध्यमबन्धनात् स्थिरमृजुं देहं समं धारयेत्।
उत्तानं करयुग्ममूरुयुगले विन्यस्य नासाग्रदृक्
तिष्ठेद् ध्यानपरायणो यदि मुनिः सिद्धासनं तद् विदुः।।

इति योगरत्नकोशोक्तं सिद्धासनमिह कथ्यते।। ४५ ।।

भुजङ्गमोन्नद्धजटाकलापं करावसक्तद्विगुणाक्षसूत्रम्।
कण्ठप्रभाभ्यङ्गविशेषनीलां मृगत्वचं ग्रन्थिमतीं दधानम्।। ४६ ।।

भुजङ्गमेति। भुजङ्गमोन्नद्धजटाकलापं भुजङ्गमेनोन्नद्ध ऊर्ध्वं बद्धः जटाकलापो जटासमूहो येन तम्। करेति। ध्यानकाले जपाभावात् करे अवसक्तं आसक्तं द्विगुणं द्विगुणीकृतमक्षसूत्रं यस्य तम्। कण्ठेति। अतिनीलस्य कण्ठस्य कण्ठप्रभाया अभ्यङ्गेन स्नपनेन संसर्गेण विशेषनीलां अधिककृष्णाम्। ग्रन्थिमतीं कण्ठे ग्रन्थियुक्ताम्। मृगत्वचं वसानम् परिदधानमिति।। ४६ ।।

विशेषणान्तरमाह -

किञ्चित् प्रकाशस्तिमितोग्रतारैर्भ्रूविक्रियायां विरतप्रसङ्गैः।
नेत्रैरविस्पन्दितपक्ष्ममालैर्लक्ष्यीकृतघ्राणमधोमयूखैः।। ४७ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

किञ्चिदिति। किञ्चिन्नेत्रैः लक्षीकृतघ्राणं शरप्रहारादिषु एकाग्रचित्ततया सम्यग् अवलोकनस्थानं लक्ष्यमित्युच्यते। तद्धर्मोऽत्र समाधौ नेत्रैः सम्यग् अवलोक्यमाने घ्राणे संनीयते। नेत्रैरश्रान्तं आलोकितनासिकाग्रमित्यर्थः। तथा चोक्तं वसिष्ठेन -

अपश्यन् अन्यतः स्वीयं नासाग्रमवलोकयन्

इति। नेत्राणां विशेषणान्याह - किञ्चित्प्रकाशेति। नेत्राणां ईषन्निमीलित त्वात् किञ्चित्प्रकाशात् किञ्चिद् आलक्ष्याः स्तिमिता निश्चला उग्रास्ताराः कनीनिका येषां तैः। भ्रूविक्रियायां विरतप्रसङ्गैः। विरतभ्रूविकार सप्रसङ्गैरित्यर्थः। अविस्पन्दितपक्ष्ममालैरचलितचक्षुःसमूहैः। अधोमयूखैः अधोमुखरश्मिभिः। भ्रूपक्ष्मताराणां निश्चलत्वेन नेत्राणां निर्व्यापारत्वं च व्यज्यते।। ४७ ।।

स्तम्भितपवनत्वात् निश्चलस्य तस्योपमाविशेषणमाह -

अवृष्टिसंरम्भमिवाम्बुवाहमपामिवाधारमनुत्तरङ्गम्।

अन्तश्चराणां मरुतां निरोधान्निवातनिष्कम्पमिव प्रदीपम्।। ४८ ।।

अवृष्टीति। अन्तश्चराणां मरुतां निरोधादिति सर्वत्र योज्यम्। शरीरान्तर्वर्तिनां प्राणादीनां वायुना नियमनाद् हेतोः अवृष्टिसंरम्भं अम्बुवाहमिव वृष्टिसम्भ्रमरहितं महामेघमिव ... अनेन मरुतां अधःप्रदेश वृत्त्यभावः सूचितः। अनुत्तरङ्गं अभङ्गम्। अनुद्भूततरङ्गमित्यर्थः। अपां जलानां, आधारमिव आश्रयमिव। ह्रदमिवेत्यर्थः। अनेन मरुतां ऊर्ध्वप्रदेश प्रवृत्त्यभावः सूचितः। निवातनिष्कम्पं निर्वायुनिश्चलम्। निर्वायुदेशनिश्चलं इत्यर्थः। प्रदीपमिव। अनेन मरुतां तिर्यक्प्रदेशप्रवृत्त्यभावः सूचितः।। ४८

कपालनेत्रान्तरलब्धमार्गैर्ज्योतिःप्ररोहैरुदितैः शिरस्तः।

मृणालसूत्राधिकसौकुमार्यां बालस्य रश्मिं ग्लपयन्तमिन्दोः।। ४९ ।।

कपालेति। शिरस्त उदितैः मस्तकाद् उद्गतैः, ज्योतिःप्ररोहैः तेजोङ्कुरैः, मृणालसूत्राधिकसौकुमार्यां बालस्येन्दोः रश्मिं ग्लपयन्तं, मृणालसूत्राद् अतिसुकुमाराद् बालचन्द्रस्य किरणान् म्लानान् कुर्वन्तम्। कीदृशैः ज्योतिःप्ररोहैः। कपालनेत्रान्तरलब्धमार्गैः। कपालशब्देन कपालस्थितं ब्रह्मरन्ध्रमुच्यते। नेत्रान्तरं भ्रूमध्यं कपालनेत्रान्ते लब्धमार्गैः लब्धप्रचारैः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अयमभिप्रायः - नियमितप्राणा योगिनः समाधौ कुण्डलिनीरूपं आत्मतेजो मूलाधाराद् उत्थाप्य क्रमात् सुषुम्नान्तरे नाभि-हृदय-भ्रूमध्य-ब्रह्मरन्ध्र स्थानानि नीत्वा व्योमाम्भोजस्थितपरमात्मना योजयन्ति। शिवेनापि तद्वदुन्नीत तेजोवयवैः मौलीन्दुकान्तिहानिरासीदिति। यथोक्तं मार्कण्डेयेन योगशास्त्रे -

मूलाधारात् समुत्थाप्य सौरं ज्योतिस्तटित्प्रभम्।
भ्रूमध्यचक्रमार्गेण ब्रह्मरन्ध्रं नयेत् क्रमात्।।
ब्रह्मरन्ध्रं विनिर्भिद्य मस्तकादुत्थितं क्रमात्।
योजयेदमृतस्राविव्योमाम्भोजस्थितेन्दुना।। इति।

अत्र केचिद् असङ्गतानि बहुधा व्याख्यानानि कुर्वन्ति।। ४९ ।।

मनो नवद्वारनिषिद्धवृत्ति हृदि व्यवस्थाप्य समाधिवश्यम्।
यमक्षरं क्षेत्रविदो विदुस्तमात्मानमात्मन्यवलोकयन्तम्।। ५० ।।

मन इति। नवद्वारनिषिद्धवृत्ति -

नयने श्रवणे द्वे द्वे नासिके वदनं तथा।
पायूपस्थौ च देहेऽस्मिन् नवद्वाराणि देहिनाम् ।।

इति नवद्वारेभ्यो निषिद्धा निवारिता वृत्तिर्यस्य तत्। मनः हृदि व्यवस्थाप्य,

पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखम्(याज्ञिक्युपनिषत् ११.६)

इति श्रुतिशतैः हृदये स्थिरं निधाय तमात्मानं परमात्मानं आत्मनि अवलोकयन्तमिति। परमात्मभूते स्वस्मिन्नेव साक्षात् कुर्वन्तम्। आत्म विशेषणमाह समाधिवश्यमिति। चित्तैकाग्रतया वशवर्तिनं यं क्षेत्रविदः आत्मज्ञा योगिनः अक्षरमविनाशिनं विदुः जानन्ति। एवम्भूतं त्रियम्बकं ददर्शेति पूर्वक्रियायां सम्बद्धः। ते हि न दमादिकं ... । कं नामाद्याबद्धविशेषः।

ननु प्राणानामेव नवद्वारे निर्गमनिषेधवेद्यते मनसा कथं स्यात्। अतो निषिद्धनवद्वाराणां मनो बहिर्विषयान् अनुधावति। तस्मादनुपपन्नोऽयं प्रयोग इति चेदत्र गतिमनुब्रूमः। केवलं मनोग्रहणे तथा स्यात्। इह तु कारणभूतैः प्राणैः समवेतं तत्कार्यं मनो गृह्यते। तथा चोक्तमुपनिषदि - अन्नाद् भवति भूतानां मन इति। तस्मात् पटे तन्तुवन्मनसि प्राणानामन्तर्भावान्न दोषः।। ५० ।।

तं दृष्ट्वा किं कृतवानित्याह -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्मरस्तथाभूतमयुग्मनेत्रं पश्यन्नदूरान्मनसाप्यधृष्यम्।

नालक्षयत् साध्वससन्नहस्तः स्रस्तं शरं चापमपि स्वहस्तात्।। ५१ ।।

स्मर इति। तथाभूतं मनसाप्यधृष्यं अपरिभवनीयं अयुग्मनेत्रं त्रिलोचनं अदूराद् अदूरमाश्रित्य समीपे स्थित्वा पश्यन् स्मरः साध्वससन्नहस्तः। स्रस्तं शरं चापमपि स्वहस्तात्। तद्दर्शनभयात् प्रकम्पितहस्तः स्वहस्तात् स्रस्तं शरं चापं च नालक्षयत्। न ज्ञातवानित्यर्थः। अदूरादिति ल्यब्लोपे पञ्चमी।। ५१ ।।

अस्मिन् अन्तरे किमासीदित्याह -

निर्वाणभूयिष्ठमथास्य वीर्यं सन्धुक्षयन्तीव वपुर्गुणेन।

अनुप्रयाता वनदेवताभिरदृश्यत स्थावरराजकन्या।। ५२ ।।

निर्वाणेति। अथानन्तरं, निर्वाणभूयिष्ठं नष्टप्रायम्। निर्वाणशब्दः कर्तरि निष्ठान्तः। निर्वाणो दीप इतिवत्। निर्वाणोऽवाते(पा.सू.८.२.५०) इति णत्वम्। प्रायेण नष्टमिव स्थितमस्य कामस्य वीर्यं बलं वपुर्गुणेन स्वशरीरसौन्दर्येण सन्धुक्षयन्तीव सन्दीपयन्तीव। धुक्षणं सन्दीपनम्। सन्दीपनं धुक्षणं स्यादिति। वनदेवताभिरनुप्रयाता। ततोऽत्र स्त्रिय एव वनदेवतासख्यः। ताभिरतीवादराद् अनुगम्यमाना स्थावरराजकन्या गिरीन्द्र जन्या पार्वती अदृश्यत। तत्र दृष्टाऽभूत्। हरसेवार्थं गौरी तत् स्थानं आगतेत्यर्थः ।। ५२ ।।

अशोकेत्यादिश्लोकचतुष्टयेन तस्या विशेषणान्याचष्टे -

अशोकनिर्भर्त्सितपद्मरागमाकृष्टहेमद्युतिकर्णिकारम्।

मुक्ताकलापीकृतसिन्धुवारं वसन्तपुष्पाभरणं वहन्ती।। ५३ ।।

अशोकेति। वसन्तपुष्पाभरणं वहन्ती वसन्तपुष्पमेवाभरणं तत्कालश्लाघ्यत्वात् तद् बिभ्राणा। जातावेकवचनम्। वसन्तपुष्पाण्येवाभरणानि दधाना। दध धारणे। तदेव विशिनष्टि - अशोकनिर्भर्त्सितपद्मरागम्। अशोकैर्निर्भर्त्सितस्तिरस्कृतः पद्मरागो मणिर्येन तत्। तल्लौहित्यात् पद्मरागसमानाशोककुसुमयुक्तमित्यर्थः। आकृष्टेति। आकृष्टा- निन्दिता हेमद्युतिः यैः तानि कर्णिकाराणि आरग्वधकुसुमानि विद्यन्ते यत्रेति। हेमसमकर्णिकारोपेतमित्यर्थः। मुक्ताकलापीकृतसिन्धुवारम्। मुक्तादाम मौक्तिकभूषणं वा मुक्ताकलापः। मुक्ताकलापीकृतानि सिन्दुवाराख्यकुसुमानि यत्र तत्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मुक्ताहारानुरूपसिन्दुवारकुसुमसहितं इत्यभिप्रायः। निर्गुण्डी सिन्दुवारः स्यात् इति। एवम्भूतं वसन्तपुष्पाभरणं वहन्ती सादृश्यतेति पूर्वेण सम्बन्धः।। ५३ ।।

आवर्जिता किञ्चिदिव स्तनाभ्यां वासो वसाना तरुणार्करागम्।
सञ्जातपुष्पस्तबकावनम्रा सञ्चारिणी पल्लविता लतेव।। ५४ ।।

आवर्जितेति। स्तनाभ्यां किञ्चिद् आवर्जिता आनमितेव। तरुणार्करागं बालार्करागो यस्य तदिति वसन्तकालोचितं वासोऽशुकं वसाना। तदानीं उपमामाह - सञ्जातपुष्पस्तबकावनम्रा पल्लविता सञ्जातकिसलया सञ्चारिणी लतेव दृश्यमाना। अत्र गौरीलतयोः स्तनस्तबकयोः रक्तवासःपल्लवयोश्च साम्यं द्रष्टव्यम्।। ५४ ।।

स्रस्तां नितम्बादवलम्बमाना पुनः पुनः केसरदामकाञ्चीम्।
न्यासीकृतां स्थानविदा स्मरेण मौर्वीं द्वितीयामिव कार्मुकस्य।। ५५ ।।

स्रस्तामिति। नितम्बात् स्रस्तां पतन्तीं केसरदामकाञ्चीं बकुल-कुसुममालाकाञ्चीं मुहर्मुहुरवलम्बमाना यथास्थानं नीत्वा करेण गृह्णती। काञ्चीं उत्प्रेक्षते - स्थानविदा स्मरेण न्यासीकृताम्। अस्मिन् स्थाने निक्षिप्तं इदमापदि मया सुलभमिति निक्षेपस्थानज्ञेन कामेन निक्षिप्तां स्वकार्मुकस्य द्वितीयां मौर्वीमिव तस्या नितम्बे केसरदामकाञ्चीमिव लम्बमानेति। तस्या नितम्बे केसरदामकाञ्ची स्थिता। सा कामेन न्यासीकृता चापस्य द्वितीयमौर्वीत्युत्प्रेक्षा।।

सुगन्धिनिश्वासविवृद्धतृष्णं बिम्बाधरासन्नचरं द्विरेफम्।
प्रतिक्षणं सम्भ्रमलोलदृष्टिर्लीलारविन्देन निवारयन्ती।। ५६ ।।

सुगन्धीति। सुगन्धौ निश्वासे विवृद्धा तृष्णा यस्य तम्। बिम्ब फलवल्लोहितः अधरोष्ठः बिम्बाधरः। शाकपार्थिवादित्वात् मध्यपदलोपी समासः। तस्यासन्ने समीपे चरन्तं द्विरेफं सम्भ्रमलोलदृष्टिः सती लीलारविन्देन प्रतिक्षणं निवारयन्ती निषेधयन्ती।। ५६ ।।

ततः किमासीदित्याह -

तां वीक्ष्य सर्वावयवानवद्यां रतेरपि प्रीतिमिवादधानाम्।
यतेन्द्रिये शूलिनि पुष्पकेतुः स्वकर्मसिद्धिं पुनराशशंसे।। ५७ ।।

तामिति। सर्वावयवानवद्यां सर्वेष्ववयवेषु अनवद्यां अनिन्द्यां सर्वाङ्गेषु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दोषरहितां रतेरपि प्रीतिमादधानामिव अनादृतान्यरूपायाः कामपत्न्या अपि स्वरूपेण सन्तोषं उत्पादयन्तीमिव। अत्र रतेः प्रीत्युत्पादनं विरुध्यत इति विरोधालङ्कारद्योतनार्थमपिशब्दः।

रतिप्रीत्योर्भेदो भोजेन दर्शितः (सरस्वतीकण्ठाभरणम् ५.१३८) -

मनोनुकूलेष्वर्थेषु सुखसंवेदनं रतिः।

असम्प्रयोगविषया सैव प्रीतिर्निगद्यते।। इति।

रतेरपि व्रीळमिवादधानामिति केचित् पठन्ति। स्वरूपशोभया रतेरपि लज्जां जनयन्तीमिवेत्यर्थः। एवम्भूतां तां वीक्ष्य पुष्पकेतुः यतेन्द्रिये उपरतेन्द्रिय व्यापारेऽपि शूलिनि रुद्रे स्वकर्मसिद्धिं पुनराशशंस। जितेन्द्रियमपि हरं अनया वशीकरिष्यामि, अनया तद्विशेषकर्म कार्यसिद्धिः मम भविष्यतीति पुनः पुनरुक्तवानित्यर्थः।। ५७ ।।

भविष्यतः पत्युरुमा च शम्भोः समाससाद प्रतिहारभूमिम्।

योगात् स चान्तः परमात्मसंज्ञं दृष्ट्वा परं ज्योतिरुपारराम।। ५८ ।।

भविष्यत इति। उमा च पत्युः भविष्यतः शम्भोः प्रतिहारभूमिं गृहद्वारप्रदेशं समाससाद सम्प्राप। स शम्भुश्चान्तः हृदये परमात्मसंज्ञं परं ज्योतिः दृष्ट्वा साक्षात्कृत्य योगात् समाधेः उपारराम उपरतोऽभूत्। परमात्मनः साक्षात्कारपर्यन्तो हि समाधिः। यदा सा प्राप दैवयोगाद् उपारराम इति द्वयोः इतिक्रिययोः समकालत्वद्योतनाय उभौ चशब्दौ। उपाररामेति व्याङ्परिभ्यो रमः (पा.सू. १.३.८३) इति परस्मैपदम्। स्त्री द्वार्द्वारं प्रतीहारः(२.२.१६) इत्यमरः।।

ततो भुजङ्गाधिपतेः फणाभिरधः कथञ्चिद्धृतभूमिभागः।

शनैः कृतप्राणविमुक्तिरीशः पर्यङ्कबन्धं निबिडं बिभेद।। ५९ ।।

तत इति। ततोऽनन्तरं, भुजङ्गाधिपतेः सर्पराजस्य, फणाभिः शिरोभिः, अधः क्षिततलादधस्तात् कथञ्चिद् विश्वात्मनस्तस्य भारस्याति दुर्वहत्वात् प्रयत्नेन धृतभूमिभागः स्वावस्थानभूमिः। शेषफणाभिर्धृतो भूमिभागः भूप्रदेशो यस्य सः। प्राणायामे कृते सति शरीरस्य लाघवं भवति। प्राणायामस्य निवृत्तौ प्राग्वदेव गौरवं भवतीत्यभिप्रायेणाह - शनैः कृतप्राणविमुक्तिः इति। शनैः कृतानां नियमितानां प्राणानां विमुक्तिः विसर्जनं येन सः। रेचितप्राण इत्यर्थः। एवम्भूत

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ईश्वरः निबिडं निच्छिद्रं पर्यङ्कबन्धं बिभेद विनष्टवान्। अवासादयद् इत्यर्थः।।

तस्मै शशंस प्रणिपत्य नन्दी शुश्रूषया शैलसुतामुपेताम्।

प्रवेशयामास च भर्तुरेनां भ्रूक्षेपमात्रानुमतप्रवेशाम्।। ६० ।।

तस्मायिति। अथ नन्दी प्रणिपत्य प्रणम्य, शुश्रूषया प्रतिदिनं विधीयमानायाः परिचर्याया हेतुना शैलसुतामुपेतां तस्मै शशंस। सेवार्थं गौरी उपेता उपागतेति शिवाय विज्ञापयामास। भर्तुः स्वामिनः भ्रूक्षेपमात्रानुमतप्रवेशां भ्रूक्षेपमात्रेण अनुज्ञातान्तरागमनामेनां नन्दी अन्तः प्रवेशयामास च। एककर्तृकयोः क्रिययोः समुच्चयार्थः चकारः।। ६० ।।

तस्याः सखीभ्यां प्रणिपातपूर्वं स्वहस्तलूनः शिशिरात्ययस्य।

व्यकीर्यत त्र्यम्बकपादमूले पुष्पोच्चयः पल्लवभङ्गभिन्नः।। ६१ ।।

तस्या इति। तस्याः सखीभ्यां विजयामालिनीभ्यां स्वहस्तलूनः स्वहस्तैरवचितः पल्लवभङ्गभिन्नः किसलयखण्डमिश्रितः शिशिरात्ययस्य वसन्तस्य पुष्पोच्चयः पुष्पराशिः त्र्यम्बकपादमूले प्रणिपत्य पूर्वं व्यकीर्यत। शिवचित्तपरीक्षार्थं उमाप्रणामात् पूर्वमेव नमस्कृत्य शिवपादमूले वसन्तकुसुमौघविकिरणं सखीपुष्पराशिभ्यां कृतमित्यभिप्रायः।। ६१ ।।

उमापि नीलालकमध्यशोभि विस्रंसयन्ती नवकर्णिकारम्।

चकार कर्णच्युतपल्लवेन मूर्ध्ना प्रणामं वृषभध्वजाय।। ६२ ।।

उमेति। नीलालकमध्यशोभि नीलानां अलकानां मध्ये परभागलाभात् शोभमानं नवकर्णिकारं विस्रंसयन्ती निपातयन्ती उमापि कर्णच्युतपल्लवेन मूर्ध्ना वृषभध्वजाय शिवाय, प्रणामं चकार। नमस्कारं कृतवती। पूर्वं सख्यौ प्रणेमतुः, अनन्तरमुमा प्रणनामेत्यभिप्रायेणापिशब्दग्रहणं कृतम्।।

अनन्यभाजं पतिमाप्नुहीति सा तथ्यमेवाभिहिता भवेन।

न हीश्वरव्याहृतयः कदाचित् पुष्णन्ति पाके विपरीतमर्थम्।। ६३ ।।

अनन्येति। अनन्यभाजम्। अन्यां स्त्रियं न भजत इत्यनन्यभाक्। अन्यशब्दस्य सर्वनामत्वात् पुंवद्भावः। अन्ययोषिद्विमुखं पतिमाप्नुहि लभस्वेति, सा गौरी, भवेन तथ्यमेवाभिहिता सत्यमेवोक्ता। भव्यमेवेति केचित् पठन्ति। भव्यं भवितव्यम्। भावीत्यर्थः। भ्रूविलासिगुणेनेत्यर्थः। ग्रहणादभिदधातेरपि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्विकर्मकत्वम्। तथ्यत्वमेवोपपादयति। ईश्वरव्याहृतयः ईश्वराणां महात्मनां उक्तयः, कदाचिदपि पाके फलकाले विपरीतं अर्थं अन्यथाभवमर्थं न पुष्णन्ति। उक्तमेवार्थं साधयन्तीत्यर्थः। लोके विपरीतमर्थमिति केषाञ्चित् पाठः।। ६३ ।।

कामस्तु बाणावसरं प्रतीक्ष्य पतङ्गवद् वह्निमुखं विविक्षुः।

उमासमक्षं हरबद्धलक्ष्यः शरासनज्यां मुहुराममर्श।। ६४ ।।

काम इति। कामः पतङ्गवत् वह्निमुखं विविक्षुः पतङ्गो यथा अग्नि मुखं विशति तद्वत् शिवतपोविघ्नकरणोद्योगेन हरलोचनाग्निमुखं विविक्षुः प्रवेष्टुं इच्छुः इच्छन्। लट्। उमासमक्षं गौरीसन्निधौ, हरबद्धलक्ष्यः हर एव बद्धं लक्ष्यं येन। कल्पितहराख्यलक्ष इत्यर्थः। स कामो बाणावसरं प्रतीक्ष्य शरसन्धानकालं प्रतीक्षमाणो धनुर्ज्यां मुहुरामृष्टवान्।। ६४ ।।

अथोपनिन्ये गिरिशाय गौरी तपस्विने ताम्ररुचा करेण।

विशोषितां भानुमतो मयूखैर्मन्दाकिनीपुष्करबीजमालाम्।। ६५ ।।

अथेति। अथ गौरी ताम्ररुचा करेण तपस्विने गिरिशाय भानुमतो मयूखैः विशोषितां मन्दाकिनीपुष्करबीजमालां उपनिन्ये प्रायच्छत्। अत्र सयौवनानामपि कन्यानां मुनिशुश्रूषा लोके नाभिशङ्कनीया इति तद्योग्यतादर्शनार्थं तपस्विन इत्युक्तम्। ताम्ररुचेति करस्य मनोहरतोक्तिः। तपस्विनां तादृशमेवाभीष्टमिति पद्माक्षमालादानमुक्तम्।। ६५ ।।

प्रतिग्रहीतुं प्रणयिप्रियत्वात् त्रिलोचनस्तामुपचक्रमे च।

सम्मोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणम्।। ६६ ।।

प्रतीति। प्रणयिप्रियत्वात् प्रणयिनि प्रणयित्वात्। प्रणयिनः स्नेहयुक्ताः भक्ताः प्रार्थयितारो वा। प्रणयः स्नेहयाच्ञयोः इति भोजः। तत्प्रियत्वात् त्रिलोचनः तां गङ्गापद्माक्षमालां प्रतिग्रहीतुमुपचक्रमे उपक्रान्तवान्। तत्प्रतिग्रहाय हस्तं प्रसारितवानित्यर्थः। तदैव पुष्पधन्वा कामः, सम्मोहनं नाम सम्मोहनाख्यं, अमोघं अवन्ध्यं सफलं, बाणं समधत्त समयोजयत्। भिन्नकर्तृकयोः क्रिययोः समकालप्रवृत्तिदर्शनार्थं उभौ चशब्दौ। कामबाणपञ्चकनामान्युक्तानि ग्रन्थान्तरे -

द्रावणः क्षोभणश्चान्यवशीकरण इत्यपि।

आकर्षणश्च कामस्य बाणः सम्मोहनोऽपरः।। इति ।। ६६ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तदा हरस्य स्थितिमाह -

हरस्तु किञ्चित्परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।

उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि।। ६७ ।।

हर इति। प्रकृतार्थानुसन्धाने आनन्तर्ये वा तुशब्दः। चन्द्रोदयारम्भे अम्बुराशिरिव किञ्चित् परिवृत्तधैर्यः ईषदपगतधैर्यो हरः बिम्बफलाधरोष्ठे उमामुखे विलोचनानि व्यापारयामास प्रवर्तयामास। त्रिभिरपि नेत्रैरुमामुखं अवलोकयामास इत्यर्थः। अत्र बिम्बोष्ठत्वादिमनोनुकूले पार्वतीमुखे विलोचनव्यापारानुमेयो हरस्याभिलाषविशेषो रत्याख्यस्थायिभावो भवतीति रसस्य भावावस्था दर्शिता।

मनोनुकूलेष्वर्थेषु सुखसंवेदनं रतिः इति लक्षणम्।

आलम्बनविभावेभ्यः स्वेभ्यः स्वेभ्यः समुन्मिषन्।

रसो रत्यादिरूपेण भाव इत्यभिधीयते।।

इति भावलक्षणम्।

भावो जन्मानुबन्धोऽर्थनिष्पत्तिः पुष्टिसंकरौ

इत्यादयो रसोक्तयः (सरस्वतीकण्ठाभरणम् ५.९, १३)।। ६७ ।।

विवृण्वती शैलसुतापि भावमङ्गैः स्फुरद्बालकदम्बकल्पैः।

साचीक्रियाचारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन।। ६८ ।।

विवृण्वतीति। न केवलं हरस्य रतिरभूत्, पार्वत्या अपि रत्यनु- बन्धो जात इति द्योतयितुं अपिशब्दः प्रयुक्तः। स्फुरद्बालकदम्बकल्पैः विकसन्नूतनकदम्बकुसुमसन्निभैः। कदम्बकुसुमान्यपि कण्टकितानीव दृश्यन्ते। अत एव पुलकितत्वात् तत्सादृश्यमङ्गानामुक्तम्। सङ्कुचद्बाल कदम्बकल्पैः इति केषाञ्चित् पाठः। सङ्कुचितबालकदम्बोपमैरित्यर्थः। रोमाञ्चितत्वाद् ईदृशैरङ्गैः भावमभिलाषं रतिं विवृण्वती प्रकाशयन्ती शैलसुता साचीक्रिया चारुतरेण। साचितिर्यगसम्मुखमिति भोजः। तिर्यगवस्थानक्रियया चारुतरेण पर्यस्त-विलोचनेन अपाङ्गमार्गेण हरमुख विक्षिप्तविलोचनेनोपलक्षिता तस्थौ। अत्र देव्याः शङ्करे पूर्वमुत्पन्ना रतिः साभिलाषतदवलोकनविविक्तवसन्तादिभिरुद्दीप्यमाना रोमाञ्चोत्कण्ठादिभिः सात्त्विकव्यभिचारिभिरनुबध्यते। अतोऽनुबन्धाख्या रसोक्तिरियम् ।। ६८ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथेन्द्रियक्षोभमयुग्मनेत्रः पुनर्वशित्वाद् बलवन्निगृह्य।
हेतुं स्वचेतोविकृतेर्दिदृक्षुर्दिशामुपान्तेषु ससर्ज दृष्टिम्।। ६९ ।।

अथेति। अयुग्मनेत्रः त्रिनेत्रः त्रिलोचनः, वशित्वाद् जितेन्द्रियत्वाद् हेतोः इन्द्रियक्षोभं पुनरपि बलवन्निगृह्य। बलवदिति क्रियाविशेषणम्। बलयुक्तनिग्रहणं कृत्वा। इन्द्रियक्षोभं प्रशमं नीत्वेत्यर्थः। ततः स्वचेतोविकृतेः आत्ममनोविकारस्य हेतुं दिदृक्षुः सन् दिशामुपान्तेषु दृष्टिं ससर्ज विक्षिप्तवान्।। ६९ ।।

स दक्षिणापाङ्गनिविष्टमुष्टिं नतांसमाकुञ्चितसव्यजानुम्।
ददर्श चक्रीकृतचारुचापं प्रहर्तुमभ्युद्यतमात्मयोनिम्।। ७० ।।

स इति। दक्षिणे अपाङ्गे नेत्रे चापज्याकर्षणवशान्निविष्टा मुष्टिर्यस्य तम्। नतांसं विनतवामांसम्। आकुञ्चितसव्यजानुं वक्रीकृतसव्यजानुप्रदेशम्। आकुञ्चितसव्यपादमिति वा पाठः। तथा चक्रीकृतचारुचापं आकर्षानमनवशात् मण्डलीकृतचारुधनुषम्। प्रहर्तुं अभ्युद्यतं आत्मयोनिं कामं स हरो ददर्श। अत्र धानुष्कावस्थानस्य सम्यग् अभिहितत्वात् स्वभावोक्त्यलङ्कारोऽयम् ।। ७० ।।

तपःपरामर्शविवृद्धमन्योर्भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य तस्य।
स्फुरन्नुदर्चिः सहसा तृतीयादक्ष्णः कृशानुः किल निष्पपात।। ७१ ।।

तप इति। तपःपरामर्शात् तपोभङ्गात्। विवृद्धमन्योः, विवृद्धो मन्युः कोपो यस्य तस्य। भ्रूभङ्गेति। भ्रूभङ्गात् दुष्प्रेक्ष्यं दुर्दर्शं मुखं यस्य, तस्य हरस्य तृतीयाद् अक्ष्णः ललाटनेत्रात्, उदर्चिः उद्गतज्वालः, स्फुरन् कृशानुः सहसा झटिति, निष्पपात निर्जगाम किल। परोक्षप्रसिद्धौ किलशब्दः।। ७१ ।।

कोपं प्रभो संहर संहरेति यावद् गिरः खे मरुतां चरन्ति।
तावत् स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार।। ७२ ।।

कोपमिति। हे प्रभो, त्वं कोपम्। संहर संहरेति सम्भ्रमाद् द्विर्वचनम्। इति मरुतां वियति स्थित्वा पश्यतां देवानां, गिरो वाचः, खे यावच्चरन्ति तावत्तदानीमेव, भवनेत्रजन्मा स वह्निः मदनं भस्मावशेषं चकार, कामं दग्धवान्। तद् गात्रं भस्मैव यथावशिष्टं भवति तथा अकरोद् इत्यर्थः। ननु भूतेऽर्थे चरन्तीति लट्प्रयोगः कथं स्यादिति चेदित्यत्राह - यावत्तावच्छब्दौ निपातौ क्रिययोस्तुल्यकालहेतुः। एकस्यां क्रियायां वर्तमानायामन्या क्रिया

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जातेति गिरां चरणे, वर्तमाने लट्(पा.सू.३.२.१२३) इति प्रयोगस्य न दोषः। मरुतां वचनेषु चरत्सु वह्निः कामं अदहद् इत्यर्थः।। ७२ ।।

तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम्।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव।। ७३ ।।

तीव्रेति। तीव्रो दुस्सहः अभिषङ्गोऽभिघातः दुःखं वा प्रभवः कारणं यस्य तेन। अभिषङ्गोऽभिभवः इति दक्षिणावर्तनाथेन व्याख्यातम्। अभिभवस्य शत्रुकार्यत्वाद् इहानुपपन्नम्। दुःखार्थत्वमेव युक्तम्। अभिषङ्गजडं विजज्ञिवान् इति रघुवंशे प्रयोगोऽस्ति(८.७५)।

अभिषङ्गस्त्वभिभवे सङ्गे दुःखाभिघातयोः

इति भोजः। दुःखजेन अन्याभिघातजेन वा मोहेन मूर्च्छनेन अज्ञातभर्तृव्यसना मुहूर्तं मुहूर्तकालमात्रं सा रतिः कृतोपकारेव बभूव। मोहस्य विशेषणमाह - इन्द्रियाणां चक्षुरादीनां वृत्तिं व्यापारं संस्तम्भयता निवारयतेति मोहविशेषणम्।

अयमभिप्रायः - तदानीमेव यदि सा भर्तृमरणं जानीयात् तर्हि सहमरणमेव कुर्यात्। मोहवशेन तज्ज्ञानाभावात् सा मुहूर्तं जिजीवेति। अत्र मोहो रतेर्जीवनार्थं उपकारं कृतवानित्युत्प्रेक्षा।। ७३ ।।

तमाशु विघ्नं तपसस्तपस्वी वनस्पतिं वज्रमिवावरुज्य।
स्त्रीसन्निकर्षं परिहर्तुमिच्छन्नन्तर्दधे भूतपतिः सभूतः।। ७४ ।।

तमिति। तपसो विघ्नभूतं मदनं अवरुज्य वज्रमशनिः वनस्पतिमिव वृक्षं यथा नाशार्थमुपकल्पयति। ह्लादिनी वज्रमस्त्री स्याद् इत्यमरः(१.१.४७)। यथा तद्वत् स्मरं नाशयित्वा ततः स्त्रीसन्निकर्षं स्त्रीसमीपं परिहर्तुमिच्छन् सभूतः भूतगणसहितः स भूतपतिः शम्भुः अन्तर्दधे तिरोऽभवत्।। ७४ ।।

सपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्या
दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्याम्।
सुरगज इव बिभ्रत् पद्मिनीं दन्तलग्नां
प्रतिपथगतिरासीद् वेगदीर्घीकृताङ्गः।। ७५ ।।

सपदीति। अद्रिः हिमवान्। रुद्रसंरम्भभीत्या। संरम्भौ क्रोध सम्भूमौ इति भोजः। रुद्रक्रोधात् भयेन मुकुलिताक्षीं निमीलितनेत्रां, स्वत एव अनुकम्प्यां

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अनुग्रहयोग्यां, दुहितरं पुत्रीं, दोर्भ्यां आदाय प्रतिपथ गतिरासीत्। पन्थानं प्रति प्रवृत्ता प्रतिपथा। अत्यादयः क्रान्ताद्यर्थे द्वितीयया(वार्तिकम् १३३६) इति समासः। ऋक्पूरब्धूः पथामानक्षे(पा.सू.५.४.७४) इति समासान्तोऽकारप्रत्ययः। प्रतिपथा गतिः यस्य सः प्रतिपथगतिः। गृहमार्गाभिमुखगमनोऽभूत्। हस्तलग्नां पद्मिनीं बिभ्रत् सुरगज इव लक्ष्यमाणः। वेगदीर्घीकृताङ्गः वेगेन दीर्घीकृतमिव प्रसारितमङ्गं वपुर्येन सः। वेगदीर्घीकृताभूदिति वा पाठः। गमनवेगेन उन्नतागामिभिराघट्टनात् नादीर्घीकृता इव गगनासक्ता मेघा येन स तथा। अद्रिविशेषणमेतत्। मालिनीवृत्तमिदम् ।। ७५ ।।

शैलात्मजापि पितुरुच्छिरसोऽभिलाषं
व्यर्थं समीक्ष्य ललितं वपुरात्मनश्च।
सख्योः समक्षमिति चाधिकजातलज्जा
शून्या जगाम भवनाभिमुखी कथञ्चित्।। ७६ ।।

शैलेति। वनात् पुरं नीता शून्यचित्ता शैलात्मजापि कथञ्चित् दुःखेन भवनाभिमुखी जगाम। स्वकीयं कन्यान्तःपुरं प्रविवेशेत्यर्थः। किं कृत्वा। शून्येत्याह। उच्छिरसः उन्नतशिरसः पितुरभिलाषं शिवायैनां दास्यामीति मनोरथं व्यर्थं निष्फलं, समीक्ष्य तथा आत्मनो ललितं सौभाग्यगुणयुक्तं वपुश्च व्यर्थं निरर्थगुणं, समीक्ष्य शून्या तथा सख्योः समक्षं अक्षिसन्निधौ एवं जातमित्यनेन जातलज्जा सती निरर्थमनोरथा सा गौरी तपश्चरणार्थं वनवासमेवेच्छन्ती कृच्छ्रेण स्वगृहं प्राविशदित्यर्थः। एवं कथञ्चिद् उक्तः अभिप्रायः। वसन्ततिलकं वृत्तम् ।। ७६ ।।

(कुमारसम्भवस्येदं तृतीयं कामभञ्जनम्।
कुमारप्रीतये व्याख्यद् विद्यामाधवपण्डितः।।)

इति विद्यामाधवीये कुमारसम्भवव्याख्याने तृतीयः सर्गः।। श्रीः।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चतुर्थः सर्गः

रतिविलापः

अथ एवं हरे तिरोहिते, गौर्यां च गतायां, कामे दग्धे, मूर्च्छिता रतिः अनन्तरं किमकरोद् इत्याह -

अथ मोहपरायणा सती विवशा कामवधूर्विबोधिता।

विधिना प्रतिपादयिष्यता नववैधव्यमसह्यवेदनम्।। १ ।।

अथेति। मोहपरायणा, मोहः परायणं परमाश्रयो यस्याः सा। मोहस्य तज्जीवनकारणत्वात्। मोहैकशरणेत्यर्थः।

परायणमभिप्रेते तत्परे परमाश्रये (८.५.१३)

इति वैजयन्ती। विवशा वशरहिता। वशः प्रभावः। आयत्ततायां आयत्ते प्रभुत्वे च वशं विदुः(श्लोकः ५०)इति शाश्वतः। परवशत्वात् सामर्थ्यरहितेत्यर्थः। सती एवं भवन्ती कामवधूः, असह्यवेदनं नववैधव्यं प्रतिपादयिष्यता प्रदास्यता, विधिना दैवेन, प्रबोधिताऽभूद् इत्यर्थः। अत्र सर्गे रतिदुःखविलापस्य वर्णयिष्यमाणत्वात् करुणाख्यविप्रलम्भशृङ्गाररसोक्तिरलङ्कारः।(सरस्वती. ५.५० -)

यदा लोकान्तरगते वल्लभे स्वजनैः मुहुः।

भृशं दुःखायते दीनः करुणः स तदोच्यते।। इति।

सुवर्चलाख्यं अर्धसमवृत्तं आसर्गान्तं विज्ञेयम्। शिखिमित्रयुगान्तशम्भुभिः पवनेन्द्वग्निलगैः सुवर्चलेति वाचस्पतिना तल्लक्षणमुक्तम्।। १ ।।

अवधानपरे चकार सा प्रलयान्तोन्मिषिते विलोचने।

न विवेद तयोरतृप्तयोः प्रियमत्यन्तनिमग्नदर्शनम्।। २ ।।

अवधानेति। सा रतिः, प्रलयान्तोन्मिषिते। प्रलयश्चेष्टाविनाशः। प्रलयो नष्टचेष्टता इत्यमरः(१.७.३३)। प्रलयावसाने उन्मिषिते विलोचने अवधानपरे चकार। एकाग्रतासक्ते व्यधत्त। किमेतदासीदिति चिन्तया नेत्रद्वयं अनन्यव्यापारं अकरोद् इत्यर्थः। अतृप्तयोः दर्शनापेक्षायुक्तयोः चक्षुषोः प्रियं प्रीतिकरं कामं न विवेद न ज्ञातवती। अत्यन्तनिमग्नदर्शनम्। अत्यन्तं निमग्नं विनष्टत्वाद् अत्यन्तासम्भवं दर्शनं यस्य तमिति प्रियविशेषणम्। एवम्भूतं प्रियं न ददर्शेत्यर्थः।। २ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अयि जीवितनाथ जीवसीत्यभिधायोत्थितया तया पुरः।

ददृशे पुरुषाकृति क्षितौ हरकोपानलभस्म केवलम्।। ३ ।।

अयीति। अयीत्यव्ययम्। अयि सानुनये प्रश्ने इति भोजः। हे जीवितनाथ प्राणेश्वर, त्वं अयि कच्चिज्जीवसीत्यभिधाय उत्थितया तया रत्या, पुरोऽग्रे क्षितौ, पुरुषाकृति पुरुषाकारतया स्थितं, केवलं हरकोपानलभस्म, ददृशे दृष्टम्। न तु प्रियशरीरम्। ददृश इति कर्मणि लिट्। आत्मनेपदम्।

पुरुषाकृतिरिति केषाञ्चित् पाठः। तत्रायमर्थः - आकृतिशब्देन शरीरं लक्ष्यते। पुरुषस्य आत्मीयभर्तुः आकृतिः शरीरं केवलं हरकोपानलभस्म ददृशे। भस्मभूतमेव दृष्टम्। न भस्मव्यतिरिक्तं किञ्चिद् दृष्टमिति।। ३ ।।

अथ सा पुनरेव विह्वला वसुधालिङ्गनधूसरस्तनी।

विललाप विकीर्णमूर्धजा समदुःखामिव कुर्वती स्थलीम्।। ४ ।।

अथेति। विह्वला विक्लवा। विक्लवो विह्वलः स्यात्तु इत्यमरः (३.१.४३)। भर्तुः भस्मीभावव्याकुला पुनरेव वसुधालिङ्गनधूसरस्तनी पूर्वं भूमौ पतिता कथञ्चिद् उत्थिता पुनरपि हस्तौ प्रसार्य भूमौ पतनेन तद्धूलि मलिनकुचा। विकीर्णमूर्धजा विकीर्णकेशा सा विललाप परिदेवनमकरोत्। विलापः परिदेवनम् इत्यमरः(१.६.१५)। स्थलीं वनभूमिं समदुःखां कुर्वतीव, पश्यतां पक्षिमृगादीनामपि दुःखोत्पादनात् वनस्थलीमपि आत्मसमानदुःखां कुर्वाणेव। सोत्प्रेक्षणं तस्या विशेषणमिदम्। अत्र मदनाद् आलम्बनविभावाद् उत्पन्नो मदनवध्वाश्रयः स्थायिभावः। पति भस्मदर्शनप्रमुखैः उद्दीपनविभावैः उद्दीप्यमानः तदुत्पन्नैः केशविकिरणभूमिपतनविलापादिभिः अनुभावैः अभिव्यज्यमानः विषाददैन्याश्रुपातादिभिः व्यभिचारिभिः संसृज्यमानः करुणाख्य विप्रलम्भशृङ्गारस्य पुष्टिमुत्पादयति।

विषयाश्रयसंस्कारगुणप्रकृतिपाटवैः।

दीपनातिशयैश्चास्योत्कर्षः सा पुष्टिरिष्यते।।(सरस्वती. ५.२७)

इति शोकस्थायिभावः। करुणाख्योऽयमस्यैव रस इति केचिदाहुः।। ४।।

उपमानमभूद् विलासिनां करणं यत्तव कान्तिमत्तया।

तदिदं गतमीदृशीं दशां न च दीर्येे कठिनाः खलु स्त्रियः।। ५ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उपमानमिति। इतः प्रभृति परलोकनवेत्यन्तैः श्लोकैः(४.१०) विलापमेव प्रपञ्चयति। हे प्रिय, तव यत् करणं गात्रं, कान्तिमत्तया कान्तियुक्तत्वेन, विलासिनां उपमानं अभूत्। विलासो भाषणालोकगति मूर्तिषु चारुता इति भोजः। आलापालोकगतिमूर्तिसौन्दर्ययुक्तानां यूनां उपमानं अभूत्। उपमीयते अनेनेत्युपमानम्। कामस्य शरीरमिवास्य शरीरं चारुतरमिति। करणं साधकतमक्रियागात्रेन्द्रियेषु च इति भोजः। तदिदं तव गात्रं, ईदृशीं दशां अवस्थां, भस्मतया अवस्थितिं, गतं प्राप्तम्। प्राणसमे त्वयि नष्टेऽपि अहं न च दीर्ये न विनश्यामि। स्त्रियः कठिनाः कठिनशरीराः। खलु (द्रष्टव्यः अमरकोशः ३.४.४१०) -

निषेधहेतुजिज्ञासावाक्यालङ्करणे खलु इति ।। ५ ।।

क्व नु मां त्वदधीनजीवितां प्रविहाय क्षणभिन्नसौहृदः।
नलिनीं क्षतसेतुबन्धनां जलसङ्घात इवासि विद्रुतः।। ६ ।।

क्वेति। त्वदधीनजीवितां त्वदायत्तजीवनां मां प्रविहाय क्षणभिन्न सौहृदः त्वं क्व नु विद्रुतोऽसि। क्षणाद् भिन्नं नष्टं सौहृदं सुहृत्कर्म स्नेहो यस्य सः। क्षणे नष्टस्नेहः त्वं मां त्यक्त्वा क्व नु गतोऽसि। क्षतसेतुबन्धनां नलिनीं विहाय जलसङ्घात इव जलसङ्घो यथा गच्छति तद्वदिति।। ६ ।।

कृतवानसि विप्रियं न मे प्रतिकूलं न च ते मया कृतम्।
किमकारणमेव दर्शनं विलपन्त्यै रतये न दीयते।। ७ ।।

कृतवानिति। त्वं मे विप्रियं न कृतवानसि। ते तव प्रतिकूलं अप्रियं न च कृतं मया। किमर्थं विलपन्त्यै रतये अकारणमेव विप्रियाचरणकारणाभावादेव किमर्थं त्वया दर्शनं न दीयते। किमर्थं दर्शनगोचरो न भवसीत्यर्थः। अत्र मह्यमिति वक्तव्ये रतये इति निर्देशस्य अयमभिप्रायः - रतिशब्दो हि कामस्याकर्षणमन्त्रः। रतिशब्दाकर्णनात् जीवन् काम आगच्छतीति।। ७ ।।

स्मरसि स्मर मेखलागुणैरुत गोत्रस्खलितेषु बन्धनम्।
च्युतकेशरदूषितेक्षणान्यवतंसोत्पलताडनानि वा।। ८ ।।

स्मरसीति। उतेति वितर्के। गोत्रं नाम। तस्य स्खलनं अन्यस्त्रीनाम्ना अन्यस्या आह्वानम्। गोत्रस्खलने सति मानिन्यः कामुकानां चरणान् कुसुम-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मेखलादामभिः बध्वा कर्णोत्पलैस्ताडयन्तीति या क्रीडा स्त्रीषु वर्तते तामेवात्मना कृतामाचष्टे। हे स्मर, त्वया कृतेषु गोत्रस्खलनेषु मेखलागुणैः बन्धनं स्मरसि। मया कुसुममेखलादामभिः बन्धनं कृतम्। तव बन्धनं स्मरसि, अवतंसोत्पलताडनानि वा स्मरसि किम्। विशिष्टानि च्युतकेसरदूषितेक्षणानि ताडनावशात् च्युतैः केसरैः दूषिताग्रिक्षणानि यैस्तानि कर्णपूरीकृतोत्पलानि कृतानि ताडनानि किं स्मरसीति।। ८ ।।

हृदये वससीति मत्प्रियं यदवोचस्तदवैमि कैतवम्।

उपचारपदं न चेदिदं त्वमनङ्गः कथमक्षता रतिः।। ९ ।।

हृदय इति। हे रते, त्वं मम हृदये वससीति मत्प्रियं त्वं यदवोचः, उक्तवानसि, तद्वचः कैतवं धूर्तवचनमवैमि। इदमुपचारपदं न चेत् उपचारवाक्यं न चेत् तर्हि कथमेवं स्यात्। त्वमनङ्गः शरीर रहितोऽभूः। रतिः कथमक्षता क्षतरहिता कथं स्यात्। अयमभिप्रायः - यद्यहं तव हृदये वसामि, तर्हि त्वयि नश्यति ममापि नाशः स्यात्। तथा च नाभूत्। अतस्तदुपचारपदमेव, न पारमार्थिकमिति।। ९ ।।

परलोकनवप्रवासिनः प्रतिपत्स्ये पदवीमहं तव।

विधिना जन एष वञ्चितस्त्वदधीनं खलु देहिनां सुखम्।। १० ।।

परेति। परलोकनवप्रवासिनः। स्वदेशाद् देशान्तरं गच्छन् प्रवासी। इतो लोकात् सद्य एव परलोकं गतस्येत्यर्थः। चिरप्रवासिनो मार्गे दुरवबोधः स्यात् । अतो नवप्रवासिनः पदवीं सुखेन ज्ञात्वानुगमनशक्तिः स्यादिति नवशब्दग्रहणम्। इदानीमेव परलोकं गतस्य तव पदवीमहं प्रतिपत्स्येऽनुगमिष्यामीत्यर्थः। तदानीमेव किमर्थं नागतासीत्याशङ्क्याह - विधिनेति। विधिना दैवेन एष जनो वञ्चितः। अहं वञ्चितास्मि, मोहितास्मि। अतस्तदानीं त्वत्पदवीं नानुप्राप्तास्मीति भावः। गतेन मया तव किं प्रयोजनम्। सुखेन त्वया किमर्थं न स्थीयते इत्याशङ्क्याह - त्वदधीनेति। देहिनां सुखं त्वदधीनं खलु। कामे त्वयि सति सुखं स्यात्। असति न स्यादिति त्वदायत्तम्। हि यस्मात् सर्वेषां शरीरिणामप्येवं भवति। न केवलं त्वदेकशरणाया मम सुखं त्वद्गतमेवेत्यभिप्रायः।। १० ।।

त्वदभावे कस्यचिदपि सुखं नास्तीत्यमुमेवार्थं विवृणोति -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

रजनीतिमिरावगुण्ठिते पुरमार्गे घनशब्दविक्लवाः।
वसतिं प्रिय कामिनां प्रियास्त्वदृते प्रापयितुं क ईश्वरः।। ११ ।।

रजनीति। हे प्रिय, रजनीतिमिरावगुण्ठिते निशान्धकारतिरोहिते पुरमार्गे घनशब्दविक्लवाः मेघगर्जितभयकातराः प्रियाः कामिनीः कामिनां वसतिं प्रापयितुं गमयितुं त्वदृते त्वद्विना कः ईश्वरः कः समर्थः। कामेनैव योषितो निर्भया निशि कामिनां गृहं प्रवेश्यन्ते। अतस्तत्प्रापणे नान्यः समर्थः इत्यर्थः। गत्यर्थण्यन्तत्वाद् द्विकर्मकत्वम्।। ११ ।।

नयनान्यरुणानि घूर्णयन् वचनानि स्खलयन् पदे पदे।
असति त्वयि वारुणीमदः प्रमदानामधुना विडम्बना।। १२ ।।

नयनानीति। अरुणानि पानजनितरागाणि नयनानि, घूर्णयन् भ्रमयन्, पदे पदे वचनानि स्खलयन् स्खलितानि कुर्वन्, वारुणीमदः सुरापानजनितमदः कामे त्वय्यसति, अधुना अद्य, प्रमदानां विडम्बना अपहासः। भोगाख्य-फलाभावान्निरर्थकतया सत्त्वाद् अपहसनीय इत्यर्थः। सम्मोहानन्दसम्भेदो मदिरादिकृतो मदः(सरस्वतीकण्ठाभरणम् ५.१५२) इति मदलक्षणम्। अत्र मदिरामदस्वभावकथनात् गुणस्वभावाख्यानं अलङ्कारः।। १२ ।।

अवगम्य कथीकृतं वपुः प्रियबन्धोस्तव निष्फलोदयः।
बहुलेऽपि गते निशाकरस्तनुतां दुःखमनङ्ग मोक्ष्यति।। १३ ।।

अवगम्येति। निष्फलोदयः त्वदभावान्निरर्थोदयः निशाकरः प्रियबन्धोस्तव वपुः कथीकृतं स्वरूपाभावात् कथामात्रशेषमवगम्य ज्ञात्वा बहुले कृष्णपक्षे, गतेऽपि तनुतां कार्श्यं, दुःखेन कृच्छ्रेण, मोक्ष्यति। दुःखेनैव वृद्धिं गमिष्यतीत्यभिप्रायः। हे अनङ्गेति सम्बोधनं कथीकृतमित्यस्य स्पष्टीकरणार्थम्। कथीकृतमिति कथाशब्दाद् अभूततद्भावे च्विप्रत्ययः। बहुले कृष्णपक्षेऽपि इति भोजः। स्त्रियां तनुः शरीरे स्यात्, कृशे भद्रे तनुस्त्रिषु इति नानार्थः।। १३ ।।

हरितारुणचारुबन्धनः कलपुंस्कोकिलशब्दसूचितः।
वद सम्प्रति कस्य बाणतां नवचूतप्रसवो गमिष्यति।। १४ ।।

हरितेति। हरितारुणचारुबन्धनः बालत्वाद् हरितमीषन्नीलमरुणञ्च चारु च बन्धनं वृन्तं यस्य सः। कलपुंस्कोकिलशब्देन सूचितः। चूताङ्कुरास्वादं विना

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कोकिलशब्दस्य कलत्वं न स्यादिति कलेन मधुरास्फुटेन पुंस्कोकिलशब्देन सूचितः ज्ञापितः। एवम्भूतः सम्प्रतीदानीं वर्तमानो नवचूतप्रसवो नवचूतकुसुमं, कस्य बाणतां शरत्वं, गमिष्यति प्राप्स्यति। कस्य बाणो भविष्यतीति वद। कस्यचिदप्यनेन कार्यं नास्तीत्यभिप्रायः।। १४ ।।

अलिपङ्क्तिरनेकशस्त्वया गुणकृत्ये धनुषो नियोजिता।
विरुतैः करुणस्वनैरियं गुरुशोकामनुरोदितीव माम्।। १५ ।।

अलीति। अनेकशो बहुशः, धनुषः कौसुमस्य चापस्य, गुणकृत्ये मौर्वीकार्ये, नियोजिता। मौर्वीकृतेत्यर्थः। कामस्य पुष्पमेव चापं तस्य भ्रमरावलिरेव मौर्वीति प्रसिद्धम्। तथा ह्युक्तम् -

धनुः पौष्पं मौर्वी मधुकरमयी (सौन्दर्यलहरी श्लोकः ६)

इति। एवम्भूता अलिपङ्क्तिः चापाभावाद् अनाश्रया करुणस्वनैः करुणविषयध्वनिभिः, विरुतैः गर्जितैः, गुरुशोकां मामनुरोदितीव। रुदन्त्या मम अनुरोदनं करोतीवेति।

दर्शनात् क्लिष्टजन्तूनां धर्मशीलस्य चेतसः।
आर्द्रता करुणा तस्या विषयः करुणस्त्रिषु।। इति भोजः।। १५ ।।

प्रतिपद्य मनोहरं वपुः पुनरप्यादिश तावदुत्थितः।
रतिदूतिपदेषु कोकिलां मधुरालापनिसर्गपण्डिताम्।। १६ ।।

प्रतिपद्येति। मनोहरं रम्यं, वपुः प्रतिपद्य गृहीत्वा, तावद् इदानीं उत्थितः सन्, त्वं रतिदूतिपदेषु त्वद्वल्लभायाः रतेः दूतस्थानेषु, रतिं प्रति कार्येषु कोकिलान् पुनरप्यादिश। पूर्वं यथाऽद्यापि प्रेषयेत्यर्थः। दूतकार्ये तेषां शक्तिः किमस्तीत्याशङ्क्याह - मधुरेति। मधुरालापे निसर्गात् स्वभावादेव पण्डितान् प्रवीणानिति कोकिलविशेषणम्।। १६ ।।

शिरसा प्रणिपत्य याचितान्युपगूढानि सवेपथूनि च।
सुरतानि च तानि ते रहः स्मर संस्मृत्य न शान्तिरस्ति मे।। १७ ।।

शिरसेति। क्रोधयुक्तां मां शिरसा प्रणिपत्य त्वया कृतानि याचितानि प्रसीद, सदयं मामवलोक्येत्यादीनि प्रार्थितानि संस्मृत्य तथा सवेपथूनि मद्भयात् सकम्पान्युपगूढानि उपगूहनानि आलिङ्गनानि, त्वयैव विदितानि ते सुरतानि च

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मुहुर्मुहुः संस्मृत्य मे मम न मनःशान्तिरस्ति। न दुःखशान्तिर्भविष्यतीत्यर्थः। हे स्मर इति सम्बोधनम्। याचितान्युपगूढानि इति पदद्वयं भावे निष्ठान्तम्। तानि ते रह इति पाठे रहसीत्यर्थः।। १८ ।।

विहितं रतिपण्डित त्वया स्वयमङ्गेषु ममेदमार्तवम्।
ध्रियते कुसुमप्रसाधनं तव तच्चारु वपुर्न दृश्यते।। १८ ।।

रचितमिति। हे रतिपण्डित, हे रतिप्रवीण। त्वया स्वयं हस्तेन ममाङ्गेषु विहितं रचितं इदमार्तवं वसन्तर्तुसम्बन्धि कुसुमप्रसाधनं कुसुममयमाभरणं ध्रियते ममाङ्गेष्ववतिष्ठते। धृङ् अवस्थाने इति धातोरिदं रूपम्। चारु तव वपुः प्रसाधनकर्मशरीरं न दृश्यते। अहो, क्षणिका प्राणिनां स्थितिरिति विवक्षाविशेषः।। १८ ।।

विबुधैरसि यस्य दारुणैरसमाप्ते परिकर्मणि स्मृतः।
तमिमं कुरु दक्षिणेतरं चरणं निर्मितरागमेहि मे।। १९ ।।

विबुधैरिति। यस्य परिकर्मणि प्रसाधनेऽसमाप्ते सति दारुणैर्विबुधैः स्मृतोऽसि। स्नेहातिशयेन स्वहस्तेनैव मम चरणद्वयं यावकरसेन रञ्जयितुं प्रवृत्तेन त्वया दक्षिणचरणे रञ्जिते सति वामचरणस्य रञ्जनकर्मणि प्रारब्धेऽसमाप्ते सति क्रूरैर्देवैर्विचिन्तितोऽसि। देवानां स्मरणानन्तरमेव प्रारब्धं कर्म परित्यज्य सहसा गतस्त्वमिदानीं तमिमं मे दक्षिणेतरं वामं चरणं निर्मितरागं कुरु। वामचरणस्य रञ्जनकर्म समाप्तं क्रियतामित्यभिप्रायः। त्वमेहि आगच्छ। देवानां दारुणत्वमसाध्ये प्राणहरणे कर्मणि विनियोजनात्।। १९ ।।

अहमेत्य पतङ्गवर्त्मना पुनरङ्गाश्रयिणी भवामि ते।
चतुरैः सुरकामिनीजनैः प्रिय यावन्न विलोभ्यसे दिवि।। २० ।।

अहमिति। पतङ्गवर्त्मना पतङ्गानां शलभानां नाशकेन वर्त्मना। शाकपार्थिवादित्वान्मध्यमपदलोपी समासः। पतङ्गानां शलभानां वर्त्मना अग्निमार्गेणेत्यर्थः। अहमग्निप्रवेशेन त्वत्समीपमेत्य ते तव अङ्गाश्रयिणी भवामि भविष्यामि। वर्तमानसामीप्ये वर्तमानवद्वा(पा.सू.३.३.१३१) इति सद्यः कार्यत्वात् प्रयोगः। हे प्रिय, चतुरैः वैदग्ध्ययुक्तैः सुरकामिनीजनैः दिवि त्वं यावन्न विलोभ्यसे न विमोह्यसे। न प्रतार्यसे इत्यर्थः। यावत् सुरस्त्रियः त्वां न

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रतारयन्ति तावदेवाहं शीघ्रमेत्य त्वदुत्सङ्गाश्रया भविष्यामीत्यर्थः।। २० ।।

अनुमरणे कृतेऽपीयन्तं कालं जीवनाद् दोषमाह -

मदनेन विनाकृता रतिः क्षणमात्रं किल जीवितेति मे।
वचनीयमिदं व्यवस्थितं रमण त्वामनुयामि यद्यपि।। २१ ।।

मदनेनेति। हे रमण हे प्रिय, अहमनुमरणेन यद्यपि त्वामनुयामि अनुगच्छेयम्, तथापि मे ममेदं वचनीयं व्यवस्थितम्। अयमपवादो लोके स्थिरोऽभूत्। किमित्याह - मदनेन विनाकृता विरहिता, रतिः क्षणमात्रं जीविता प्राणप्रधारणयुक्ता स्थिता किलेति। निन्दा मे क्षणजीवनाज्ञातेति भावः।। २१ ।।

क्रियतां कथमन्त्यमण्डनं परलोकान्तरितस्य ते मया।
सममेव गतोऽस्यतर्कितां गतिमङ्गेन च जीवितेन च।। २२ ।।

क्रियतामिति। परलोकान्तरितस्य परलोकगमनात् तिरोभूतस्य, ते अन्त्यमण्डनं प्रेतशरीरालङ्करणं, मया कथं क्रियताम्। कथमहं कुर्यामित्यर्थः। लोट् च(पा.सू.३.३.१६२) इति लिङर्थे लोड्विधिः। परलोकत्वरितस्येति केषाञ्चित् पाठः। परलोकं त्वरया गतस्येत्यर्थः। कामे गतेऽपि तस्य शरीरस्यालङ्करणं किमर्थं न कार्यमित्याशङ्क्याह - सममिति। यत्त्वमङ्गेन शरीरेण च जीवितेन च सममेव सहैव, अतर्कितामननुरूपितां गतिं गतोऽसि। अन्येषां तु मृतानां शरीरमात्रं तिष्ठति। त्वं तु शरीरप्राणाभ्यां सहैव गतोऽसीत्यर्थः। अतोऽन्त्यमण्डनं कर्तुमशक्यं स्यादिति।। २२ ।।

ऋजुतां नयतः स्मरामि ते शरमुत्सङ्गनिषण्णधन्वनः।
मधुना सह सस्मितां कथां नयनोपान्तविलोकितं च यत्।। २३ ।।

ऋजुतामिति। उत्सङ्गनिषण्णधन्वनः अङ्कनिवेशितचापस्य शरं ऋजुतां नयतः। अङ्के चापं निवेश्य कराभ्यां वक्रत्वं अपनयत इत्यर्थः। एवम्भूतस्य ते मधुना वसन्तेन सह सस्मितां कथां स्मरामि। तथा तन्नयनोपान्तावलोकितं च स्मरामि। मां प्रत्यपाङ्गविलोकनं च त्वया पूर्वं कृतं स्मरामीति भावः।। २३ ।।

क्व नु ते हृदयङ्गमः सखा कुसुमायोजितकार्मुको मधुः।
न खलूग्ररुषा पिनाकिना गमितः सोऽपि सुहृद्गतां गतिम्।। २४ ।।

क्वेति। ते हृदयङ्गमोऽतिप्रियः सखा मधुः। क्व नु, क्वैव। तस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विशेषणमाह - कुसुमेति। कुसुमैरायोजितं रचितं कार्मुकं त्वदीयं चापं येन स वसन्तः क्व गतः। तद्दर्शनादपि मे दुःखं किञ्चिच्छाम्येदिति भावः। सोऽप्युग्ररुषा पिनाकिना सुहृद्गतां गतिं न गमितः खलु। सुहृदा त्वया प्राप्तं मार्गं गमितः खलु ।। २४ ।।

अथ तैः परिदेविताक्षरैर्हृदये दिग्धफलैरिवाहतः।
रतिमभ्युपपत्तुमातुरां मधुरात्मानमदर्शयत् पुरः।। २५ ।।

अथेति। परिदेवितं परिदेवनम्। भावे निष्ठा। विलापः परिदेवनं इत्यमरः(१.६.१५)। दिग्धफलैरिव विषलिप्तशरमुखैरिव। दिग्धलिप्तौ विषालिप्ते फलं शरमुखेऽपि च इति भोजः। विषालिप्तशरमुखवहः स तैः पूर्वोक्तैः कामवध्वा विलापाक्षरैः हृदये अर्दितः आहतः वसन्तः तस्याः पुरः आत्मानमदर्शयत् आविरभूत्। किमर्थम्। आतुरां रतिं अभ्युपपत्तुं अनुग्रहीतुम्। आश्वासयितुमित्यर्थः। प्रतिपत्तिः स्तुतौ ज्ञानेऽभ्युपपत्तिरनु- ग्रहः इति भोजः। अर्पित इति पाठो नादरणीयः, असङ्गतत्वात्। यद्यपि ग्राह्यम्, तर्हि अर्थान्तरं वाच्यम् अर्पितः संसृष्ट इति।। २५ ।।

तमवेक्ष्य रुरोद सा भृशं स्तनसम्बाधमुरो जघान च ।
स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते।। २६ ।।

तमिति। तं वसन्तमवेक्ष्य सा भृशं रुरोद। स्तनसम्बाधं स्तननिरन्तराकीर्णमुरो जघान च। कराभ्यां उरस्ताडनं च कृतवतीत्यर्थः। स्तनसम्बाधमिति पदं, परिक्लिश्यमाने च(पा.सू.३.४.५५) इति णमुलन्तं केचिदाहुः। स्तनयोश्च बाधा यथा स्यात् तथा वक्षःस्थलं आहतवतीत्यर्थः। स्वजनस्य बन्धोः अग्रतः दुःखं विवृतद्वारमिवोपजायते हि। प्रसिद्धमेतत्। अन्तर्निरुद्धस्य द्वारे विघटिते सति यथा निर्गमः स्यात्, तथा मनसि गूढस्य दुःखस्य बन्धोः पुरस्तात् उद्गमने जृम्भणं भवतीति भावः।। २६ ।।

इति चैनमुवाच दुःखिता सुहृदः पश्य वसन्त किं स्थितम्।
तदिदं कणशः प्रकीर्यते पवनैर्भस्म कपोतकर्बुरम्।। २७ ।।

इतीति। इति वक्ष्यमाणप्रकारेण, दुःखिता सैनं मधुं, उवाच आह हे वसन्त, त्वं पश्य। तव सुहृदः किं स्थितम्। शरीरावयवेषु किमवतिष्ठेत्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मृतानामन्येषां शरीरमात्रं तिष्ठति। अस्य तु शरीरे किञ्चिदपि न स्थितमित्यभिप्रायः। सुहृदं पश्य वसन्त, किं स्थितमिति क्वचित् पाठः। पक्षे किमः क्षेपे(पा.सू.५.४.७०) इति समासः। किंस्थितम्। कष्टावस्थां गतं सुहृदं पश्येति तत्रार्थः। अथवा तव सुहृदः किं स्थितम् किं स्थानम्। भावे निष्ठा। किमिदमवस्थानम्। केयमवस्थेत्यर्थः। शरीरं किञ्चिदपि किं न शिष्टमिति आशङ्क्याह - कपोतकर्बुरं कपोतवर्णशबलं इदं तदीयं भस्म पवनैः कणशः प्रकीर्यते प्रतिक्षणं परितो विकीर्यते इति। यत् यस्मात्।

चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे इत्यमरः(१.५.१६)।। २७ ।।

अयि सम्प्रति देहि दर्शनं स्मर पर्युत्सुक एष माधवः।
दयितास्वनवस्थितं नृणां न खलु प्रेम चलं सुहृज्जने।। २८ ।।

अयीति। हे स्मर, त्वं सम्प्रति दर्शनं देहि। आत्मानं दर्शय। यस्मादेष माधवः वसन्तः पर्युत्सुकः त्वद्दर्शनोत्सुकः वर्तते। तथा हि - दयितासु प्रेयसीषु, अनवस्थितं अस्थिरमपि, नृणां पुरुषाणां, प्रेम सुहृज्जने चलं न भवति खलु। स्त्रीष्वनादरेऽपि स्निग्धैः सुहृदो नावमन्तव्या इति यत् तस्मात् सुहृदे वसन्ताय आत्मानं प्रकाशयेति भावः।। २८ ।।

अनेन सुहृत्कार्यं किं कृतमित्याह -

अमुना ननु पार्श्ववर्तिना जगदाज्ञां ससुरासुरं तव।
बिसतन्तुगुणस्य कारितं धनुषः पेलवपुष्पपत्रिणः।। २९ ।।

अमुनेति। ननु अवधारणे। पार्श्ववर्तिना अमुना वसन्तेन ससुरासुरं जगत् तव धनुषः आज्ञां कारितं ननु। धनुषो विशेषणमाह - बिसतन्तुगुणस्य बिसतन्तुरेव गुणो मौर्वी यस्य तस्य। पेलवपुष्पपत्रिणः। पेलवानि मृदूनि पुष्पाण्येव पत्रिणः शराः यस्य तस्य। एवम्भूतस्यापि त्वद्धनुषः आज्ञां कारितम्। आज्ञया जगत् स्थापितम्। असौ भुवनदुर्बलस्यापि त्वद्धनुषः कारयामासेत्यर्थः। हृक्रोरन्यतरस्याम्(पा.सू.१.२.५३) इति जगतः कर्मसंज्ञा।। २९ ।।

गत एव न ते निवर्तते स सखा दीप इवानिलाहतः।
अहमस्य दशेव पश्य मामविषह्यव्यसनेन धूमिताम्।। ३० ।।

गत इति। ते सखा कामो गत एव, न तु निवर्तते। अनिलाहतो दीप

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इव। दीपो यथा न पुनरावर्तते, तद्वदहमस्य कामस्य दशेव वर्तिरिव अवशिष्टास्मीति शेषः। दशासाम्यं दर्शयति - अविषह्यव्यसनेन धूमितां मां पश्य। अविषह्येन व्यसनेन धूमिताम् अन्तर्ज्वलच्छोकाग्नियुक्तामवलोकय। दशा तु दीपव्यसनेन प्रधूमिता भवति ।। ३० ।।

विधिना कृतमर्धवैशसं ननु मां कामवधे विमुञ्चता।
अनपायिनि संश्रयद्रुमे गजभग्ने पतनाय वल्लरी।। ३१ ।।

विधिनेति। कामवधे कामहनने, क्रियमाणे सति मां विमुञ्चता वधुत्वाद् विसृजता, मामनिघ्नता, विधिना अर्धवैशसं कृतम्, अर्धहिंसा कृता। पुरुषस्यार्धं पत्नीति प्रसिद्धिः। ननु प्रसिद्धौ। शसु हिंसायामिति धातोः पचाद्यचि विशस इति पदं स्यात्। विशसो हिंसकः। तस्य कृत्यं वैशसम्। नृशंसो विशसः क्रूरः इति भोजः। विधिना हिंसायामकृतायामपि मम मरणं सामर्थ्यात् सिद्धमेवेत्याह - अनपायिनीति। अनपायिनि नाशरहिते संश्रयद्रुमे गजभग्ने सति वल्लरी पतनाय कल्पते। अनघापि हीति केषाञ्चित् पाठः। अनघा व्यसनरहितापि वल्लरी आश्रयवृक्षे गजेन भग्ने सति वल्लरी पतनाय कल्पते, पतनं कर्तुं समर्था भवतीति। तुमर्थाच्च भाववचनात्(पा.सू.२.३.१५) इति चतुर्थी।। ३१ ।।

अतस्त्वयेदानीमिदं कर्तव्यमित्याह -

तदिदं क्रियतामनन्तरं भवता बन्धुजनप्रयोजनम्।
विधुरां ज्वलनातिसर्जनान्ननु मां प्रापय पत्युरन्तिकम्।। ३२ ।।

तदिति। तत् तस्मात्, भवता अनन्तरमव्यवहितमविलम्बितं, बन्धुजनप्रयोजनं क्रियताम्। किं तदित्याह - विधुरामिति। विह्वलां मां ज्वलनातिसर्जनात् अग्निप्रदानात् हेतोः, पत्युरन्तिकमनु पश्चात्, प्रापय। सहगमनाभावेऽपि इदानीमग्निदानेन पश्चादपि पत्युः समीपं प्राप्तां विधेहीत्यभिप्रायः। विश्राणनं वितरणं दानं स्यादतिसर्जनम् इति भोजः।। ३२ ।।

भर्तुरनुगमनं स्त्रीणां कर्तव्यतया प्रसिद्धमर्थान्तरन्यासेन दर्शयति -

शशिना सह याति कौमुदी सह मेघेन तडित् प्रलीयते।
प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि।। ३३ ।।

शशिनेति। कौमुदी ज्योत्स्ना, शशिना सह याति । शशिन्यस्तमिते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

साप्यस्तं यातीत्यर्थः। तटित् मेघेन सह प्रलीयते। प्रमदाः पतिवर्त्मगा इति विचेतनैः मूढैरपि प्रतिपन्नं ज्ञातं हि। प्रतिपज्ज्ञप्तिचेतना इत्यमरः(१.५.१)।। ३३

अमुनैव कषायितस्तनी सुभगेन प्रियगात्रभस्मना।
नवपल्लवसंस्तरे यथा रचयिष्यामि तनुं विभावसौ।। ३४ ।।

अमुनेति। सुभगेनामुना प्रियगात्रभस्मनैव कषायितस्तनी भावित स्तनी। अलङ्कारानुलेपनाद्यलङ्कारनिवृत्तिद्योतनार्थमेवकारः।

निर्यासे भावनायां च कषायस्तु वरे रस इति।

एवम्भूताहं नवपल्लवसंस्तरे नूतनप्रवालशय्यायां यथा, तथा निश्शङ्कं विभावसौ तनुं रचयिष्यामि विधास्यामि।अग्नौ तनुं शरीरं पातयिष्यमि इत्यर्थः।। ३४ ।।

कुसुमास्तरणे सहायतां बहुशः सौम्य गतस्त्वमावयोः।
कुरु सम्प्रति तावदाशु मे प्रणिपाताञ्जलियाचितां चिताम्।।३५ ।।

कुसुमेति। हे सौम्य, प्रियदर्शन, त्वमावयोः कुसुमशय्यास्तरणे बहुशः सहायतां गतः प्राप्तोऽसि। सहयोगिभिरित्यर्थः। सम्प्रतीदानीमाशु प्रणिपाताञ्जलियाचितां प्रणामाञ्जलीकृतां प्रार्थितां चितां साग्निकाष्ठसञ्चयं कुरु। तावदित्यवधारणे। चिता त्वया कर्तव्यैवेत्यर्थः।

तत्प्रमाणयुते तावत् सम्प्रत्यर्थेऽवधारणे इति वररुचिः।

रुचिरः सुभगः सौम्यः इति।

देहदाहाय काष्ठानां सञ्चयः साग्निकश्चिता इति भोजः।। ३५ ।।

तदनु ज्वलनं मदर्पितं त्वरयेर्दक्षिणवातवीजनैः।
विदितं खलु ते यथा स्मरः क्षणमप्युत्सहते न मां विना।। ३६ ।।

तदन्विति। तदनु चितायां मम पतनानन्तरं, मदर्पितं ज्वलनं दक्षिणवातवीजनैः मलयमारुताक्षेपणैः, त्वं त्वरयेः सम्भ्रमस्व। सत्वरसम्भ्रमेण वाताहतो हि ज्वलनः सम्भ्रमन् दृश्यते। परितो व्याप्तं प्रदीप्तं विधेहीत्यर्थः। त्वरयेति लिङि मित्वाद् ह्रस्वत्वम्। किमर्थमेवं कर्तव्यमित्याह - विदितमिति। स्मरः कामः, मां विना यथा क्षणमपि नोत्सहते न व्याप्रियते, तथा ते तव, विदितं खलु। रत्या विना कामस्य व्यापारः क्षणमपि नास्तीति त्वं जानीहि इत्यर्थः। अत एव शीघ्रं कार्यमित्यर्थः।। ३६ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इति चापि विधाय दीयतां सलिलस्याञ्जलिरेक एव नौ।
अविभज्य परत्र तं मया सहितः पास्यति ते स बान्धवः।। ३७ ।।

इतीति। अपि च एतावदेव कार्यं न भवति। कार्यान्तरमप्यस्तीत्यर्थः। इति एवं विधाय त्वया नौ आवाभ्यां एक एव सलिलस्य अञ्जलिः प्रेततर्पणजलाञ्जलिः दीयताम्। ते तव, बान्धवः स कामः, परत्र परलोके, यं सलिलाञ्जलिं अविभज्य विभागमकृत्वा, मया सहितः पास्यति सोऽञ्जलिर्दीयतामिति ।। ३७ ।।

परं प्रेतकार्ये तस्य किं प्रियं कार्यमित्याशङ्क्याह -

परलोकविधौ च माधव स्मरमुद्दिश्य विलोलपल्लवाः।
निवपेः सहकारमञ्जरीः प्रियचूतप्रसवो हि ते सखा।। ३८ ।।

परेति। हे माधव वसन्त, परलोकविधौ परलोकस्थितस्य प्रीत्यर्थो विधिः परलोकविधिः प्रेततर्पणकार्यम्। शाकपार्थिवादित्वान्मध्यमपदलोपि समासः। तत्र प्रेततर्पणकार्ये स्मरमुद्दिश्य विलोलपल्लवाः सहकारमञ्जरीः त्वं निवपेः निवापं कुरु। निवापः पितृतर्पणम्(२.७.३१) इत्यमरः। तिलाक्षतवच्चूतमञ्जरीः एव निक्षिप्य प्रेततर्पणं त्वया कार्यमित्यभिप्रायः। हि यतः, ते सखा प्रियचूतप्रसवः चूतकुसुमे प्रीतिमानिति यावत्। ततस्तान्येव निवपेरिति ।। ३८ ।।

इति देहविमुक्तये स्थितां रतिमाकाशभवा सरस्वती।
शफरीं ह्रदशोषविह्वलां प्रथमा वृष्टिरिवान्वकम्पयत्।। ३९ ।।

इतीति। इतीयं देहविमुक्तये देहविमुक्तिं कर्तुं, स्थितां कृतनिश्चयां, रतिं आकाशभवा सरस्वती आकाशे वर्तमानेनादृश्यरूपेण सर्वज्ञेन देवेनाभिहिता वाणी, अन्वकम्पत अनुकम्पितवती अनुगृहीतवती। ह्रदशोषविह्वलां शफरीं प्रथमा वृष्टिरिव यथानुकम्पते तद्वदस्यामनुग्रहं अकरोदित्यर्थः। कृपा दयानुकम्पा स्यात् इत्यमरः(१.७.१८)।। ३९ ।।

का सरस्वतीत्याह -

कुसुमायुधपत्नि दुर्लभस्तव भर्ता न चिराद् भविष्यति।
शृणु येन स कर्मणा गतः शलभत्वं हरलोचनार्चिषि।। ४० ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कुसुमेति। हे कुसुमायुधपत्नि, तव भर्ता न दुर्लभः। सुलभ एव भविष्यति। चिरकालं पुनः शरीरयोगं प्राप्स्यति। यदि भविष्यति तर्हि कथं स नष्ट इत्याशङ्क्य तत्र कारणमाह - शृणु त्वम्, तदाकर्णय। येन कर्मणा स कामः हरलोचनार्चिषि हरनेत्राग्निज्वालायां, शलभत्वं शलभभावं गतः। शलभः पतङ्गो यथा अग्निज्वालायां पतति तद्वत् तत्र पतितोऽभूद् इत्यर्थः ।। ४० ।।

किं तत् कर्म, त्वया श्रूयतामित्याह -

अभिलाषमुदीरितेन्द्रियः स्वसुतायामकरोत् प्रजापतिः।

अथ तेन निगृह्य विक्रियामभिशप्तः फलमेतदन्वभूत्।। ४१ ।।

अभिलाषमिति। उदीरितेन्द्रियः कामेन क्षुभितेन्द्रियः, प्रजापतिः ब्रह्मा, तत्सृष्टिकाले स्वसुतायां सरस्वत्यां, अभिलाषमकरोत् उपभोगेच्छां कृतवान्। अथ अनन्तरं, विक्रियां मनोविकारं, निगृह्य तेन प्रजापतिना, अभिशप्तः कामः एतत्फलमन्वभूत्। हरनेत्रार्चिस्त्वां दहतीति शप्तः। तथैव तेन दग्धोऽभूदित्यर्थः।। ।। ४१ ।।

कदा शापमोक्ष इत्याशङ्क्याह -

परिणेष्यति पार्वतीं यदा तपसा तत्प्रवणीकृतो हरः।

उपलब्धसुखस्तदा स्मरं वपुषा स्वेन समग्रयिष्यति।। ४२ ।।

परिणेष्यतीति। उमाकृतेन तपसा तत्प्रवणीकृतः तस्यां प्रह्वीकृतः, तत्परत्वं प्रापित इति वा। प्रवणस्तत्परे नम्रे इति शाश्वतः। तद्वशीकृतो हरः पार्वतीं यदा परिणेष्यति। परिणयो विवाहः। यदा तस्या विवाहं करिष्यति, तदोपलब्धसुखः पार्वतीसमागमाद् अवाप्तसुखो हरः स्मरं स्वेन वपुषा समग्रयिष्यति। पुनरपि स्वेन शरीरेण सम्पन्नं करिष्यति। सशरीरं करिष्यतीत्यर्थः।। ४२ ।।

इति चाह स धर्मचारिणीं स्मरशापान्तभवां सरस्वतीम्।

अशनेरमृतस्य चोभयोर्वशिनश्चाम्बुधराश्च योनयः।। ४३ ।।

इतीति। स्मरशापान्तशिवा स्मरस्य शापान्तकथने सुखदा सैव सरस्वती सधर्मचारिणीं कामस्य पत्नीं रतिं इति चाह एवं प्रोवाच। कथमित्याह - अशनेरिति। अत्राशनिशब्देन कोपश्च अमृतशब्देन प्रसादश्च लक्ष्यते,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दुःखानन्दकर्तृकत्वात्। वशिनो जितेन्द्रियाः तपस्विनः। वशिनश्चाम्बुधराश्चाशने-रमृतस्य चेत्युभयोः योनयः कारणभूताः। वशिनोऽपि कोपं प्रसादं च कुर्वन्ति, मेघा अपि रौद्रं अग्निमयं अशनिं, अमृतं जलञ्च सृजन्तीत्यर्थः। अत्र वशिशब्देन ब्रह्मा रुद्रश्च गृह्यते। पूर्वं शप्तवान्, अथ शापान्तञ्चोक्तवान् इति ब्रह्मा गृह्यते। पूर्वं दग्धवान्, पुनरुत्पादयिष्यतीति रुद्रश्च गृह्यते। अत्र पाठान्तरम् -

इति चाह स धर्मचारिणि स्मरशापान्तभवां सरस्वतीम्

इति। स इति पदच्छेदः। हे धर्मचारिणि धर्मशीले रते, स प्रजापतिः, इति एवं, परिणेष्यतीत्याद्युक्तरूपां स्मरशापान्तभवां स्मरस्य शापप्रदानकालाव-सानसम्भूतां सरस्वतीञ्चाह प्रोवाच। शापानन्तरकाले करुणया जातां मोक्षप्रसादनरूपां वाचञ्च स एवोक्तवान् इत्यर्थः। शापकर्तृकत्वं तन्मोक्षकर्तृकत्वं च वशिनां सिद्धमिति द्योतयितुमाह - अशनेरिति। पूर्वपाठे तु द्विवारं सरस्वतीति ग्रहणस्य व्यर्थत्वाद् अयमेव पाठः साधीयान् इति मन्महे।

ननु ब्रुव आहादेशो लटि विधीयते। अस्यार्थस्यातीतत्वात् वर्तमानकालविधेय आहेति प्रयोगः कथमत्र स्यादिति चेत्, अत्र निर्वाहं ब्रूमः। महाकविप्रयोगेष्वेवं दृश्यते(नैषधीयम् ३.१३४) -

परवति दमयन्ति त्वां न किञ्चिद् ब्रवीमि

द्रुतमुपसर किं मामाह सा शंस हंस

इति विप्रलम्भग्लानचित्तस्य नलस्य हंसं प्रति वचने नैषधकाव्ये श्रीहर्षेणातीतार्थे प्रयुक्तत्वात्। अस्य सर्वज्ञत्वेन माधवकृते तद्व्याख्याने निर्वाहः। इत्थमेवोक्तं भवति - यदव्ययमाहेति वर्तमानार्थः तथापि महाकवयोऽतीतार्थेऽपि प्रयुञ्जते। व्याकरणं प्रयोगमूलमिति।। ४३ ।।

तदिदं परिरक्ष शोभने भवितव्यप्रियसङ्गमं वपुः।

रविपीतजला तपात्यये पुनरोघेन हि युज्यते नदी।। ४४ ।।

तदिति। तत् तस्मात्। हे शोभने, त्वं भवितव्यप्रियसङ्गमं भाविभर्तृयोगमिदं वपुः परिरक्ष। नष्टस्य पुनरागमनं कुत इत्याशङ्क्याह - रविपीतजला नदी तपात्यये ग्रीष्मावसाने वर्षागमनसमये पुनरप्योघेन प्रवाहेण युज्यते। उष्ण ऊष्मागमस्तपः (१.४.१८) इत्यमरः।। ४४ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इत्थं रतेः किमपि भूतमदृश्यरूपं
मन्दीचकार मरणव्यवसायबुद्धिम्।
तत्प्रत्ययाच्च कुसुमायुधबन्धुरेनां
आश्वासयत् सुचरितार्थपदैर्वचोभिः।। ४५ ।।

इत्थमिति। अदृश्यरूपं किमपि भूतमित्थमुक्त्वा रतेर्मरण व्यवसायबुद्धिं मन्दीचकार। मरणार्थो व्यापारो मरणव्यवसायः। मरण निश्चयो वा। तद्बुद्धिं मन्दीचकार। तद्भूतवचनात् तस्य मधुवचनस्य चानन्तरं विश्वासाद् रतेः मरणबुद्धिः शनैः शनैः शिथिलाऽभूद् इत्यर्थः। व्यापारे निश्चयेऽपि स्याद् व्यवसायः इति भोजः। तत्प्रत्ययात् तद्वचन विश्वासात् कुसुमायुधबन्धुः सन् सुरभिः मधुः अभिवृद्धरसैः भविष्य- त्प्रयोजनयुक्तैः वचोभिरेनां रतिमाश्वासयत् आश्वासयामास च।। ४५ ।।

अथ मदनवधूरुपप्लवान्तं व्यसनकृशा परिपालयाम्बभूव।
शशिन इव दिवातनस्य लेखा किरणपरिक्षयधूसरा प्रदोषम्।। ४६ ।।

अथेति। अथ तद्भूतवचनस्य मधुवचनस्य अनन्तरं, व्यसनकृशा मदनवधूः उपप्लवान्तं शापोपद्रवावसानं, प्रतिपालयाम्बभूव। प्रतिपालनं प्रतीक्षणम्। तच्छापान्तं प्रतीक्षमाणाऽतिष्ठदित्यभिप्रायः। किमिव। किरणपरिक्षय-धूसरा दिवातनस्य अह्नि वर्तमानस्य, शशिनो लेखा कला, प्रदोषमिव स्वकान्तिकारणभूतं निशामुखं यथा प्रतीक्षते तद्वत्। कान्तिहीना रतिः सन्तुष्टिजनकं शापान्तकालं प्रतीक्ष्य स्थितवतीत्यर्थः।। ४६ ।।

कुमारसम्भवस्यैष चतुर्थोऽस्य रसोज्ज्वलः।
व्याख्यायि ख्यातिमान् सर्गो विद्यामाधवसूरिणा।।
इति विद्यामाधवीये कुमारसम्भवव्याख्याने चतुर्थः सर्गः।। श्रीः।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पञ्चमः सर्गः

पार्वतीतपःफलम्

एवं रतिविप्रलम्भवर्णनानन्तरं पूर्वं गृहं गतया पार्वत्या किं कृतं इत्याकाङ्क्ष्य तस्यास्तपस्समुद्योगं तपश्चरणं च तत्सन्निधौ तद्भक्तिपरीक्षार्थं ईश्वरागमनञ्च वक्तुं पञ्चमं सर्गं व्याख्यातुमारभे तथा समक्षमित्यादि -

तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती।

निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता।। १ ।।

तथेति। समक्षं आत्मनः सन्निधौ तथा उक्तप्रकारेण मनोभवं दहता पिनाकिना भग्नमनोरथा विनाशितेश्वरवशीकरणाभिलाषा सती पार्वती रूपं आत्मनः सौन्दर्यं हृदयेन निनिन्द मनसैवात्मरूपं निन्दितवती। मदीयरूपस्य हृद्यत्वे सति हरो मम वशवर्ती स्यात्। स च तथा नाभूदिति हेतुनात्मरूपं न मनोहरमिति मनसा भावयामासेत्यर्थः। प्रियमनोहर त्वाभावेन रूपस्य किं दोषः स्यादित्याशङ्क्य, तदेवोपपादयति - प्रियेषु सौभाग्यफला हि चारुता। भर्तृषु यत् सौभाग्यं मनोहरत्वं भर्तृवाल्लभ्यं वा, तदेव फलं यस्याः सा। प्रियेष्विति प्रियविषये सप्तमी। प्रियविषये चारुता भर्तृवाल्लभ्यफला भवति। हि हेतौ प्रसिद्धे वा। स्त्रीणां चारुत्वस्य भर्तृमनोहरत्वमेव फलमित्यर्थः। अस्य सर्गस्य वंशस्थं वृत्तम्।

जतौ तु वंशस्थमुदीरितं जरौ (वृत्तरत्नाकरः ३.४६)

इति तल्लक्षणम् ।। १ ।।

इयेष सा कर्तुमवन्ध्यकामतां समाधिमास्थाय तपोभिरात्मनः।

अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः।। २ ।।

इयेषेति। समाधिं तदेकचित्तत्वमास्थाय अवलम्ब्य तपोभिरात्मनोऽवन्ध्यकामतां सफलमनोरथतां कर्तुमियेष। भग्नमनोरथा पुनस्तत्साधनदृढचित्ततां आदाय रूपादिगुणैरसाध्येन प्रियवशीकरणेनात्ममनोरथं सफलं कर्तुमैच्छदित्यर्थः। अन्यथा तपोभिर्विनाऽन्येनोपायेन तद्द्वयं कथमवाप्यते, कथं लभ्यते। किं तद्द्वयमित्याह - तथाविधं शरीरार्धकरणदान कारणं प्रेम च तादृशः स्वः सर्वैश्वर्यनिधिरनन्यनारीरतिः पतिश्चेति।। २ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निशम्य चैनां तपसे कृतोद्यमां सुतां गिरीशं प्रति सक्तमानसाम्।
उवाच मेना परिरभ्य वक्षसा निवारयन्ती महतो मुनिव्रतात्।। ३ ।।

निशम्येति। तपसे कृतोद्यमां सुतां निशम्य सखीमुखेभ्यः श्रुत्वा गिरीशं त्रिनेत्रं प्रति सक्तमानसां रुद्रासक्तचित्तां तां वक्षसा परिरभ्यालिङ्गय महतो मुनिव्रतात् तपसो निवारयन्ती सती मेना मन्दमेनामुवाच सानुनयमेवमुक्तवती।। ।। ३ ।।

किमुवाचेत्याह -

मनीषितायार्च गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः।। ४ ।।

मनीषितायेति। मनीषिताय बुध्याध्यवसितायार्थाय। इष्टार्थं लब्धुं इत्यर्थः। हे वत्से, इष्टार्थसिद्ध्यै त्वं गृहेषु देवता अर्च, गृहेषु देवताः पूजय। एकस्मिन्नपि गृहे पुल्लिङ्गबहुवचनं वर्तते। गृहं गृहा वा पुम्भूम्नि इति भोजः। अर्चेति अर्च पूजायामिति धातोः आधृषाद्वेति(द्र.सि.कौ.पु.२३५) विकल्पाण्णिजभावः। तपस्त्वया कर्तुं न शक्यमित्याह - तपः क्व। तावकं त्वदीयं वपुः क्व च। नानयोः सङ्गतिरित्यर्थः। तदेवार्थान्तरन्यासेन द्रढयति। पेलवं मृदु शिरीषपुष्पं भ्रमरस्य पदं सहेत। पतत्रिणः पदं पुनर्न सहेत। भ्रमरावस्थानपदसहं शिरीषं पक्षिणोऽवस्थानं यथा न सहते तद्वत् कोमलं तव शरीरं कठिनशरीरसाध्यं तपः कर्तुं न क्षमत इत्यर्थः।। ४ ।।

इति श्रितेच्छामनुशासती सुतां शशाक मेना न नियन्तुमुद्यमात्।
क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्।। ५ ।।

इतीति। श्रितेच्छामाश्रिततपश्चरणेच्छां सुतामित्यनुशासती मेना उद्यमात् तपःप्रोत्साहात् नियन्तुं निवर्तयितुं न शशाक। तथा हि - ईप्सितार्थस्थिरनिश्चयं इष्टार्थे स्थिरनिश्चययुक्तं मनः च निम्नाभिमुखं पयश्च कः प्रतीपयेत् निरुन्ध्यात्। निवर्तयेदित्यर्थः।। ५ ।।

कदाचिदासन्नसखीमुखेन सा मनोरथज्ञं पितरं मनस्विनी।
अयाचतारण्यनिवासमात्मनः फलोदयान्ताय तपः समाधये।। ६ ।।

कदाचिदिति। मनस्विनी -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

महाकार्ये कृतोद्योगो विघ्नैरहतमानसः।
प्रारब्धं न त्यजति यः स मनस्वीति कथ्यते।। इति।

अनिवार्यमहाकार्यसाधनासक्तमानसा गौरी कदाचित् मनोरथज्ञं महेश्वरे दुर्निवारो मनोरथोऽभिलाषोऽस्या अस्तीति जानन्तं पितरं आत्मनोऽ रण्यवासं आसन्नसखीमुखेन अयाचत। याचयामासेत्यर्थः। याचतेः अकथितत्वात् द्विकर्मकत्वम्। किमर्थमरण्यवासं अयाचतेत्याह - फलोदयान्ताय तपस्समाधये। फलोदयः फलनिष्पत्तिरेवान्तोऽवसानं यस्य तस्मै। तपोनुष्ठानाय इत्यर्थः। अथवा तपोनियमायेत्यर्थो वाच्यः। स्युः समर्थननीवाकनियमाश्च समाधयः इत्यमरः (३.३.९८) ।। ६ ।।

अथानुरूपाभिनिवेशतोषिणा कृताभ्यनुज्ञा गुरुणा गरीयसा।
प्रजासु पश्चात्प्रथितं तदाख्यया जगाम गौरी शिखरं शिखण्डिमत्।।७।।

अथेति। अथानन्तरम्। अनुरूपेति। आत्मानुरूपवल्लभलाभाभिलाषविशेषोऽनुरूपाभिनिवेशः, तेन तोषिणा सन्तोषयुक्तेन। गरीयसा गुरुतरेण, गुरुणा पित्रा, कृताभ्यनुज्ञा गौरी, शिखरं हिमवतः शृङ्गं, जगाम। किंविशिष्टं तदित्याह - प्रजासु जनेषु, पश्चात् तपश्चरणकालानन्तरं, तदाख्यया गौरीनाम्ना, गौरीति प्रथितम्। गौरीशिखरमिति प्रसिद्धमित्यर्थः। शिखण्डिमत् मयूरयुक्तम्। एतद् विशेषणं तत्र शिखरे मयूरेभ्योऽन्येषां बाधकदुष्टसत्त्वानां अभावद्योतनार्थम्।। ७ ।।

विमुच्य सा हारमहार्यनिश्चया विलोलयष्टिप्रविलुप्तचन्दनम्।
बबन्ध बालारुणबभ्रु वल्कलं पयोधरोत्सेधविकीर्णसंहति।। ८ ।।

विमुच्येति। विलोलेति। यष्टिशब्देनात्र मुक्तावली गृह्यते, एकावल्येकयष्टिकेति (अमरः २.६.१०६)। विलोलया यष्ट्या प्रविलुप्तं वक्षस्थलानुलिप्तं चन्दनं येन, तं हारं विमुच्याहार्यनिश्चया अनिवार्याध्यवसाया सा गौरी बालारुणबभ्रु बालारुणवल्लोहितवर्णम्। बभ्रुः कडारः कपिलः वर्ण इति वैजयन्ती(५.३.१८)। पयोधरेति। पयोधरयोः उत्सेधेनौन्नत्येन विकीर्णा विश्लेषिता संहतिर्घनत्वं दाढर्यं यस्य तत्। तथाभूतं वल्कलं बबन्ध। स्तनावरणार्थं वक्षसि बद्धवतीत्यर्थः।। ८ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यथा प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत्तदाननम्।
न षट्पदश्रेणिभिरेव पङ्कजं सशैवलासङ्गमपि प्रकाशते।। ९ ।।

यथेति। यथा प्रसिद्धैरलङ्कृतैः। प्रसिद्धौ ख्यातभूषितौ इत्यमरः (३.३.१०४)। संस्कृतैः शिरोरुहैः केशैः, यथा तदाननं तस्या मुखं, मधुरं प्रियं, भवति। स्वादुप्रियौ तु मधुरावित्यमरः(३.३.१९२)। जटाभिरपि तदाननमेवमभूत् मधुरमभूत्। रमणीयमासीदित्यर्थः। तत्रोदाहरणमाह - न षट्पदेति। पङ्कजं षट्पदश्रेणिभिः भृङ्गावलिभिरेव न प्रकाशते, न केवलं शोभते। किन्तु सशैवलासङ्गमपि प्रकाशते। शैवलसंयुक्तमपि शोभत एव इत्यर्थः।। ९ ।।

प्रतिक्षणं सा कृतरोमविक्रियां व्रताय मौञ्जीं त्रिगुणां बभार याम्।
अकारि तत्पूर्वनिबद्धया तया सरागमस्या रशनागुणास्पदम्।। १० ।।

प्रतिक्षणमिति। प्रतिक्षणं कृतरोमविक्रियां जनितरोमाञ्चाम्। अपूर्वतीक्ष्णस्पर्शेन क्लेशात् उत्पादितरोमाञ्चामित्यर्थः। निर्विघ्नव्रतोपक्रमण करणभूताया मौञ्ज्याः सम्बन्धतः सञ्जाताद् हर्षात् तस्या रोमाञ्चः सञ्जात इति केचिदाहुः। त्रिगुणां त्रिगुणितां, यां मौञ्जीं सा व्रताय व्रतार्थं, बभार। तत्पूर्वनिबद्धया पूर्वनिबन्धनाभावात् तदानीमेव यथास्वं निबद्धया तया मौञ्ज्या अस्या गौर्या रशनागुणास्पदं मेखलागुणस्थानं सरागमकारि रागयुक्तं कृतम्। तीक्ष्णमौञ्जीस्पर्शात् मृदुकटिस्थानं रक्तमासीदित्यर्थः। अत्र सरागादिशब्दैः अर्थान्तरं व्यज्यते। एकया चिरं संयुक्तस्यापूर्वयान्यया सङ्गमे सति रागो भवति, तद्वद् इहाधिकगुणया रशनया चिरं युक्तः कटिप्रदेशः तदानीमपूर्वया त्रिगुणया मौञ्ज्या सङ्गमनात् सरागोऽभूदिति युक्तम्।। १० ।।

निसृष्टरागादधरान्निवर्तितः स्तनाङ्गरागारुणिताच्च कन्दुकात्।
कुशाङ्कुरादानपरिक्षताङ्गुलिः कृतोऽक्षसूत्रप्रणयी तया करः।। ११ ।।

निसृष्टेति। निसृष्टरागात् त्यक्तयावकादिरञ्जनात् अधरात् निवर्तितस्तथा स्तनाङ्गरागारुणितात् उत्पतनकाले स्तनयोरुपरिस्थितत्वात् कन्दुकः स्तनाङ्गरागारुणितो भवति। तस्मात् कन्दुकाच्च निवर्तितः कुशाङ्कुरादानपरिक्षताङ्गुलिः कुशाङ्कुरादानेन परिक्षता अङ्गुलयो यस्य स करस्तया अक्षसूत्रप्रणयीकृतः अधररञ्जनकन्दुकपतनादिकार्यसक्तिमपनीय अक्षमालावर्तन-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

युक्तं करं साकरोद् इत्यर्थः। प्रणयः स्नेहः परिचयो वा। उक्तं चानेकार्थे तद् वैजयन्त्याम् (७.१.४४) -

प्रणयः स्यात् परिचये याच्ञायां सौहृदेऽपि च। इति।। ११ ।।

महार्हशय्यापरिवर्तनच्युतैः स्वकेशपुष्पैरपि या व्यदूयत।

अशेत सा बाहुलतोपधायिनी निषेदुषी स्थण्डिल एव केवले।। १२ ।।

महार्हेति। महार्हायां दिव्यायां, शय्यायां परिवर्तनात् लुण्ठनात्, च्युतैः शय्यायां पतितैः, स्वकेशपुष्पैरपि या व्यदूयत, सुकुमारशरीरत्वात् परितापं प्राप्तवती, सा गौरी, निषेदुषी निषण्णा दिवसेष्वासीत्। निशासु बाहुलतोपधायिनी स्वबाहुलतामेव उपधानं कुर्वती। बाहुलतामुपदधातीत्यर्थे व्रत (पा.सू.३.२.८०) इति णिनिः। बाहुप्रधानव्रतयुक्तेत्यर्थः। शयनकाले शिरसोऽधस्तान्निधेयमुपबर्हणं उपधानमुच्यते। एवम्भूता केवले स्थण्डिल एवाशेत। तपोर्थं संस्कृता भूमिः स्थण्डिलम्। तत्रैव केवले शयनीयरहिते शयनमकरोदित्यर्थः। वेदिः परिष्कृता भूमिः समे स्थण्डिलचत्वरे(२.७. १७) इत्यमरः।। १२ ।।

पुनर्ग्रहीतुं नियमस्थया तया द्वयीषु निक्षेप इवार्पितं द्वयम्।

लतासु तन्वीषु विलासचेष्टितं विलोलदृष्टं हरिणाङ्गनासु च।। १३ ।।

पुनरिति। नियमस्थया। नियमाः शौचसन्तोषतपोयज्ञहुतादयः इति भोजः। नियमेषु तिष्ठन्त्या तया पुनर्ग्रहीतुं तपोवसानकाले सङ्ग्रहीतुं द्वयीषु द्वयमर्पितं निक्षेप इवार्पितम्। सत्यवचसि विश्वसनीये पुरुषे स्वाभीष्टकाले पुनरादानाय धनस्य न्यासो निक्षेपः। तद्धनञ्च निक्षेप इत्युच्यते। निक्षिप्यत इति निक्षेपः। स यथार्प्यते तद्वत्। अथवा तया द्वयीषु द्वयं निक्षेपोऽर्पितमिव निक्षेपतया निहितं नूनमित्युत्प्रेक्षा। अर्पणस्य यथार्थत्वाद् इदमेवेह युक्तम्। कासु किमित्याह - तन्वीषु कृशासु भद्रासु वा लतासु विलास चेष्टितमर्पितम्। हरिणाङ्गनासु विलोलदृष्टिश्च, चञ्चलं विलोकनं अर्पितमिवेति ।। १३ ।।

अतन्द्रिता सा स्वयमेव वृक्षकान् घटस्तनप्रस्रवनी व्यवर्धयत् ।

गुहोऽपि येषां प्रथमाप्तजन्मनां न पुत्रवात्सल्यमपाकरिष्यति।। १४ ।।

अतन्द्रितेति। अतन्द्रिता आलस्यरहिता। घटस्तनप्रस्रवनी। घट एव स्तनः, तस्य प्रस्रवनयुक्ता। प्रस्रवः क्षरणे क्षीरे स्तनक्षीराभिपूरणे इति भोजः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उक्तञ्च रघुवंशे(१.८४) - प्रस्नवेनाभिवर्षन्ती वत्सालोकप्रवर्तिनेति। घटजलस्तनप्रस्नविनीति वक्तव्ये जलशब्दलोपात् मध्यमपदलोपी समासः शाकपार्थिवादित्वाद् ग्राह्यः। घटजलस्तनक्षीरयुक्तेत्यर्थः। एवम्भूता सा स्वयमेव वृक्षकान् व्यवर्धयत्। वृक्षशब्दाद् अल्पार्थे कप्रत्ययः। बालवृक्षान् भूमौ प्रतिष्ठाप्य स्वयमेव घटोदकेन सिञ्चन्ती तान् विवर्धयामासेत्यर्थः। स्तनक्षीरयुक्ता काचिद् यथा शिशून् वर्धयति, तद्वत् प्रथमाप्तजन्मनां पूर्वजातानां येषां पुत्रवात्सल्यं गुहोऽपि नापाकरिष्यति। अत्र भ्रातृवात्सल्यमिति वक्तव्ये पुत्रवात्सल्य-शब्दप्रयोगात् गौर्या इत्यध्याहार्यम्। गौर्याः पुत्रवात्सल्यं पुत्रा एते इति यद्वात्सल्यं तत् तथा। अयमभिप्रायः - मात्रा प्रथमं पुत्रबुद्ध्या प्रवर्धितेषु पुत्रा एत इति तस्या यः स्नेहः तं पश्चात् पुत्रतया ज्ञातस्तरुः न निराकरिष्यति, भ्रातृस्नेहं तेषु करिष्यत्येव इति। अत्र भविष्यदपेक्षया लृट्। गुहोऽपि तानिदानीमपि भ्रातृवत् सम्भावयतीति यावत् ।। १४ ।।

अरण्यबीजाञ्जलिदानलालितास्तथा हि तस्यां हरिणा विशश्वसुः।
यथा तदीयैर्नयनैः कुतूहलात् पुरः सखीनाममिमीत लोचने।। १५ ।।

अरण्येति। अरण्ये यानि बीजानि नीवारादीनि तेषामञ्जलिदानेन लालिताः हरिणाः तथा तस्यां विशश्वसुः। हि हेतौ। सखीनां पुरतः पुरस्तादेव, तदीयैर्मृगसम्बन्धिभिः, नयनैः आत्मीयैः लोचनैः, इयं यथा कुतूहलाद् अमिमीत परिच्छेदयामास, तथा मृगा विश्वासं कृतवन्त इत्यर्थः।। १५ ।।

कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम्।
दिदृक्षवस्तामृषयोऽभ्युपागमन् न धर्मवृद्धेषु वयः समीक्ष्यते।। १६ ।।

कृतेति। कृताभिषेकां कृतमन्त्रस्नानां, हुतजातवेदसं हुतपावकां, कृताग्निहवनामित्यर्थः। त्वगुत्तरासङ्गवतीम्। त्वगिति वृक्षत्वक्। वल्कलं गृह्यते। उत्तरासङ्गमुत्तरीयं, त्वक्कृतोत्तरीययुक्ताम्। अधीतिनीं कृताध्ययनाम्। भावे निष्ठा। अधीतमस्या अस्तीत्यर्थे, इष्टादिभ्यश्च(पा.सू.५.२.८८) इति इनिप्रत्ययः। अध्ययनयुक्तामित्यर्थः। एवम्भूतां तां दिदृक्षवो मुनयोऽभ्युपागमन्। तद्दर्शनेच्छया तत्समीपमागता। बालायास्तस्या दर्शनार्थं वृद्धानां ऋषीणां अभ्युपागमनं किं युक्तमित्याशङ्क्याह - नेत्यादि। धर्मवृद्धेषु तपोवृद्धेषु वयो न समीक्ष्यते। वयो न

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वृद्धत्वकारणम्। किन्तु तप एव। अधिकतपसो वृद्धाः, अल्पतपसो बाला इति व्यवस्थेत्यर्थः।। १६ ।।

विरोधिसत्त्वोज्झितपूर्वमत्सरं द्रुमैरभीष्टप्रसवार्चितातिथि।

नवोटजा भ्यन्तरसम्भृतानलं तपोवनं तच्च बभूव पावनम्।। १७ ।।

विरोधीति। पावनं तत् तपोवनं एवं बभूव। कथमित्याह - विरोधिसत्त्वोज्झितपूर्वमत्सरम्। विरोधिसत्त्वैः करिसिंहमृगव्याघ्रादिभिः उज्झितः पूर्वं सहजो मत्सरो यत्र तत्। तपस्सामर्थ्यान्मिश्रीभूतमृगव्याघ्रादि सत्त्वमित्यर्थः। द्रुमैरभीष्टप्रसवार्चितातिथि अभीष्टैः फलैः अर्चिता अतिथयो यत्र तत्। नवोटजेति। नव उटजः पर्णशाला। तदन्तराले सम्भृतोऽनलो यत्र तत्। एवं तत् तपोवनमासीदित्यर्थः। पर्णशालोटजोऽस्त्रियाम्(२.२.६) इत्यमरः। प्रसवः पुष्पफलयोः इति भोजः।। १७ ।।

यदा फलं सर्वसमा समाधिना न तावता लभ्यममंस्त काङ्क्षितम्।

तदानपेक्ष्य स्वशरीरमार्दवं तपो महत् सा चरितुं प्रचक्रमे।। १८ ।।

यदेति। सर्वसमा सर्वभूतेषु समा, सा यदा तावता तावत्प्रमाणेन, समाधिना तपसा, काङ्क्षितं फलं, न लभ्यं लब्धुं अशक्यं, अमंस्त ज्ञातवती, तदा स्वशरीरमार्दवमनपेक्ष्य महद् दुश्चरं, तपश्चरितुं विधातुं, सा प्रचक्रमे उपक्रान्तवती ।। १८ ।।

क्लमं ययौ कन्दुकलीलयापि या तया मुनीनां चरितं व्यगाह्यत।

ध्रुवं वपुः काञ्चनपद्मनिर्मितं मृदु प्रकृत्या च ससारमेव च।। १९ ।।

क्लममिति। या कन्दुकसेवयापि कन्दुकक्रीडयापि, क्लमं ग्लानिं, ययौ प्राप्ता, तया मुनीनां चरितं व्यगाह्यत। मुनिकर्म कृतमित्यर्थः। मृदुतनोस्तस्याः कठिनशरीरनिर्वर्त्ये मुनिचरिते प्रवृत्तिः कथं स्याद् इत्याशङ्क्याह - ध्रुवमित्यादि। तत् तस्माद्, अस्याः वपुः काञ्चनपद्मधर्मि हि। ध्रुवं काञ्चनपद्मधर्मोऽस्यास्तीति काञ्चपद्मधर्मि, काञ्चनपद्मगुणमित्येतद् ध्रुवं निश्चितं, यद् यस्मात्, प्रकृत्या मृदु सुकुमारमपि, तद् वपुः ससारमेव सारयुक्तमेवेति हेतोः, तथा सुवर्णकृतपद्मसमानमिति निश्चितमित्यर्थः। अन्तस्स्थैर्यं काञ्चनपद्ममपि प्रकृत्या मृदु ससारं च भवति।। १९ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शुचौ चतुर्णां ज्वलतां हविर्भुजां शुचिस्मिता मध्यगता सुमध्यमा।
विजित्य नेत्रप्रतिघातिनीं प्रभामनन्यदृष्टिः सवितारमैक्षत।। २० ।।

शुचाविति। शुचिस्मिता सुमध्यमा सा शुचौ ग्रीष्मे, ज्वलतां चतुर्णां हविर्भुजामग्नीनां, मध्यगता सती, नेत्रप्रतिघातिनीं अवेक्षकाणां नेत्रविरोधकारिणीं, सूर्यस्य प्रभां विजित्यानादृत्य, सतताभ्यासेन विषह्य, अनन्यदृष्टिरन्यदर्शनरहिता, उदयाद् आरभ्य अस्तमयपर्यन्तं अन्यत्किञ्चिद् अपश्यन्ती केवलं सवितारमैक्षत। सूर्यमेवावालोकयदित्यर्थः। अत्र ग्रीष्मे पञ्चाग्निमध्यस्था शिशिरे जलमध्यगा इति महातपोभिहितम्। चतसृषु दिक्षु चत्वारोऽग्नयः सूर्यः पञ्चम इति पञ्चाग्नयः। यथोक्तं माघेन(२.५१) -

पञ्चमः पञ्चतपसः तपनो जातवेदसाम्। इति।। २० ।।

तथाभितप्तं सवितुर्गभस्तिभिर्मुखं तदीयं कमलश्रियं दधौ।
अपाङ्गयोः केवलमस्य दीर्घयोः शनैः शनैः श्यामिकया कृतं पदम्।।२१

तथेति। तथा तेन प्रकारेण, अहनि निरन्तरत्वेन सवितुः गभस्तिभिः किरणैः, अभितप्तं तदीयं मुखं कमलश्रियं दधौ। कमलवद् अम्लानमेवाशोभत। श्यामिकां नावापदित्यर्थः। किन्तु अस्य मुखस्य दीर्घयोरपाङ्गयोरेव केवलं शनैः शनैः श्यामिकया कालिम्ना, पदं कृतम्। कालिमानमवेक्षमाणयोरेव अपाङ्गयोर्मृदुत्वात् तयोरेव केवलं शनैः श्यामिका सञ्जातेत्यर्थः।। २१ ।।

अयाचितोपस्थितमम्बु केवलं रसात्मकस्योडुपतेश्च रश्मयः।
बभूव तस्याः किल पारणाविधिर्न वृक्षवृत्तिव्यतिरिक्तसाधनः।। २२ ।।

अयाचितेति। तस्याः व्रतपारणाविधिः वृक्षवृत्तिव्यतिरिक्तसाधनो न बभूव। वृक्षाणां वृत्तिः जीविका, वृक्षवृत्तिः। वृक्षवृत्तिव्यतिरिक्तं ततः पृथक् कृतं साधनं यस्य स तथोक्तः। वाताम्बुपर्णाद्यशनत्यागरूपोपवासो व्रतम्। तस्यान्ते यदशनं तत्पारणम्। अथवा पारणं देहधारणसाधनम्। उपवासान्तभुक्तौ स्याज्जीविका पारणाविधौ इति भोजः। पारयिष्यन्ति समापयिष्यन्त्यायुष्यं अनेनेति पारणं जीवसाधनमिति। पारणमेव पारणेति स्त्रीलिङ्गमपि भवति। पार कर्मसमाप्ताविति धातोः ण्यासश्रन्थोयुच् (पा.सू.३.३.१०७) इति युच्। पारणाविधिः, क्रियान्ता पारणा। कः पारणाविधिरित्याह - अयाचितेति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अयाचितोपस्थितं स्वयमेव प्राप्तमम्बु वृष्टिजलं तदेव केवलमेकं तथा रसात्मकस्यामृतमूर्तेः उडुपतेश्चन्द्रस्य रश्मयश्चेति द्वयमेव पारणमासीत्। वृक्षाणामपि वृष्टिजलं चन्द्रस्य रश्मयश्चेति जीविका तदद्वयमेवास्या अपि। तस्मिन् व्रते द्वयमेव पारणं देहधारणं आसीद् इत्यर्थः।। २२ ।।

निकामतप्ता विविधेन वह्निना नभश्चरेणेन्धनसम्भृतेन सा।

तपात्यये वारिभिरुक्षिता नवैर्भुवा सहोष्माणममुञ्चदूर्ध्वगम्।। २३ ।।

निकामेति। द्विविधेन वह्निना निकामतप्ता। द्वैविध्यमाह - नभश्चरेणेन्धनसम्भृतेन च। नभश्चरः सूर्यमण्डलसन्निहितः। दिवा सूर्येऽग्नि सन्निधानं अस्ति। तथा च श्रुतिः - उद्यन्तमादित्यमग्निरनुसमारोहतीति। प्रागादिदिक्षु चतुर्धा इन्धनैरुद्दीपित इन्धनैः सम्भृतः। एवं द्विविधेनाग्निना भृशं सन्तप्ता। ततस्तपात्यये ग्रीष्मावसाने वर्षागमने नवैर्वारिभिरुक्षिता सिक्ता, सा भुवा सहोर्ध्वगमूष्माणममुञ्चत्। ग्रीष्मोष्णबाष्पा ऊष्माण इति वैजयन्ती (५.४.९)। ग्रीष्मकाले सूर्येण तप्ता भूमिः नव वर्षाम्बुसेचने ऊर्ध्वगं बाष्पं मुञ्चतीति भूमिरप्यूष्माणममुञ्चत्। सा चेति ऊष्माणममुञ्चतामित्यर्थः। भूमिबाष्पोत्थानवत् तस्या अपि शिरस ऊर्ध्वं धूमाकारेणोष्मोद्गमोऽभूदित्यभिप्रायः।। २३ ।।

स्थिताः क्षणं पक्ष्मसु ताडिताधराः पयोधरोत्सेधनिपातचूर्णिताः।

वलीषु तस्याः स्खलिताः प्रपेदिरे चिरेण नाभिं प्रथमोदबिन्दवः।।२४।।

स्थिता इति। प्रथमोदबिन्दवः तस्या नाभिं चिरेण प्रपेदिरे। तदङ्गसौष्ठवद्योतकानि तेषां विशेषणान्याह - पक्ष्मसु क्षणं स्थिताः। अनेन पक्ष्मणां निबिडत्वं प्रकाशितम्। ताडिताधराः ताडितः अधरः यैस्ते तथा। अनेनाधरस्य पल्लववत् श्लक्ष्णत्वं दर्शितम्। पयोधरोत्सेधनिपातचूर्णिताः स्तनोच्चस्थाननिपातनेन स्तनयोः काठिन्यं दर्शितम्। वलीषु स्खलिताः स्खलनं प्राप्ताः। अनेन वलीनां सोपानवत् विषमत्वं ख्यापितम्। एवम्भूताः प्रथमवर्षजलबिन्दवः तस्या नाभिं चिरेण चिरात्, प्रविष्टाः। अनेन ह्रदवत् नाभेर्निम्नत्वं द्योतितम्। अत्र दन्त्याक्षराणां प्राचुर्यात् वर्णोत्कटो नामायं अनुप्रासालङ्कारभेदः।। २४ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शिलाशयां तामनिकेतवासिनीं निरन्तरास्वन्तरवातवृष्टिषु।
व्यलोकयन्नुन्मिषितैस्तडिन्मयैर्महातपःसाक्ष्य इव स्थिताः क्षपाः।। २५।।

शिलाशयामिति। विशालायां शिलायां शायिनीं, निरन्तरासु सन्ततासु, अन्तरवातवृष्टिषु अन्तरे मध्ये वातो विद्यते यासां ताः अन्तरवाताः वृष्टयः। तासु महावृष्टिषु। अनिकेतवासिनीं, त्यक्तगृहवासां इत्यर्थः। महातपःसाक्ष्ये स्थिताः क्षपाः तडिन्मयैरुन्मिषितैः तां व्यलोकयन् इत्यन्वयः। समक्षदर्शी साक्षी स्यादिति भोजः। साक्षिणो भावः साक्ष्यम्। महातपस्साक्षित्वे स्थिताः। तपस्साक्षीभूता इत्यर्थः। उन्मिषितैः उन्मेषणं उन्मिषा। षिद्भिदादिभ्योऽङ् (पा.सू.३.३.१०४) इति अङ्प्रत्ययः। उन्मिषा एषां सञ्जातेति उन्मिषितानि नयनानि। तदस्य सञ्जातमिति तारकादिभ्य इतच्(पा.सू.५.२.३६)। अथवा उन्मिषितं उन्मेषणं एषां अस्तीति अस्मिन्नर्थे अर्शआदिभ्योऽच्(पा.सू.५.२.३६) इत्यच्प्रत्ययः। शुक्लः कम्बलः इत्यादिवद् द्रष्टव्यम्। तटिद्रूपैर्लोचनैस्तां व्यलोकयन्निवेत्युत्प्रेक्षा। तटिद्वातवृष्टियुक्तासु रात्रिषु गृहावरणादिरहिता सा शिलायामेव शयनमकरोद् इति परमार्थः। अनेन तपसो महत्त्वं दर्शितम्।।२५।।

निनाय सात्यन्तहिमोत्किरानिलाः सहस्य रात्रीरुदवासतत्परा।
परस्पराक्रन्दिनि चक्रवाकयोः पुरो वियुक्ते मिथुने कृपावती।। २६ ।।

निनायेति। उदवासतत्परा - उदवास उदकवासः। उदकशब्दस्य उदादेशः। उदकवासे तत्परा। अत्यन्तहिमोत्किरानिलाः अत्यन्तं हिमं उत्किरन्तीति हिमोत्किराः। तथाभूता अनिला वाता विद्यन्ते यासां ताः। इगुपधज्ञाप्रीकिरः कः(पा.सू.५.२.१२७) इति किरतेः कप्रत्ययः। सहस्य रात्रीः पौषमासरात्रीः। पौषे तैषसहस्यौ द्वौ इत्यमरः(१.४.१४)। अतिहिमवर्षवातयुक्ताः पौषरात्रीः उदवासतत्परा निनाय चेत्यन्वयः। समुच्चयार्थः चशब्दः। शीतकालरात्रिषु जलवासाख्यं महातपश्चाकरोद् इत्यर्थः। कालोचितं करुणार्द्रचित्तत्वगुणद्योतकं तस्या विशेषणान्तरं आह - परस्पराक्रन्दिनि। परस्परमुद्दिश्याक्रन्दति रोदितीति परस्पराक्रन्दी। अन्योन्यं प्रति कृतरोदने पुरोऽग्रेऽवस्थिते वियुक्ते रात्रौ विरहं प्राप्ते चक्रवाकयोः मिथुने कृपावती। तद्दर्शनात् सञ्जातकरुणेत्यर्थः।। २६ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मुखेन सा पद्मसगन्धिना निशि प्रवेपमानाधरपत्रशोभिना।
तुषारवृष्टिक्षतपद्मसम्पदां सरोजसन्धानमिवाकरोदपाम्।। २७ ।।

मुखेनेति। निशि कण्ठमात्रे जले स्थिता सा प्रवेपमानाधरपत्र शोभिना शीतवशेन प्रकम्पमानाधरोष्ठदलशोभिना, पद्मसगन्धिना पद्म समानेन, मुखेन तुषारवृष्टिक्षतपद्मसम्पदां हिमजलवृष्ट्या नाशितपद्म सम्पत्तीनां, अपां सरोजसन्तानमकरोदिव। आकण्ठमप्सु मग्नायास्तस्याः पद्मसमानमुखमेव अदृश्यतेत्यर्थः। शिशिरे नष्टपद्मानामपां तेन मुखपद्मेन सा पुनःपद्मसन्तानं कृतवतीत्युत्प्रेक्षा। सगन्धी सदृशः समः इति भोजः ।।२७।।

स्वयंविशीर्णद्रुमपर्णवृत्तिता परा हि काष्ठा तपसस्तया पुनः।
तदप्यपाकीर्णमतः प्रियंवदां वदन्त्यपर्णेति च तां पुराविदः।। २८ ।।

स्वयमिति। स्वयमेव विशीर्णानि पतितानि, द्रुमपर्णानि वृत्तिः जीविका, यत्र तपसि तत् स्वयंविशीर्णद्रुमपर्णवृत्ति। तस्य भावस्तत्ता। सा तपसः परा काष्ठा हि। परा उत्कृष्टान्तररहिता, काष्ठोत्कर्षावस्था। हि प्रसिद्धमेतत्। काष्ठोत्कर्षे स्थितौ दिशि(३.३.४१) इत्यमरः।

परं दूरान्यमुख्येषु परोऽरिपरमात्मनोः (६.५.४९) इति यादवः। तया पुनस्तदपि स्वयं विशीर्णद्रुमपर्णमपि अपाकीर्णं निरस्तं त्यक्तमिति यत्, अतः कारणात् पुराविदः पूर्ववृत्तान्तज्ञाः मनीषिणस्तां अपर्णेति च वदन्ति। प्रियंवदा प्रियं सत्यं वदतीति प्रियंवदा। पर्णत्यागाद् अपर्णेत्यादियथार्थवादिन इत्यर्थः। प्रियवशे वदः खच्(पा.सू. ३.२.३८) इति खचि, खित्यनव्ययस्य(पा.सू. ६.३.६६) इति मुमि प्रियंवदसिद्धिः। अभिजनगुणयोगात् पार्वत्युमेत्यादि नाम। एवं पर्णत्यागात् अपर्णेति नाम चास्याः कथयन्तीत्यर्थः।। २८ ।।

मृणालिकापेलवमेवमादिभिर्व्रतैः स्वमङ्गं ग्लपयन्त्यहर्निशम्।
तपः शरीरैः कठिनैरुपार्जितं तपस्विनां दूरमधश्चकार सा।। २९ ।।

मृणालिकेति। मृणालिकापेलवं मृणालसुकुमारं शरीरमेवमादिभिः व्रतैः अहर्निशं ग्लपयन्ती क्षपयन्ती क्लेशयन्ती सा कठिनैः शरीरैरुपार्जितं दूरमीषत्साधर्म्येणापि रहितं तपस्विनां तपः अधश्चकार। कठिनशरीरकृतात् तपस्वितपसो मृदुशरीरकृतमस्याः तपोऽत्युत्तममासीदित्यभिप्रायः।। २९ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एवं तपोवर्णनमुपसंहृत्य तद्भावपरिरक्षणार्थं ब्रह्मचारिरूपच्छन्नेश्वरागमनं वर्णयति -

अथाजिनाषाढधरः प्रगल्भवाग् ज्वलन्निव ब्रह्ममयेन तेजसा।

विवेश कश्चिज्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रमो यथा।। ३० ।।

अथेति। अजिनाषाढधरः। पालाशो दण्ड आषाढः(२.७.४४) इत्यमरः। कृष्णाजिनं पालाशदण्डं च दधानः प्रगल्भवाक् निरपशब्दादिमयसंस्कृतभाषी ब्रह्ममयेन ब्राह्मणतेजसा ज्वलन्निव जटिलः जटावान्। ब्रह्मचारिणो जटाधरत्वमपि मनुना दर्शितम्(२.२१९) -

मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखाधरः इति।

एवम्भूतः कश्चित् तपोवनं विवेश। शरीरबद्धः प्रथमाश्रमो यथा। शरीरं बध्नातीति शरीरबद्धः। शरीरेण बद्धो युक्तः मूर्तिमान्। ब्रह्मचर्याश्रम इव लक्ष्यमाण इत्यर्थः।। ३० ।।

तमातिथेयी बहुमानपूर्वया सपर्यया प्रत्युदियाय पार्वती।

भवन्ति साम्येऽपि निविष्टचेतसां वपुर्विशेषेष्वतिगौरवाः क्रियाः।। ३१।।

तमिति। आतिथेयी अतिथिषु साध्वी। अतिथिषु सम्भावना- कारिणी इत्यर्थः। पथ्यतिथिवसतिस्वपतेर्ढञ्(पा.सू.४.४.१०४), टिड्ढाणञ् (४.१.१५) इत्यादिना ङीप्। सा पार्वती बहुमानपूर्वया भक्तिपूर्वया, सपर्यया अर्घ्यादिपूजया, तं प्रत्युदियाय तमुद्दिश्याभ्युत्थानमकरोत्। पूजार्हणा सपर्यार्चेति भोजः। तमीश्वरं अविदित्वा किमर्थं अधिकं अपूजयद् इत्याशङ्क्याह - भवन्तीति। अभिनिविष्टचेतसां साम्येऽपि वपुर्विशेषेषु अतिगौरवाः क्रिया भवन्तीत्यन्वयः। अतिथिपूजादिकर्मणि अत्यासक्तमनसां सर्वातिथिसाम्येऽपि शरीरविशेषेषु विशिष्टगौरवोपेताः पूजाक्रियाः प्रवर्तन्ते। रूपमेवास्यैतन्महिमानमाचष्टे इति (यजुः)श्रुतिप्रमाणेन निपुणमनसोऽभ्यागतशरीरदर्शनेनैव महान्त इति ज्ञातत्वात् सगौरवविशेषं आराधयन्तीत्यभिप्रायः।। ३१ ।।

विधिप्रयुक्तां परिगृह्य सत्क्रियां परिश्रमं नाम विनीय च क्षणम्।

उमां स पश्यन् ऋजुनैव चक्षुषा प्रचक्रमे वक्तुमनुज्झितक्रमः।। ३२ ।।

विधीति। विधिप्रयुक्तां शास्त्रविधानेन कृतां, सत्क्रियां पूजां, परिगृह्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रतिगृह्य, परिश्रमञ्च क्षणं विनीय नाम अपनीय किल। अत्र नामशब्दः किलशब्दवदपरमार्थे वर्तते। अविद्यमानपरिश्रममपनयनव्याजेन दर्शयित्वा ऋजुनैव चक्षुषा रागादिरहितत्वाद् अवक्रेण नयनेनोमां पश्यन् सः ब्रह्मचारी, अनुज्झितक्रमः अपरित्यक्तवचनक्रमः, भूत्वा वक्तुं प्रचक्रमे प्रारब्धवान्।। ३२।।

अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते।

अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनम्।। ३३ ।।

अपीति। अपिशब्दः प्रश्ने वर्तते। अपिः समुच्चये प्रश्ने इति भोजः। क्रियार्थं होमादिक्रियार्थं, समित्कुशमपि समिधः कुशाश्च सुलभाः कच्चित् समित्कुशमिति। सर्वो द्वन्द्वो विभाषयैकवद् भवतीति एकवद्भावः। जलानि ते तव, स्नानविधौ क्षमाणि अपि। स्नानक्रियायां योग्यानि कच्चित्। शक्ते योग्येऽपि च क्षमा इति वररुचिः। त्वं स्वशक्त्या तपसि प्रवर्तसे अपि कच्चित्। शक्त्यभावे तपःकरणे को दोष इत्याशङ्क्याह - शरीरमाद्यं धर्मसाधनं खलु। शक्तिमतिक्रम्य तपसि क्रियमाणे सति शरीरं न स्यात्। अतः सकलधर्माणामाद्यं साधनभूतं शरीरं रक्षणीयमित्यतः स्वशक्तिं अतिक्रम्य तपसि न प्रवर्तनीयमित्यभिप्रायः।। ।। ३३ ।।

अपि त्वदावर्जितवारिसम्भृतं प्रवालमासामनुबन्धि वीरुधाम्।

चिरोज्झितालक्तकपाटलेन ते तुलां यदारोहति दन्तवाससा।। ३४ ।।

अपीति। एषां भूरुहाणां त्वदावर्जितवारिसम्भृतं प्रवालमनुबन्धि अपि अनुबन्धयुक्तं कच्चित्। सम्बन्धे सन्ततासक्तौ चानुबन्धः प्रकीर्तितः इति श्रीभोजः। आसामनुबन्धिवीरुधामिति क्वचित् पाठः। वीरुधां लतानाम्। लता प्रतानिनी वीरुद् गुल्मिनी(२.४.९) इत्यमरः। एषामनुबन्धवीरुधामित्यपपाठः। यत्प्रवालं चिरोज्झितालक्तकपाटलस्य चिरकालत्यक्तालक्तकरञ्जनस्यापि पाटलस्य ते दन्तवाससा ओष्ठस्य तुलामारोहति। उपमानं प्राप्नोतीत्यर्थः। ओष्ठाधरौ तु रदनच्छदौ दशनवाससी(२.६.९०) इत्यमरः।। ३४ ।।

अपि प्रसन्नं हरिणेषु ते मनः करस्थदर्भप्रणयापराधिषु।

य उत्पलाक्षेपचलैर्विलोचनैस्तवाक्षिसादृश्यमिव प्रयुञ्जते।। ३५ ।।

अपीति। करस्थदर्भप्रणायापराधिषु त्वत्करस्थितदर्भप्रार्थनया

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अपराधिषु, हरिणेषु ते मनः प्रसन्नमपि कच्चित्। तपस्विनस्तं मृगापराधं क्षमन्त एव। त्वयापि किं क्षम्यत इत्यभिप्रायः। ये हरिणाः उत्पलाक्षेपचलैः उत्पलानामाक्षेपो वायुप्रेरणं, तद्वच्चलैः समीरणाक्षिप्तोत्पलवच्चलैः विलोचनैः तवाक्षिसादृश्यं प्रयुञ्जते इव। दर्शयन्तीवेत्यर्थः। एवं त्वदीयनेत्रद्वयमपि इति नेत्रसाम्यं स्वलोचनैः प्रकाशयन्तीत्यभिप्रायः।। ३५ ।।

यदुच्यते पार्वति पापवृत्तये न रूपमित्यव्यभिचारि तद् वचः।
तथा हि ते शीलमुदारदर्शने तपस्विनामप्युपदेशतां गतम्।। ३६ ।।

यदिति। हे पार्वति, रूपं सौन्दर्यं, पापवृत्तये पापाचरणाय, भवतीति यदुच्यते, रूपयुक्ताः स्त्रियः पुरुषा वा पापमेव कुर्वन्तीति लोकेन यदुच्यते, तद्वचः अव्यभिचारि न भवति, सत्यं न भवति।

तच्चाव्यभिचारित्वमेवोपपादयति तथाहीति। उदारदर्शने रूपवति, ते तव, शीलं वृत्तं, तपस्विनामप्युपदेशतां गतम्। इत्थं प्रवर्तनीयमिति मुनीनामप्युपदेशत्वं प्राप्तम्। उपदेशोऽभूदित्यर्थः। ऋषयोऽपि त्वच्छीलमनुवर्तन्त इति रूपवत्यां त्वयि पापलेशस्यापि अविद्यमानत्वात् रूपं पापकारणमिति लोकवचनं सत्यं न भवति। त्वयि व्यभिचारित्वादित्यभिप्रायः। अत्र गतौ व्यभिचारित्वाद् अस्थानपदत्वं नाम दूषणमिति केचिद् आहुः। तन्न, वृत्तभङ्गप्रसङ्गात्। अन्यथा वक्तुं अशक्यत्वात् उक्तमनुसरणीयम्।। ३६ ।।

विकीर्णसप्तर्षिबलिप्रभासिभिस्तथा न गाङ्गैः सलिलैर्दिवश्च्युतैः।
यथा त्वदीयैश्चरितैरनाविलैर्महीधरः पावित एष सान्वयः।। ३७ ।।

विकीर्णेति। विकीर्णैः सप्तर्षिकृतैः बलिभिः प्रभासमानैः दिवः च्युतैः पतितैः गाङ्गैः सलिलैः महीधरो हिमवान् तथा न पावितः, अनाविलैः निर्दोषैः, त्वदीयैः चरितैः एष हिमवान् सान्वयो यथा पावितः। एतैः सान्वयस्य पावितत्वात् गङ्गाजलैस्तथा पावितो नाभूदित्यर्थः।। ३७ ।।

अनेन धर्मः सविशेषमद्य मे त्रिवर्गसारः प्रतिभाति भामिनि।
त्वया मनोनिर्विषयार्थकामया यदेक एव प्रतिगृह्य सेव्यते।। ३८ ।।

अनेनेति। हे भामिनि, अनेन कारणेन धर्मः सविशेषं त्रिवर्गसारः इत्यद्य मे प्रतिभाति। त्रिवर्गो धर्मकामार्थैः(२.७.५७) इत्यमरः। धर्म एव सविशेषतः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सारः श्रेष्ठ इति मम चेतसि प्रकाशते। सारः श्रेष्ठे स्थिरांशे च न्यायोपेतौ बले धृतौ इति भोजः। तत्कारणमेवाह - मनोनिर्विषयार्थ कामया मनसो निर्विषयावर्थकामौ यस्याः सा, तथा मनसाप्यसंस्कृतार्थ कामया इत्यर्थः। तया त्वया, धर्म एक एव प्रतिगृह्य स्वीकृत्य, सेव्यत इति यत् अनेनेति पूर्वोक्तम्।। ३८ ।।

प्रयुक्तसत्कारविशेषमात्मना न मां परं सम्प्रतिपत्तुमर्हसि।

यतः सतां सन्नतगात्रि सङ्गतं मनीषिभिः साप्तपदीनमुच्यते।। ३९ ।।

प्रयुक्तेति। आत्मना त्वया प्रयुक्तसत्कारविशेषं कृतपूजाविशेषं मां अपरमन्यं सम्प्रतिपत्तुं ज्ञातुं नार्हसि। मां मंस्था इत्यर्थः। हे सन्नतगात्रि, चारुशरीरे। नतं चारुसन्नतमिति श्रीभोजः। यदा यस्मात् सतां सत्पुरुषाणां सङ्गतं सख्यं मनीषिभिः साप्तपदीनं सप्तपदजन्यमुच्यते। सह सप्तपदानि यो गच्छति स तस्य सखेति सतां सख्यं सन्तः वदन्ति। यतः तस्मात् मामपि सखायमेव जानीहि। परमन्यं सम्प्रतिपत्तुं नार्हसि। यतः सतां सङ्गमं मनीषिभिः साप्तपदीनं सख्यमुच्यते। तस्मान्मामपि सखायमेव जानीहि, नान्यमित्यभिप्रायः। साप्तपदीनं सख्यम्(पा.सू.५.२.२२) इति निपातनात् तत्पदस्य साधुत्वम्। अत्राश्रमे स्थितायाः पार्वत्याः तेन सह सप्तपदगमनाभावात् एतन्न स्यादिति दूषणं न वाच्यम्। दूरं व्रजार्थाय अनुव्रजार्थाय गतायास्तस्यास्तेन सह सप्तपदगमनसम्भवादिति। सप्तपदगमनकालं येन सह यस्तिष्ठति तयोः सख्यमिति केचिदाहुः। सख्यं साप्तपदीनं च सुहृत्त्वं सङ्गतं तथा इति श्रीभोजः।

तत्रोत्तरार्धे केचिदन्यथा व्याचक्षते - यदा यतो यस्मिन् काले सतां सङ्गतं सङ्गमनं भवति तदैव साप्तपदीनं सख्यं भवतीति मनीषिभिरुच्यते इति।। ३९ ।।

अतोऽत्र किञ्चिद् भवतीं बहुक्षमां द्विजातिभावादुपपन्नचापलः।

अयं जनः प्रष्टुमनास्तपोधने न चेद् रहस्यं प्रतिवक्तुमर्हसि।। ४० ।।

अत इति। हे तपोधने, द्विजातिभावात् ब्राह्मणत्वात्, उपपन्नचापलः प्राप्तचापलः। ब्राह्मणेषु चपलत्वस्य स्थैर्याभावस्य सम्भावितत्वात् सम्प्राप्तचापल इत्यर्थः। अयं जनः बहुक्षमां प्रभूतक्षान्तिं भवतीम्, अतः सख्यात् कारणात्, अत्र अस्मिन्, तपोयुक्तपरिग्रहे किञ्चित् प्रष्टुमनाः। ब्राह्मणत्वाच्चपलोऽहं सख्येनात्र त्वां किञ्चित्प्रष्टुकामोऽस्मीत्यर्थः। प्रष्टुं मनोऽस्यास्तीति विग्रहे समासः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लुप्येदवश्यमः कृत्ये तुं काममनसोरपि

इति मकारलोपः। पृष्टमिदं कार्यं रहस्यमप्रकाश्यं न चेत् तर्हि त्वं प्रतिबोधयिष्यसि। मां प्रतिबोधयेत्यर्थः। अनिष्टे प्रश्ने कृतेऽपि क्रोध परिहारार्थं बहुक्षमामिति स्तुतिरूपं विशेषणम्। अयं जन इति पदद्वयमहमित्यर्थवाचकं द्रष्टव्यम्। यथोक्तं भोजेन - सोऽयं शब्दं जनपदं अस्मदर्थे प्रयुञ्जते इति।। ४०।।

तपसा लभ्यानि सर्वाणि फलानि तव सन्त्येव। तपः अस्त्येव। ततः किमर्थं तपस्यसीत्याह -

कुले प्रसूतिः प्रथमस्य वेधसस्त्रिलोकसौन्दर्यमिवोदितं वपुः।

अमृग्यमैश्वर्यसुखं नवं वयस्तपःफलं स्यात् किमतः परं वद।। ४१ ।।

कुल इति। प्रथमस्य वेधसः ब्रह्मणः कुले ते प्रसूतिः जन्म। हिमवतो ब्रह्मणा सृष्टत्वात् ब्रह्मकुलत्वं सिद्धम्। आर्जितं विमृग्यैकीकृतं त्रिलोक-सौन्दर्यमिव तव वपुः तवैश्वर्यसुखममृग्यं स्वयमेव सम्पन्नम्। वयश्च नवं कुलवयोरूपैश्वर्यसुखात्मकस्य तपःफलस्य त्वयि विद्यमानत्वात्। अतोऽस्मात् कुलादेः परं तपःफलं किं स्यात्, किमेव भवेत्।। ४१ ।।

भवत्यनिष्टादपि नाम दुस्सहान्मनस्विनीनां प्रतिपत्तिरीदृशी।

विचारमार्गप्रहितेन चेतसा न दृश्यते तच्च तलोदरि त्वयि।। ४२ ।।

भवतीति। दुस्सहात् सोढुमशक्यात्, अनिष्टात् परैः कृताद् अप्रियादपि, मनस्वीनीनां मानिनीनां, ईदृशी प्रतिपत्तिः प्रवृत्तिः, भवति। नाम सम्भावनायां। प्रवृत्तिः सम्भावितेत्यर्थः।

प्राप्तिः प्रवृत्तिप्रागल्भ्ये गौरवप्रतिभासु च।

ज्ञाने भक्तिविशेषे च प्रतिपत्तिरुदाहृता।।

इति भोजः। हे तलोदरि कृशोदरि। तलशब्देन मुष्टिर्लक्ष्यते। मुष्टिग्राह्योदरीत्यर्थः। तच्च तदाऽनिष्टमपि विचारमार्गप्रहितेन चेतसा त्वयि न दृश्यते। मनसा विचार्यमाणं त्वयि न प्रतीयते इत्यर्थः। एवं मनोज्ञायास्तवानिष्टं क एव कुर्यात्। अतस्तदपि तपसः कारणं नास्तीत्यभिप्रायः।। ४२ ।।

अलभ्यशोकाभिभवेयमाकृतिर्विमानना सुभ्रु कुतः पितुर्गृहे।

पराभिमर्शो न तवास्ति कः करं प्रसारयेत् पन्नगरत्नसूतये।। ४३ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अलभ्येति। इयमाकृतिरलभ्यशोकाभिभवा, अलभ्यः असम्भाव्यः शोकाभिभवो यस्याः सा तथा। तदेवोपपादयति - हे सुभ्रु, पितुर्गृहे तव विमानना कुतः। अवमानना नास्त्येवेत्यर्थः। अनेनालभ्यशोकत्वं दर्शितम्। पराभिमर्शः परेण करस्पर्शः परेण बलाद् धर्षणञ्च तव नास्ति।

तथाहि। पन्नगरत्नसूतये सर्पफणरत्नप्रेरणाय तद्ग्रहणाय करं कः प्रसारयेत्। यथा सर्परत्नमादातुं कश्चिदपि करं न प्रसारयति, तथा जिजीविषुः पुमान् कश्चिदपि त्वां बलान्न संस्पृशतीत्यर्थः। अत्र सूतिशब्दः षूञ् प्रेरण इति धातोः क्तिन्प्रत्ययान्तो ग्राह्यः। ननु सम्बुद्धौ सुभ्रुशब्दः कथं स्यात्। भ्रूशब्दस्य उवङ्स्थानत्वात् नेयङुवङ्स्थानावस्त्री(पा.सू. १.४.४) इति नदीसंज्ञाप्रतिषेधनात् अम्बार्थनद्योर्ह्रस्वः (पा.सू. ७.३.१०७) इति सम्बुद्धौ ह्रस्वो न स्यात्। अतो ह्रस्वान्तस्य सुभ्रुशब्दस्य निर्वाहो गम्यः। अतः सुभ्रू इति प्रयोक्तव्यमिति चेत् सत्यमेतत्। अस्य पूर्वव्याख्यातृभिः निर्वाहो न दृष्टः। दक्षिणावर्तनाथेनापि ह्रस्वान्तस्य सुभ्रुशब्दस्य निर्वाहो मृग्य एव इत्युक्तम्। तथापि वयमत्र किञ्चित् गतिं ब्रूमहे - विमानना असुभ्रु इति पदच्छेदः कार्यः। पितृगृहे असुभ्रु विमानना कुत इत्यन्वयः। असुभ्रु इति क्रियाविशेषणम्। क्रियाविशेषणानां नपुंसकत्वमिति तस्य नपुंसकत्वात् ह्रस्वो नपुंसके प्रातिपदिकस्य(पा.सू.५.३.८३) इति ह्रस्वत्वम्। समीचीना भ्रूः सुभ्रूः। तदन्या भङ्गुरा भ्रूः असुभ्रूः। कोपे सति मृदु खलु भ्रूभङ्गो जायते। कोपेन भङ्गुरा भ्रूर्यथा भवति तथा विमानना कुतः। कोपतः सभ्रूभङ्गमवमाननास्येत्यर्थः।

चण्डि कोपभिदुरभ्रुवीक्षितं विद्रुमश्रि चलदोषपल्लवम्

इति प्रयोगश्चास्ति। चलितैकभ्रुरथाङ्गपाणिना(१६.१६)इति माघेन चोक्तम्।।४३।।

किमित्यपास्याभरणानि यौवने धृतं त्वया वार्धकशोभि वल्कलम्।
वद प्रदोषे स्फुटचन्द्रतारका विभावरी यद्यरुणाय कल्पते।। ४४ ।।

किमित। किं प्रश्ने। इतिशब्दो हेतौ वर्तते किमिति इति। केन हेतुना आभरणान्यपास्य वार्धकशोभि वृद्धत्वे शोभत इति, तथा वार्धके योग्यधारणं वल्कलं त्वया यौवने धृतम्। नैतद् युक्तमित्याह - वदेति। विकीर्णतारका अपास्ततारका भूत्वा विभावरी रात्रिः प्रदोषे अरुणाय कल्पते। अरुणं गन्तुं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

समर्था भवति यदि तर्हि त्वं वद। युक्तमेतदिति त्वया वाच्यमित्यर्थः। वृद्धत्वे वृद्धसङ्घे च वार्धकम् इति भोजः।। ४४ ।।

तपोहेतुं निराकरोति -

दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः।
अथोपयन्तारमलं समाधिना न रत्नमन्विष्यति मृग्यते हि तत्।। ४५ ।।

दिवमिति। त्वं दिवं स्वर्गं प्रार्थयसे यदि तर्हि श्रमो वृथा। तपः निरर्थकम्। श्रमु तपसि खेदे चेति धातुः।

अभ्यासे शास्त्रविद्यादेः खेदे तपसि च श्रमः

इति श्रीभोजमहाराजः। किमर्थं तपो वृथेत्याह - तव पितुः प्रदेशा देवभूमयः। अतस्तत्प्राप्त्यर्थं तपो न कार्यमित्यर्थः। अथेति प्रश्ने।

मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ(३.४.८)

इत्यमरः। उपयन्तारं भर्तारं किं प्रार्थयसे। तर्हि समाधिना तपसा अलम्। तपो मा भूत्। यतो रत्नं कर्तृ नान्विष्यति। मम ग्राहकः कोऽस्तीति रत्नं ग्रहीतारं न मार्गयतीति। तद् रत्नं मृग्यते हि। ग्रहीतृभिः पुरुषैः क्वास्तीति अन्विष्यते खलु। कन्यारत्नं त्वां लब्धुं पुरुषेणैव तपो विधेयम्। भर्तृप्राप्तये त्वं तपो मा कार्षीः इत्यभिप्रायः।

उपयन्ता च वोढा च भर्ता वोढा धवः पतिः

इति भोजः। गवेषते मृगयते मार्गत्यन्विषतीति च क्रियानिघण्टुः।। ४५ ।।

निवेदितं निःश्वसितेन सोष्मणा मनस्तु मे संशयमेव गाहते।
न दृश्यते प्रार्थयितव्य एव ते भविष्यति प्रार्थितदुर्लभः कथम्।। ४६ ।।

निवेदितमिति। सोष्मणा प्रार्थितप्राप्त्यभावदुःखाद् उष्णेन तव निःश्वसितेन निवेदितं भर्तृप्राप्त्यर्थमेवेयं तपस्यतीति ज्ञापितं, मे मनस्तु संशयं सन्देहमेव, गाहते प्राप्नोति। तपःकरणे ज्ञातेऽपि विषयविशेषे संशय द्योतनार्थस्तुशब्दः। कस्मिन् संशय इत्याशङ्क्य तद्विषयमाह - नेति। तव प्रार्थनीयो न मया लक्ष्यत एवेत्यर्थः। यद्यपि कश्चिदस्ति चेत् स वरः प्रार्थितदुर्लभः कथं भविष्यति। प्रार्थितश्चासौ दुर्लभश्चेति प्रार्थितदुर्लभः। त्वया प्रार्थितः सन् दुर्लभः कथं स्यादित्यत्र मे संशय इत्यभिप्रायः।। ४६ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अहो स्थिरः कोऽपि तवेप्सितो युवा चिराय कर्णोत्पलशून्यतां गते।
उपेक्षते यः श्लथबन्धिनीरिमा जटाः कपोले कलमाग्रपिङ्गलाः।। ४७।।

अहो इति। अहो आश्चर्यमेतत्। तव ईप्सित इष्टः, कोऽपि स युवा स्थिरः कठिनहृदयो भवति। यश्चिराय चिरं, कर्णोत्पलशून्यतां गते तव कपोले श्लथबन्धिनीः श्लथबन्धयुक्ताः, कलमाग्रपिङ्गलाः कलमशूक कपिलाः इमाः जटाः उपेक्षते अनादृत्य तिष्ठति। स युवा स्थिर इति सम्बन्धः। ननु कथं कपोले कर्णोत्पलशून्यत्वं स्यात्। शिरसि जटानां सम्भवात् कपोले जटा इति प्रयोगश्च कथं स्यादिति चेत्, अत्रादोषं ब्रूमः। कर्णे समर्पितमपि उत्पलादिकर्णाभरणं कपोलस्यैव शोभामादधाति । तथा ह्युक्तं मुरारिकविना (अनर्घराघवम् १.४०) -

कष्टा वेधव्यथा कष्टो नित्यश्च वहनक्लमः।
श्रवणानामलङ्कारः कपोलस्य तु कुण्डलम्।। इति।

शिरसि सम्भूता अपि जटाः बन्धनाभावे सति कपोले लम्बमाना दृश्यन्ते। अतस्तासां कपोलसम्बन्धोऽस्तीति। एतद्द्योतनायैव श्लथबन्धिनीरिति पदप्रयोगश्च कृत इति न कश्चिद् दोषः।। ४७ ।।

मुनिव्रतैस्त्वामतिमात्रकर्शितां दिवाकराप्लुष्टविभूषणास्पदाम्।
शशाङ्कलेखामिव पश्यतो दिवा सचेतसः कस्य मनो न दूयते।। ४८।।

मुनीति। मुनिव्रतैरनशनादिभिः, अतिमात्रकर्शितां दिवाकराप्लुष्टविभूषणास्पदां दिवाकरेणाप्लुष्टानि अधिकदग्धानि विभूषणस्थानानि यस्याः ताम्। सर्वेषामङ्गानां रविसन्तापसम्भवेऽपि विभूषणस्थानानि सन्ततं भूषण धारणेन वातातपाभ्यामस्पृष्टत्वात् अतिमार्दवं दधति। अत एतेषामधिकं दाहो भवतीत्याप्लुष्टपदप्रयोगः। रविकिरणैरतिदग्धं मृदुविभूषणस्थानं इत्यर्थः। एवम्भूतां त्वां दिवा शशाङ्कलेखामिव पश्यतः सचेतसः कस्य मनो न दीर्यते। स्थावरेषु चेतो न विद्यते। स्थावरव्यतिरिक्तस्य सचेतसः कस्य मनो विदीर्णं न भवति। दृ विदारणे। शशाङ्कलेखायामपि विशेषणद्वयं योज्यम्। मुनिव्रतैः, मुनयो देवर्षयः, तेषां यद् व्रतं पारणादिकं, पूर्वपक्षे उपोषितानां परपक्षे चन्द्रकलापारणव्रतम् अथवा अशनान्तरत्यागेन चन्द्रकलापारणमेव व्रतम्। एतैर्मुनिव्रतैरतिमात्रं कर्शितामिति। तथा दिवाकरेति। दिवाकेणाप्लुष्टं लोकालङ्करणकृत्यं यस्यां

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तामिति। आस्पद शब्दोऽत्र कृत्यवाची गृह्यते। दूञ् विदारणे। प्रतिष्ठा कृत्यमास्पदम् इत्यमरः(३.३.९४)।। ४८ ।।

अवैमि सौभाग्यमदेन वञ्चितं तव प्रियं यश्चतुरावलोकिनः।

करोति लक्ष्यं चिरमस्य चक्षुषो न वक्त्रमात्मीयमरालपक्ष्मणः।। ४९ ।।

अवैमीति। सौभाग्यमदेन आत्मसौन्दर्येण यो मदस्तेनाहतं तव प्रियं सौभाग्यमदेन वञ्चितं विप्रलब्धमित्यवैमि। यस्तव चक्षुषो रविं लक्ष्यं करोति। कीदृशस्य चक्षुषः। चतुरावलोकिनः, चतुरमवलोकते इति चतुरावलोकी। चतुरावलोकनशीलस्येत्यर्थः। अरालपक्ष्मणः कुटिल पक्ष्मणः।

अरालं वृजिनं जिह्ममूर्मिमत् कुञ्चितं नतम्(३.१.७१) इत्यमरः। एवम्भूतस्य चक्षुषो रविं लक्ष्यं करोति। आत्मीयं वक्रं लक्ष्यं न करोति। सूर्यार्पितदृष्टिं त्वामेव यस्तपः कारयति तं तेन वञ्चितमवैमीत्यर्थः।। ४९ ।।

कियच्चिरं श्राम्यसि गौरि विद्यते ममापि पूर्वाश्रमसञ्चितं तपः।

तदर्धभागेन लभस्व काङ्क्षितं वरं तमिच्छामि च साधु वेदितुम्।। ५०।।

कियदिति। हे गौरि, त्वं कियच्चिरं श्राम्यसि। किं परिमाणं चिरं चिरकालम्। कालाध्वनोरत्यन्तसंयोगे(पा.सू.२.३.५)इति द्वितीया। कियन्तं अनेककालमित्यर्थः। श्राम्यसीति लृडर्थे भविष्यत्यर्थे लट्। श्रमं करिष्यसि। कियच्चिरं तपः करिष्यसीत्यर्थः। प्रारब्धस्य तपसः फलस्य असिद्धौ बहुकालमपि तपः कर्तव्यमेवेति, फलप्राप्तेरुपायान्तराभावाद् इत्याशङ्क्याह - ममापीति। ममापि पूर्वाश्रमसञ्चितं ब्रह्मचर्याश्रमे समार्जितं तपो विद्यते भवति। मया दत्तेन तदर्धभागेन काङ्क्षितं अभीष्टं वरं लभस्व। तं वरं वेदितुमहमिच्छामि। तं ममाचक्ष्व। ममापि तत्र सम्मतिरस्ति चेत्, तपसोऽर्धभागमतस्ते ददामीत्यभिप्रायः।। ५० ।।

इति प्रविश्याभिहिता द्विजन्मना मनोगतं सा न शशाक शंसितुम्।

अथो वयस्यां परिपार्श्ववर्तिनीं निवर्तितानञ्जननेत्रमैक्षत।। ५१ ।।

इतीति। प्रविश्यान्तर्गत्वा अभिप्रायं ज्ञात्वा, द्विजातिनेति इत्थं, अभिहिता सा गौरी, मनोरथं शंसितुं न शशाक। अस्मिन् ममाभिलाष इति वक्तुं न शक्ताभूत्। अथोऽनन्तरम्। अत इति वा पाठः। अतः कारणात्, परिपार्श्ववर्तिनीं समीपवर्तिनीं, वयस्यां सखीं, निवर्तितानञ्जननेत्रं ऐक्षत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

व्रतस्थत्वान्नेत्रस्यानञ्जनत्वमुक्तम्। निर्वर्तितनेत्रं यथा भवति तथा तामैक्षत। निर्वर्तितेन नेत्रेण सखीमुखमीक्षितवतीत्यर्थः। लज्जया स्वयं वक्तुमशक्ता ममाभिलाषं त्वमाचक्ष्वेति कटाक्षवीक्षणेन सखीं प्रोक्तवतीत्यर्थः। आलिः सखी वयस्या चेति भोजः।। ५१ ।।

सखी तदीया तमुवाच वाञ्छितं निबोध साधो तव चेत्कुतूहलम्।
यदर्थमम्भोजमिवोष्णवारणं कृतं तपःसाधनमेतया वपुः।। ५२ ।।

सखीति। तदीया सखी तमुवाच। तदुक्तिप्रकारमाह - हे साधो निर्दोष, तव कुतूहलञ्चेदस्य वाञ्छितं ज्ञातुं तव कौतुकमस्ति चेत्, तर्हि तत् काङ्क्षितं त्वं निबोध बुध्यस्व। तदहं वदामीति शेषः। यदर्थं यस्य वाञ्छितस्य सिद्ध्यर्थं, एतया वपुः तपस्साधनं कृतम्। साध्यतेऽनेनेति साधनम्। तपसः साधनं तपस्साधनम्। उपवासशीतोष्णादिक्लेशसहम् इत्यर्थः। कीदृशं वपुः। अम्भोजमिव पेलवम्। उष्णं वारणं उष्णवारणं यस्य तद्। अम्भोजं हि रात्रौ उपोषितं दिवा सूर्यांशुरूपमूष्माणं पिबति। तद्वदस्या वपुरपि सूर्यावलोकनादिव्रतेनान्तः प्रविष्टसन्तापमित्यर्थः।। ५२ ।।

इयं महेन्द्रप्रभृतीनधिश्रियश्चतुर्दिगीशानवमत्य मानिनी।
अरूपहार्यं मदनस्य निग्रहात् पिनाकपाणिं पतिमाप्तुमिच्छति।। ५३ ।।

इयमिति। इयं मानिनी, मानश्चित्तसमुन्नतिः(अमरः १.७.२२), महाप्रयोजननिवेशितचित्ता इयं गौरी। अधिश्रियः महेन्द्रप्रभृतीन् इन्द्रादीन्। चतुर्दिगीशान् चतुरो दिक्पालान्। अवमत्य अनादृत्य, तेष्वभिलाषमकृत्वा, पिनाकपाणिं शम्भुं, पतिमाप्तुमिच्छति। कीदृशं तम्। मदनस्य निग्रहाद् अरूपहार्यं रूपेण वशीकर्तुमशक्यम्। यस्तु कामी स स्त्रीभिः सौन्दर्येण वशीक्रियते। शिवस्तु कामस्य जेता रूपहार्यो न भवेदिति तपसा तं वशीकृत्य भर्तारं लब्धुमिच्छतीत्यर्थः।। ५३ ।।

असह्यहुङ्कारनिवर्तितः पुरा पुरारिमप्राप्तमुखः शिलीमुखः।
इमां हृदि व्यायतपातमक्षिणोद् विशीर्णमूर्तेरपि पुष्पधन्वनः।। ५४ ।।

असह्येति। विशीर्णमूर्तेरपि शरप्रहारकाल एव नष्टशरीरस्यापि, पुष्पधन्वनः कामस्य, शिलीमुखः शरः, पुरा पूर्वं, हृदि व्यायतपातमिमां

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अक्षिणोत्। व्यायतपातमिति क्रियाविशेषणम्। व्यायतो दीर्घः चिरावस्थायी पातो यथा भवति, तथोमामक्षिणोत् विव्याध। क्षिणु हिंसायामिति धातुः। क्षतहृदयामकरोदित्यर्थः। शरभृङ्गौ शिलीमुखौ इति नानार्थः। शिलीमुखस्य विशेषणद्वयमाह - असह्यहुङ्कारनिर्वर्तितः, रुद्रेणासह्येन हुङ्कारेण पराङ्मुखीकृतः। पुरारिमप्राप्तमुखः रुद्रमप्राप्तं मुखं यस्य सः इति।। ५४ ।।

तदा प्रभृत्युन्मदना पितुर्गृहे ललाटिकाचन्दनधूसरालका।
न जातु बाला लभते स्म निर्वृतिं तुषारसङ्घातशिलातलेष्वपि।। ५५ ।।

तदेति। तदा प्रभृतीति। प्रभृतिशब्दयोगे पञ्चम्या भवितव्यम्। सप्तमीप्रयोगश्च दृश्यते। तदा प्रभृति तत्कालमारभ्योन्मदना अतिवृद्धकामा, ललाटिकाचन्दनधूसरालका। ललाटिका ललाटे अलङ्कारः। कर्णललाटात् कनलङ्कारे(पा.सू.४.३.६५) इति कन्प्रत्ययः। ललाटालङ्कारभूतेन चन्दनेन धूसराः ईषत् पाण्डुराः अलकाः यस्याः सा। अनूढकन्यात्वद्योतनार्थमिदं विशेषणम्। ऊढानां तु तिलकक्रिया युक्ता। अनूढानां ललाटालङ्काराय चन्दनलेप एवेति। एवम्भूतेयं बाला पितुर्गृहे तुषारसङ्घातशिलातलेषु जातु कदाचिदपि निर्वृतिं न लभते स्म सुखं न लब्धवती। अनेन सन्तापातिशयो दर्शितः।। ५५।।

उपात्तवर्णे चरिते पिनाकिनः सबाष्पकण्ठस्खलितैः पदैरियम्।
अनेकशः किन्नरराजकन्यका वनान्तसङ्गीतसखीररोदयत्।। ५६ ।।

उपात्तवर्णेति। उपात्तवर्णे -

कान्त्यक्षरस्तुतिकथाशुक्लादिब्राह्मणादिषु ।

गीतिक्रमे च वर्णः स्यात्

इति भोजः। पिनाकिनश्चरिते त्रिपुरविजयादौ, उपात्तवर्णे सति किन्नर कन्यकाभिः आत्मना चोपात्तस्तुतौ। स्तूयमाने सतीत्यर्थः। वर्ण इति गीति क्रम इति केचिदाहुः। शम्भोश्चरिते स्वीकृतगीतिक्रमे सति, सबाष्पकण्ठस्खलितैः बाष्पमश्रुजलं कण्ठस्खलितं गद्गदत्वं ताभ्यां सहितैः, पदैः तत्स्तुतिपदैः, इयमनेकशः वनान्तसङ्गीतसखीः वनान्तरेषु क्रियमाणे सङ्गीतकर्मणि सखीभूताः किन्नरराजकन्यकाः अपि अरोदयदिति। ताभिः सह शिवचरितं गायन्ती भक्त्यतिशयाज्ञाताश्रुकण्ठस्खलनाः सखीरप्यश्रु मोक्षं अकारयत्। अस्याः कारणं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भक्त्यवस्थां दृष्ट्वा किन्नरराजकन्यका अप्यरोदयन् इत्यर्थः।। ५६ ।।

त्रिभागशेषासु निशासु च क्षणं निमील्य नेत्रे सहसा न्यबुध्यत।
क्व नीलकण्ठ व्रजसीत्यलक्ष्यवागसत्यकण्ठार्पितबाहुबन्धना ।। ५७ ।।

त्रिभागेति। त्रिभिर्हतो भागस्त्रिभागः। तृतीयभाग इत्यर्थः। रात्रिघटिकामाने त्रिधा कृते एकोंऽशस्त्रिभागः। तच्छेषासु द्वौ भागौ जाग्रती, निशानां तृतीयेंऽशे निद्रया आक्रान्तेयं क्षणं नेत्रे निमील्य सहसा व्यबुध्यत। कथम्भूता व्यबुध्यत इत्याह - हे नीलकण्ठ, त्वं क्व व्रजसि इति अलक्ष्यवाग् अलक्ष्या लक्ष्यरहिता श्रोतृरहिता वाक् यस्याः सा तथा। स्वप्नदृष्टस्य शिवस्य तत्र अविद्यमानत्वात् अस्थानकृवचना असत्यकण्ठार्पितबाहुबन्धना चेति। एवं वदन्ती तत्कण्ठनिवेशितबाहु बन्धना सती सद्यः प्रबुद्धवतीत्यर्थः।। ५७ ।।

यदा बुधैः सर्वगतस्त्वमुच्यसे न वेत्सि भावस्थमिमं कथं जनम्।
इति स्वहस्तोल्लिखितश्च मुग्धया रहस्युपालभ्यत चन्द्रशेखरः।। ५८ ।।

सदेति। हे शिव, त्वं बुधैः सदा सर्वगत इत्युच्यसे। भावस्थं भावे भावनाकृते तिष्ठन्तं त्वच्चिन्तया तिष्ठन्तमिमं जनं कथं न वेत्सि। भावस्थं रत्याख्ये भावे तिष्ठन्तमिति केचिद् व्याचक्षते। मुग्धया स्नेहजनितमोहया अप्रगल्भया वा तया स्वहस्तोल्लिखितः स्वहस्तेन चित्रपटे लिखितः चन्द्रशेखरः रहस्युपालभ्यत। पूर्वार्धोक्तप्रकारेण क्षिप्यते स्म। आक्षेपः स्यादुपालम्भः इति भोजः। भावस्थां मां न वेत्सीत्यतः तव सर्वगतत्वाभावः इत्याक्षेपः।। ५८ ।।

यदा च तस्याधिगमे जगत्पतेरपश्यदन्यं न विधिं विचिन्वती।
तदा सहास्माभिरनुज्ञया गुरोरियं प्रपन्ना तपसे तपोवनम्।। ५९ ।।

यदेति। विचिन्वती अन्वेषणं कुर्वती इयं तस्य जगत्पतेः अधिगमे भर्तृत्वेन प्राप्तावन्यं विधिं यदा नापश्यत्, तदेयं गुरोः पितुरनुज्ञया अस्माभिः सखीभिः सह तपसे तपः कर्तुं तपोवनं प्रपन्ना प्राप्ता।। ५९ ।।

द्रुमेषु सख्या कृतजन्मसु स्वयं फलं तपःसाक्षिषु दृष्टमेष्वपि।
न च प्ररोहाभिमुखोऽपि दृश्यते मनोरथोऽस्याः शशिमौलिसंश्रयः।।६०।

द्रुमेष्विति। अस्मत्सख्याऽनया पार्वत्या स्वयमात्मनैव कृतजन्मसु कारितजन्मसु। उत्पादितेष्वित्यर्थः। अन्तर्भावितण्यर्थोऽत्र कृतशब्दः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तपस्साक्षिष्वेषु द्रुमेष्वपि फलं बद्धम्। ज्ञातमित्यर्थः। अङ्कुरोद्गमनादि फलजननपर्यन्तं कालो गत इत्यभिप्रायः। शशिमौलिसंश्रयः शिवविषयोऽस्या मनोरथः प्ररोहाभिमुखोऽपि अङ्कुरोद्गमनाभिमुखोऽपि न दृश्यते। कुतः पुनः फलदर्शनमिति भावः।। ६० ।।

न वेद्मि स प्रार्थितदुर्लभः कदा सखीभिरस्रोत्तरमीक्षितामिमाम्।
तपःकृशामभ्युपपत्स्यते सखीं वृषेव सीतां तदवग्रहक्षताम् ।। ६१ ।।

नेति। प्रार्थितदुर्लभः स शम्भुः सखीभिरस्रोत्तरवीक्षितामश्रुपात मध्ये दृष्टां तपःकृशामिमां नः सखीं कदाभ्युपपत्स्यते अनुग्रहीष्यति।

स्यान्निग्रहोऽभिव्यापादोऽभ्युपपत्तिरनुग्रहः

इति भोजः। वृषा पर्जन्यः इन्द्रस्तदवग्रहक्षतां तेनेन्द्रेण कृतेन वर्षप्रतिघातेन शोषितां सीतामिव। सीता लाङ्गलपद्धतिः (२.९.१४) इत्यमरः। अवग्रह क्षतां हलक्षतां भूमिं वृषा वृष्ट्या यथानुगृह्णाति, तथा शिवोऽस्यामनुग्रहं कदा करिष्यतीति न वेद्मि न जानामि।। ६१ ।।

अगूढतद्भावमितीङ्गितज्ञया निवेदितो नैष्ठिकसुन्दरस्तया।
अयीदमेवं परिहास इत्युमामपृच्छदव्यञ्जितहर्षलक्षणः।। ६२ ।।

अगूढेति। अगूढतद्भावं प्रकाशितगिरिसुताभिप्रायं इत्युक्तप्रकारेण इङ्गितज्ञया स्वाभाविकचेष्टया अन्यथाभावः इङ्गितम्। यत् स्वाभाविक चेष्टया अन्यथात्वं तदङ्गितम् इति भोजः। निर्वर्तितानञ्जननेत्रमैक्षतेति कृतेङ्गितज्ञया तया सख्येति निवेदितः गौरीभावं ज्ञापितः नैष्ठिकानां सुन्दरः भद्रः ब्रह्मचारी। श्रेष्ठ इत्यर्थः। उपकुर्वाणो नैष्ठिकश्चेति द्वौ ब्रह्मचारिभेदौ। तत्र यावज्जीवं ब्रह्मचारी नैष्ठिकः। तत्प्रवरः उमामित्यपृच्छत्। इदं सखीवचनमेवमपि इत्थं किञ्चित्। अथवा परिहासः परिहासकारणं किमिदमिति पृष्टवानित्यर्थः। कथम्भूतः सः, अव्यञ्जितहर्षलक्षणः आत्मनस्तदभिलाषविषयत्वात् जायमानस्य हर्षस्य लक्षणानि स्मितादीनि अव्यञ्जितानि येन सः। आत्मनि तद्भावस्थैर्याज्ज्ञातं हर्षं स्मितादिभिरप्रकाशयन्नित्यर्थः।। ६२ ।।

अथाग्रहस्ते मुकुलीकृताङ्गुलौ समर्पयन्ती स्फटिकाक्षमण्डलम्।
कथञ्चिदद्रेस्तनया मिताक्षरं चिरव्यवस्थापितवागभाषत ।। ६३ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथेति। अथ मुकुलीकृताङ्गुलौ अग्रहस्ते हस्ताग्रे, स्फटिकाक्ष- मण्डलं समर्पयन्ती अद्रेस्तनया मिताक्षरमल्पाक्षरं, कथञ्चिद् अभाषत। कथम्भूता सा। चिरव्यवस्थापितवाक् व्रतार्थं चिरनियमितवचना। चिरगृहीतमौनव्रतेत्यर्थः।। ६३

यथा श्रुतं वेदविदां वर त्वया जनोऽयमुच्चैःपदलङ्घनोन्मुखः।

तपः किलेदं तदवाप्तिसाधनं मनोरथानामगतिर्न विद्यते।। ६४ ।।

यथेति। हे वेदविदां वरेति सम्बोधनमिदम्। तपसा देवा देवतामग्र आयन्(याज्ञिक्युपनिषत् ६३) इत्यादिवेदवाक्यैस्तप एव दुर्लभस्यार्थस्य साधनमिति साधितम्। त्वमपि जानासीत्यभिप्रायेण कृतम्। यदा हि तस्याधिगमे जगत्पतेरित्यादि(श्लोकः ५९) सखीवचनं यथा त्वया श्रुतमयं जनः उच्चैःपदलङ्घनोन्मुखः। उच्चैःपदशब्देन महेश्वरपत्नीत्वं विवक्षितम्। तस्य लङ्घनं प्राप्तिः, तत्रोन्मुखः तत्रोद्युक्तः। शिवपत्नीत्वं प्राप्तुं उद्यता अहमस्मीत्यर्थः। अधिरधिलघिगत्यर्था इति लघिधातोर्ल्युडन्तं लङ्घनपदम्। इदं तपस्तदवाप्तिसाधनं किल। किलशब्दोऽयमपरमार्थे वर्तते। अनेन तपसा तल्लब्धुमशक्यं तथापि क्रियत इत्यभिप्रायः। यतो मनोरथानामगतिर्न विद्यते। सर्वत्रापि गतिरस्त्येव। स्वशक्तिमनपेक्ष्य दुर्लभेऽपि वस्तुनि मनोरथो भवत्येवेत्यर्थः।। ६४ ।।

अथाह वर्णी विदितो महेश्वरस्तदर्थिनी त्वं पुनरेव वर्तसे।

अमङ्गलाभ्यासरतिं विचिन्त्य तं तवानुवृत्तिं न च कर्तुमुत्सहे।। ६५ ।।

अथेति। अथ वर्णी ब्रह्मचारी, तामाह। वर्णाद् ब्रह्मचारिणि(पा.सू.५.२.१३४) इति इनिप्रत्ययः। ईश्वरः मम विदितः। मतिबुद्धिपूजार्थेभ्यश्च (पा.सू.३.२.१८८) इति वर्तमाने क्तः। क्तस्य च वर्तमाने(पा.सू.२.३.६७) इति षष्ठी। ईश्वरो मया ज्ञायते। तस्य स्थितिमहं जानामीत्यर्थः। त्वं तदर्थिनी पुनः एव वर्तसे। प्रथमं प्राक् पुरा पूर्वमादिरग्रं पुरस्तथेति भोजः। मद्दर्शनात् पूर्वमेव वर्तसे इत्यर्थः। त्वद्दर्शनात् पुरश्चेत् किं करिष्यसीत्याशङ्क्याह - अमङ्गलेति।

क्रीडा यस्य श्मशानेषु चिताभस्मानुलेपनम्।

पिशाचकाः सहचराः भूषणान्यस्थिमालिका।।

अस्थिमालिकादीनि श्मशानक्रीडादीनि अमङ्गलानि तेषामभ्यासे पुनः पुनः आचरणे रतिः प्रीतिर्यस्य स तथा। तं महेश्वरममङ्गलाभ्यासरतिं विचिन्त्याहं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तदर्थं तपः कुर्वाणायाः तवानुवृत्तिं कर्तुं नोत्सहे।। ६५ ।।

अवस्तुनिर्बन्धपरे कथं नु ते करोऽयमामुक्तविवाहकौतुकः।
करेण शम्भोर्वलयीकृताहिना सहिष्यते तत्प्रथमावलम्बनम्।। ६६ ।।

अवस्त्विति। अवस्तुनिर्बन्धपरे अवस्तुनि तुच्छे, निर्बन्धोऽभिनिवेशः, तत्र परे निरते। हे तुच्छाभिनिवेशतत्परे इति सम्बोधनम्। आमुक्त विवाहकौतुकः आबद्धो विवाहमङ्गलसूत्रस्ते अयं करः वलयीकृताहिना कङ्कणीकृतभुजङ्गेन शम्भोः करेण तत् प्रथमावलम्बनं तत् पूर्वावलम्बनं ग्रहणं कथं नु सहिष्यते।। ६६ ।।

त्वमेव तावत् परिचिन्तय स्वयं कदाचिदेते यदि योगमर्हतः।
वधूदुकूलं क्व च हंसलक्षणं क्वचाजिनं शोणितबिन्दुवर्षि च।। ६७।।

त्वमेवेति। तावद् वाक्यालङ्कारे। तावदिदानीमिति वा। अथवा तावत्पर्यन्तम्। त्वमेव स्वयं परिचिन्तय। क्षमं इति वा पाठः। किं तच्चिन्त्यमित्याकाङ्क्षायामाह - एते वधूदुकूलगजाजिने कदाचित् स्वतो लोकसम्प्रतिपत्त्या यदि योगं अर्हतः। किमर्थे यदिशब्दः। योगमर्हतः किमिति। त्वमेव परिचिन्तयेति सम्बन्धः। तयोर्गुणदोषप्रकाशेन संयोगो न घटत इत्याह - वधूदुकूलमिति। माङ्गल्यार्थं रोचनादिभिर्लिखितहंसरूप लाञ्छनं वधूदुकूलं कन्यावसनं क्व। क्व च शोणितबिन्दुवर्षि अजिनं गजाजिनं क्व च। नानयोः सम्बन्ध इत्यर्थः। अत्र गजाजिनमिति पाठो नादरणीयः। क्व चाजिनमिति पाठः श्रेयान्। ईदृशेषु वाक्येषु क्वशब्दद्वयस्य अपेक्षितत्वात्। तपः क्व वत्से क्व च तावकं वपुः(श्लोकः ४) इत्यादि। हरवसनत्वादजिनस्य गजसम्बन्धित्वं सिद्धम्।। ६७ ।।

चतुष्कपुष्पप्रकरावकीर्णयोः परोऽपि को नाम तवानुमंस्यते।
अलक्तकाङ्कानि पदानि पादयोर्विकीर्णकेशासु परेतभूमिषु।। ६८ ।।

चतुष्केति। विवाहे कन्यावरयोः स्नानार्थं कल्पितं चतुस्तम्भोपेतं मण्डपं चतुष्कमित्युच्यते।

चतुष्कं सचतुस्तम्भं विवाहे स्नानमण्डपम्

इति भोजः। चतुष्कनिहितपुष्पसमूहे अवकीर्णयोः अर्पितयोः तव पादयोः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विकीर्णकेशासु परेतभूमिषु अलक्तकाङ्कानि पदानि अवस्थानानि परोऽपि को नाम अनुमंस्यते। विवाहे चतुष्कपुष्पप्रकरावस्थापितयोः तव पादयोः प्रेतकेशयुतासु परेतभूमिषु अवस्थानानि मदन्योऽपि कश्चित् पुमान् नानुमंस्यत इत्यर्थः। पदं व्याजस्थानलक्ष्मपादन्यासाङ्घ्रिवस्तुषु इति भोजः ।। ६८ ।।

अयुक्तरूपं किमतः परं वद त्रिनेत्रवक्षःसुलभं तवापि यत्।

स्तनद्वयेऽस्मिन् हरिचन्दनास्पदे पदं चिताभस्मरजः करिष्यति।। ६९।।

अयुक्तरूपमिति। अतिप्रयुक्तं प्रशंसायां रूपार्थमतिप्रशस्तं अयुक्तं अयुक्तरूपम्। प्रशंसायां रूपप्(पा.सू.५.५.६६)। अतीवायुक्तमतः परं किमस्ति। त्वं वद। किं तदित्याह - त्रिनेत्रवक्षःसुलभं चिताभस्मरजोऽपि हरिचन्दनास्पदेऽस्मिन् तवास्मिन् स्तनद्वये पदमवस्थानं करिष्यतीति यत् अतोऽधिकमयुक्तं किमपि नास्ति। इदमेवायुक्तं इत्यर्थः।। ६९ ।।

इयं च तेऽन्या पुरतो विडम्बना यदूढया वारणवर्यहार्यया।

विलोक्य वृद्धोक्षमधिष्ठितं त्वया महाजनः स्मेरमुखो भविष्यति।।७०।।

इयमिति। इयं च ते तवान्या पूर्वोक्तदोषादन्या पुरतः पुरस्ताद् अवस्थायिनी विडम्बना। दोषदर्शनजनितापहासयुक्तावज्ञा विडम्बना इत्युच्यते। विडम्बना तु हसनसम्प्रयुक्तावमाने इति भोजः। का सा विडम्बनेत्याह - ऊढया शम्भुना कृतोद्वाहया वारणवर्यहार्यया गजोत्तमेन हरणीयया गजेन्द्रारोहणयोग्यया इत्यर्थः। त्वया अधिष्ठितमारूढं वृद्धोक्षं बलीवर्दं विलोक्य महाजनः स्मेरमुखो भविष्यतीति यदेयं विडम्बनेति सम्बन्धः। गजारोहणयोग्यां त्वां वृद्धोक्षारूढां दृष्ट्वा महाजनो हसिष्यतीत्यभिप्रायः। वृद्धोक्षशब्दोऽयं अचतुर(पा.सू.५.४.७७) इत्यादिसूत्रेण निपात्यते।। ७० ।।

द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया पिनाकिनः।

कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी।।७१।।

द्वयमिति। सामान्यनिर्देशोऽयम्। सामान्यनिर्देशे नपुंसकमिति वचनात् साधुः। आत्मोदयः परज्यानिर्द्वयं नीतिरितीयती(२.३०) इति माघ काव्ये प्रयोगश्च विद्यते। कृतया क्रियमाणया च पिनाकिनः समागम प्रार्थनया सम्प्रति द्वयं शोचनीयतां गतम्। किं तद्द्वयमित्याह - कान्तिमती कलात्मनः कलानिधेः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इन्दोः, सा कला चास्य लोकस्य नेत्रकौमुदी ज्योत्स्नावत् नयनाह्लादिनी त्वं च।

अयमर्थः - कृतया पिनाकिनः समागमप्रार्थनया पूर्वमिन्दुकला शोचनीयतां गता। सम्प्रति क्रियमाणया समागमप्रार्थनया त्वं च। एवमेतद् द्वयमपि शोच्यमभूद् इत्यर्थः।। ७१ ।।

शम्भौ वरगुणमात्रमपि नास्तीत्याह -

वपुर्विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु।
वरेषु यद् बालमृगाक्षि मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने।।७२।।

वपुरिति। त्रिलोचनस्य तस्य वपुः विरूपाक्षम्, ललाटलोचन युक्तत्वात्। तस्यालक्ष्यजन्मता चास्ति। अलक्ष्यं जन्म यस्य सोऽलक्ष्य जन्मा, तस्य भावः, तत्ता। अन्येषां जन्म तत्समीपस्थाः पश्यन्ति। अयं तु कुत्र देशे कस्याः पुत्रः, कदा जात इति कश्चिदपि न दृष्टवान्। अतोऽस्यालक्ष्यजन्मता विद्यते। अस्य दिगम्बरत्वेनैव वसु निवेदितं प्रकाशितं भवति। भो बालमृगाक्षि, वरेषु भर्तृषु, यद् रूपं जननं वसु चेति त्रयं मृग्यते, कन्यादातृभिरन्विष्यते, तद् व्यस्तमपि त्रिलोचनेऽस्ति किम्। त्रिष्वेकमपि किमस्ति। नास्तीत्येव, कुतः समस्तमित्यर्थः ।। ७२ ।।

निवर्तयास्मादसदीप्सितान्मनः क्व तद्विधस्त्वं क्व च पुण्यलक्षणा।
अपेक्ष्यते साधुजनेन वैदिकी श्मशानशूलस्य न यूपसत्क्रिया।। ७३ ।।

निवर्तयेति। अस्मात् कारणात् त्वमसदीप्सितात् कष्टादीप्सितात् मनो निवर्तय। तस्य च तव सम्बन्धो न युक्त इत्याह - तद्विधः तादृशः अमङ्गलशीलः स रुद्रः । पुण्यलक्षणा त्वं क्व। न युवयोः सम्बन्धो युक्त इत्यर्थः। तदेव अर्थान्तरन्यासेन स्पष्टयति - श्मशानशूलस्य वध्यचोराद्यारोहणशूलस्य वैदिकी वेदसम्बन्धिनी वेदोक्ता यूपसत्क्रिया यूपस्य विधेया पूजा साधु जनेन नापेक्ष्यते। साधवस्तां नानुमन्यन्त इत्यर्थः।। ७३ ।।

इति द्विजातौ प्रतिकूलवादिनि प्रवेपमानाधरलक्ष्यकोपया।
विकुञ्चितभ्रूलतमाहिते तया विलोचने तिर्यगुपान्तलोहिते।। ७४ ।।

इतीति। तस्मिन् द्विजातौ ब्रह्मचारिणि, प्रतिकूलवादिनि सति प्रवेपमानाधरलक्ष्यकोपया तया, उपान्तलोहिते प्रान्तरक्ते, विलोचने तिर्यगाहिते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तिर्यक्कृते। विकुञ्चितभ्रूलतमिति क्रियाविशेषणम्। कोपात् कुटिलीकृतभ्रूलतं इत्यर्थः। पुरस्थितस्य तस्यावलोकनमपहाय तिर्यगवेक्षणा प्रकाशिता।। ७४ ।।

उवाच चैनं परमार्थतो हरं न वेत्सि नूनं यत एवमात्थ माम्।

अलोकसामान्यमचिन्त्यहेतुकं द्विषन्ति मन्दाश्चरितं महात्मनाम्।। ७५।।

उवाचेति। सैनं द्विजातिमुवाच च । नेत्रयोस्तिर्यगाधानमेव केवलं न कृतवती। किन्तु वचनञ्चोवाचेति समुच्चयार्थश्चकारः। किमुवाचेत्याह - त्वं परमार्थतो हरं न वेत्सि नूनम्। यतो यस्मात्, मामेवमात्थ वदसि। तदेवोपपादयति - अलोकसामान्यं लोकसामान्यमतिक्रान्तं, अचिन्त्यहेतुकं अचिन्त्ये हेतुः यस्य तत् तथा। दुर्बोधकारणमित्यर्थः। एवम्भूतं महात्मनां चरितं मन्दाः अल्पबुद्धयः पुरुषा द्विषन्ति।। ७५ ।।

अमङ्गलाभ्यासरतिमित्यादि(श्लोकः ६५) तेनोक्तं प्रत्याचष्टे -

विपत्प्रतीकारपरेण मङ्गलं निषेव्यते भूतिसमुत्सुकेन वा।

जगच्छरण्यस्य निराशिषः सतः किमेभिराशोपहतात्मवृत्तिभिः।। ७६।।

विपदिति। विपदां प्रतीकारः प्रतिकूलं विपत्पतीकारः। तत्र आपत्प्रशमने तत्परेण मानुषेण मङ्गलं निषेव्यते अथवा भूतिसमुत्सुकेन ऐश्वर्यकामेन दर्पणालोकपुष्पधारणादि मङ्गलं निषेव्यते इति द्वावेव मङ्गल निषेवकावित्यर्थः। जगच्छरण्यस्य, शरणार्हः शरण्यः, जगतां शरणप्राप्ति योग्यस्य निराशिषो निरभिलाषस्य। आशीरुरगदंष्ट्रायां शुभवाक्याभिलाषयोः इति वैजयन्ती(६.२.२)। एवं सतो भगवतः शम्भोः आशोपहतात्मवृत्तिभिः मङ्गलैः किमिति योज्यम्। आशयोपहता आत्मवृत्तिः मनोवृत्तिः यैस्तानि आशोपहतात्मवृत्तीनि, तैः। आत्मध्यानादिशुभकर्मप्रवृत्तिनिरोधिकाभिराशादूषित लोकचित्तवृत्तिभिरित्यर्थः। जगच्छरण्यत्वात् विपत्प्रतीकारपरत्वं, निरभिलाषत्वाद् भूतिसमुत्सुकत्वञ्च शम्भोर्नास्ति। तस्य मङ्गलाभ्यास रतिः नास्तीत्यभिप्रायः। किमाभिरिति केषाञ्चित् पाठः। तत्रायमर्थो वाच्यः। आभिराशोपहतात्मवृत्तिभिः किमिति योजना। आभिरुक्ताभिः आशोपहतात्मवृत्तिभिः आशयोपहता आत्मा येषां ते आशोपहतात्मानः आशादूषित मानसाः तेषां वृत्तिभिः मङ्गलाचरणादिप्रवृत्तिभिः किम्। तास्तस्य नाभीष्टा इति भावः।। ७६ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दिगम्बरत्वेन निवेदितं वसु(श्लोकः ७२), विकीर्णकेशासु परेत भूमिषु(श्लोकः ७३) इत्यादिकं प्रत्याचष्टे -

अकिञ्चनः सन् प्रभवः स सम्पदां त्रिलोकनाथः पितृसद्मगोचरः।

स भीमरूपः शिव इत्युदीर्यते न सन्ति याथार्थ्यविदः पिनाकिनः।। ७७

अकिञ्चनेति। किञ्चन वसु न विद्यते सोऽकिञ्चनः। दरिद्र इत्यर्थः। अकिञ्चनः सन्नपि शम्भुः सम्पदां प्रभवः। अन्येभ्यः सम्पदं स ददातीत्यभिप्रायः। लोकनाथोऽपि स देवः पितृसद्मगोचरः प्रेतस्थान विषयः। श्मशानविषय इत्यर्थः। लोकेश्वरेण तेन भुवनविशिष्टं स्थानं दुर्लभं न भवति। तथापि श्मशान एव वसति। तथा भीमरूपः शूल कपालडमरुकास्थिमालादिधारणात् भयङ्कररूपोऽपि स रुद्रः शिव इत्युदीर्यते। सुखकर इत्युच्यते। अत एव पिनाकिनो याथार्थ्यविदः तत्त्वविदः न सन्ति। अनेन कारणेनैवमयं प्रवर्तते। एषास्य स्थितिरिति केचिदपि न जानन्तीत्यर्थः। अनेन पूर्वोक्तं सर्वमपि शम्भोर्दूषणं परिहृतम् ।। ७७ ।।

त्वमेव तावत्परिचिन्तय(श्लोकः६७)इत्यादि सर्वमपि दूषणं परिहरति -

विभूषणोद्भासि पिनद्धभोगि वा गजाजिनालम्बि दुकूलधारि वा।

कपालि वा स्यादथवेन्दुशेखरं न विश्वमूर्तेरवधार्यते वपुः।। ७८ ।।

विभूषणेति। तस्य वपुः विभूषणोद्भासि विभूषणैः भासुरं वा, पिनद्धभोगि आबद्धभुजङ्गं वा, गजाजिनालम्बि वा, दुकूलधारि वा, कपालि वा शिरसि शेखरीकृतकपालं वा, अथवेन्दुशेखरं शशिकलावतंसं वेति विश्वमूर्तेस्तस्य शम्भोः वपुः नावधार्यते। एवमेवेति कैश्चिदपि न निर्धार्यत इत्यर्थः।। ७८ ।।

अयुक्तेत्यादिनोक्तं(श्लोकः ६९) चिताभस्मलेपनदोषं परिहरति -

तदङ्गसंसर्गमवाप्य कल्पते ध्रुवं चिताभस्मरजो विशुद्धये।

तथाहि नृत्याभिनयक्रियाच्युतं विलुप्यते मौलिभिरम्बरौकसाम्।। ७९।।

तदिति। चिताभस्मरजः तदङ्गसंस्पर्शं तस्य हरस्य अङ्गसंस्पर्शं अवाप्य ध्रुवं विशुद्धये कल्पते भवति। अन्येषामपि शुद्धिकरं भवति इत्यभिप्रायः। ध्रुवं निश्चितमेतत्। तदेवोपपादयति - तथाहीति। नृत्याभिनय क्रियाच्युतं हरेण नृत्यादिकर्मभिः नामार्थप्रकाशनमभिनयः। हरेण कृतायां नृत्याभिनयक्रियायां

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

च्युतं भूमौ पतितं तच्चिताभस्मरजः अम्बरौकसां मौलिभिर्विलुप्यते स्वीक्रियते। तत्पादाग्रभूमौ पतितं तत्प्रणामे संस्पृष्टभूमि सुरमुकुटैरादीयते इत्यर्थः। विलिप्यते इति केषाञ्चित् पाठः। तत्रायमर्थः। अम्बरौकसां देवानां मौलिभिः श्रेष्ठैः विलिप्यते। भूमो पतितं तदादाय देवश्रेष्ठाः स्वाङ्गेषु आलिम्पन्तीत्यर्थः। राजशेखरशब्दे शेखरशब्दो यथा श्रेष्ठवाची, तद्वन्मौलिशब्दो द्रष्टव्यः।। ७९ ।।

इयञ्चेत्यादिनोक्तं (श्लोकः ७०) वृषभवाहनदूषणं परिहरति -

असम्पदस्तस्य वृषेण गच्छतः प्रभिन्नदिग्वारणवाहनो वृषा।
करोति पादावुपगम्य मौलिना विनिद्रमन्दाररजोऽरुणाङ्गुली।। ८० ।।

असम्पद इति। धनवाहनादिसम्पद्रहितस्य वृषेण गच्छतः तस्य पादौ प्रभिन्नदिग्वारणवाहनः मत्तैरावतवाहनः वृषा इन्द्रः उपगम्य स्वस्थानात् समीपं प्राप्य मौलिना तत्पादप्रणतेन मुकुटेन तस्य पादौ विनिद्रमन्दाररजोरुणाङ्गुली करोति। मकुटबन्धविकसितमन्दारकुसुममालापरागैररुणीकृताङ्गुली करोतीत्यर्थः। वासवो वृत्रहा वृषा(१.१.४२) इत्यमरः। प्रभिन्नो गर्जितो मत्तः(२.८.३६) इति चामरः।। ८० ।।

अलक्ष्यजन्मता इत्युक्तं दोषं परिहरति -

विवक्षता दोषमपि च्युतात्मना त्वयैकमीशं प्रति साधु भाषितम्।
यमामनन्त्यात्मभुवोऽपि कारणं कथं स लक्ष्यप्रभवो भविष्यति।। ८१।।

विवक्षतेति। च्युतात्मना च्युतबुद्धिना।

आत्मा-देह-मनो-बुद्धि-क्षेत्रज्ञ-परमात्मसु

इति भोजः। दोषं विवक्षता वक्तुमिच्छतापि त्वया ईशं प्रति एकं साधु भाषितम्। किं तदित्याह - यं देवं आत्मभुवोऽपि हिरण्यगर्भस्यापि कारणं आमनन्ति स देवः कथं लक्ष्यप्रभवो भविष्यति। अस्मदादिभिः लक्ष्यजन्मा कथं स्यात्। तस्य ब्रह्मजननद्रष्टृत्वात् नित्यत्वं श्रुतिप्रमाणसिद्धम्। अतः कारणाद् अलक्ष्यजन्मत्वं तस्य दूषणमिति मत्वा वदता त्वयास्य अलक्ष्यजन्मतेति गुण एवैकोऽयमुक्त इत्यभिप्रायः।। ८१ ।। उपसंहरति -

अलं विवादेन यथाश्रुतस्त्वया तथाविधस्तावदशेषमस्तु सः।
ममात्र भावैकरसं मनः स्थितं न कामवृत्तिर्वचनीयमीक्षते।। ८२ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अलमिति। विवादेनालम्। विवादो मा भूत्। स शम्भुः त्वया यथा श्रुतस्तथाविधः तथाप्रकारः तावदस्तु। तावदवधारणे। अशेषमिति क्रियाविशेषणम्। त्वया येन प्रकारेण श्रुतस्तथाविध एव स शम्भुः अशेषमस्त्वित्यर्थः। अत्र शिवे भावैकरसं मम मनः स्थितम्। भावोऽत्र रतिर्गृह्यते।

आलम्बनविभावेभ्यः स्वेभ्यः समुन्मिषन्।
रसो रत्यादिरूपेण भाव इत्यभिधीयते।
मनोनुकूलेष्वर्थेषु सुखसंवेदनं रतिः।

एकरसत्वं तादात्म्यम्। मनोनुकूले तस्मिन् भावेन रत्येकरसं प्राप्ततादात्म्यं मे मनः स्थितम्। तस्मिन् तव निन्दा किं न स्यादित्याशङ्क्याह - कामवृत्तिः कामेन वृत्तिः वचनीयं परिवादं नेक्षते हि। अनेन सर्वाणि दूषणानि परिहृतानि।। ८२।।

निवार्यतामालि किमप्ययं वटुः पुनर्विवक्षुः स्फुरितोत्तराधरः।
न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभाक्।। ८३

निवार्यतामिति। हे आलि, सखि। स्फुरितोत्तराधरः स्फुरितोत्तरोष्ठः सन् पुनरपि किमपि विवक्षुरयं वटुः माणवकः त्वया निवार्यताम्। यथेष्टमयं वदतु। किं निवारणाय इत्याशङ्क्याह - न केवलमिति। यः महतः महात्मनः अपभाषते विरुद्धं भाषते। अपवदतीत्यर्थः। स एव केवलं न पापभाक्। किन्तु यस्तु तस्य शृणोति महतो निन्दां शृणोति सोऽपि पापभागित्यर्थः। केचिदपिशब्दमधिकार्थं वदन्ति। तस्मादधिकं पापभागित्यर्थः।

गुरूणां महतां मूढो यः करोति विगर्हणम्।
शृणोत्यवारयन् यश्च समं पापं द्वयोः समम्।।

इति धर्मशास्त्रवचनात्। परमेश्वरस्य दोषं विवक्षुरयं निवारणीय इत्यभिप्रायः।।

इतो गमिष्याम्यथवेति वादिनी चचाल बाला स्तनभिन्नवल्कला।
स्वरूपमास्थाय च तां कृतस्मितः समाललम्बे वृषराजकेतनः।। ८४।।

इत इति। अथवाहमितोऽस्मात् स्थानात्, गमिष्यामीति वादिनी स्तनभिन्नवल्कला सा चचाल। गमनत्वरया प्रचलितोन्नतपीनस्तनभिन्नस्तन कञ्चुकवल्कलेत्यर्थः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गुरोः शिवस्य वा निन्दां कुर्वाणं वारयेन्नरम्।
पिधाय कर्णौ हस्ताभ्यां ततोऽन्यत्रापि वा व्रजेत्।।

इति शैवागमे पक्षद्वयस्योक्तत्वात् पूर्वं पक्षमवलम्ब्य पूर्वश्लोक उक्तः। द्वितीयपक्षावलम्बनप्रकाशनायोक्तमथवेति। एवं द्वितीयं पक्षमवलम्ब्य स्थानान्तर-गमनाय तत्स्थानाच्चलितवती। उत्थितवतीत्यर्थः। तदानीमेव स्वरूपमादाय निजरूपं परिगृह्य, कृतस्मितो वृषराजकेतनः वृषभध्वजः शम्भुस्तां समालम्बे जग्राह च। अत्र क्रियाद्वयस्य यौगपद्यप्रकाशनार्थं चशब्दः।। ८४ ।।

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
र्निक्षेपणाय पदमुद्धृतमुद्वहन्ती।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ।। ८५ ।।

तमिति। तं शिवं, वीक्ष्य वेपथुमती। चलनं वेपथुः कम्पः इति भोजः। कम्पयुक्ता प्रकम्पमानेत्यर्थः। सरसाङ्गयष्टिः स्वेदजलार्द्रशरीरयष्टिः अथवा तपसा शुष्कापि प्रियसंस्पर्शजातहर्षरसोपव्रीडिता अङ्गयष्टिर्यस्याः सा तथा। तत्र यष्ट्यनुरूपत्वेन स्थितत्वाद् अङ्गमेव यष्टित्वेन रूप्यते। पुनरपि कथम्भूता। उद्धृतं पदं विक्षेपे एवोद्वहन्ती गमनार्थमुद्धृतं चरणं विक्षेपे विन्यासस्थाने आकाश एवोद्वहन्तीत्यर्थः। भूम्यामनवस्थापयन्तीत्यर्थः। एवम्भूता शैलाधिराजतनया न ययौ न तस्थौ। गमनार्थमुद्धृतस्य पदस्य पुरस्तात् भूम्यामनवस्थापनात् न याता। एकपादेनैव भूम्यां अवस्थानात् न स्थिताभूदित्यर्थः। मार्गाचलव्यतिकराकुलिता सिन्धुरिव मार्गे अचलस्य गिरेः, व्यतिरेकेण सम्पर्केण, आकुलिता नदीव। मार्गे पतितेन गिरिणा निरुद्धप्रवाहा नदी यथा न गच्छति, न तिष्ठति तद्वत्।

देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम् (३.३.१०१)

इत्यमरः। अत्र वेपथुः सात्त्विकभावमुत्पाद्य शृङ्गाररसो जायते इति रसोक्त्यलङ्कारः।

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।
वैवर्ण्यमश्रुप्रलयावित्यष्टौ सात्त्विकाः स्मृताः।।

इति भरतः(नाट्यशास्त्रम् ६.१८, ६.२२, ७.६३, ७.६४)।। ८५ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अद्य प्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ।
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते।। ८६ ।।

अद्येति। हे अवनताङ्गि शुभाङ्गि। अद्य प्रभृति एतद्दिनमारभ्याहं तपोभिः क्रीतः तव दासोऽस्मि। धनैर्हि दासाः क्रीयन्ते। क्रीतो दासो भवामीति वादिनि चन्द्रमौलौ एवं वादिनि सति सा गिरिजा, नियमजं व्रतजनितं, क्लमं क्लेशं, अह्नाय शीघ्रं उत्ससर्ज तत्याज। अह्नाय सद्यः सपदि त्वरितं शीघ्रमाशु चेति भोजः। चिरस्थितस्य क्लेशस्य शीघ्रं परित्यागः कथं स्यादित्याह - क्लेश इति। सर्वोऽपि क्लेशः फलेन पुनर्नवतां विधत्ते आच्छादयति। पुनर्नवश्चिरस्थायी वृद्धिमांश्च प्रतिक्षणम् इति भोजः। फलाभावात् चिरकालावस्थायी प्रतिक्षणं वृद्धिमान् वा क्लेशः आयासः कदाचित् सञ्जातेन फलेन स्वस्य चिरावस्थायित्वं प्रतिक्षणं महत्त्वं वा दोषं सञ्छादयति। फले सति चिरक्लेशजं दुःखं नश्यतीति भावः। अत्र पुनरिति पृथक्पदं केचिदाहुः। तत्पक्षे वाक्यालङ्कारे पुनःशब्दः। नवतां स्वस्य प्रत्यग्रतामित्यर्थः। वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः (सि.कौ. अव्यय प्रकरणम्) इति अवेरल्लोपः। वसन्ततिलकं वृत्तम्।। ८६ ।।

कुमारसम्भवस्येमं सर्गं पञ्चममञ्चितम्।
व्याचष्टे विस्तरेणैवं विद्यामाधवपण्डितः।।
इति विद्यामाधवीये कुमारसम्भवव्याख्याने पञ्चमः सर्गः।। श्रीः।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

षष्ठः सर्गः

पार्वतीविवाहनिश्चयः

अथानुष्टुभेन पथ्यवृत्तेन रचितं षष्ठसर्गं व्याख्यास्ये -

अथ विश्वात्मने गौरी सन्दिदेश मिथः सखीम्।
दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति।। १ ।।

अथेति। अथ गौरी विश्वात्मने सखीं मिथः रहसि सन्दिदेश। विश्वात्मानं प्रति वक्तुं सखीं रहसि उपांशु सन्दिष्टवतीत्यर्थः। किं सन्दिदेश इत्याह - मे दाता भूभृतां नाथः प्रमाणीक्रियतामिति। अत्र प्रमाणशब्देन प्रमाता गृह्यते -

प्रत्यक्षादौ प्रमाणं स्यात् प्रार्थनायां प्रमातरि। सङ्ख्यासम्भावने-यत्तामर्यादाशास्त्रहेतुषु।। इति भोजः। तथा चोक्तं तार्किकरक्षायाम्(१.२) -

तत्र प्रमाणं प्रमया व्याप्तं प्रमितिसाधनम्।
प्रमामयो वा तद्व्याप्तो यथार्थानुभवः प्रमा।। इति।

ज्ञाता प्रमाता तत्त्वज्ञो दृष्टानुभवितार्थवित् इति भोजः। प्रमाण शब्दादभूततद्भावे च्विप्रत्ययः। अप्रमाता प्रमाता क्रियताम्। एवं त्वया कृतं मम करग्रहणमजानन् गिरिराजोऽस्य ज्ञाता क्रियतामित्यर्थः। ज्ञापने कृते सति दास्यति वा न वेति शङ्कानिरासार्थं दातेत्युक्तम्। अयमभिप्रायः- मद्यौवनोदयादारभ्य शिवायैवाहमिमां दास्यामीति कृतस्थिराभिलाषो मद्विवाहोत्सवदर्शनसमुत्सुकः सन् पिता मद्विवाहोत्सवस्यानुभविता विधीयतामिति। तेन दत्ताया मम करग्रहणं धर्मेण त्वया क्रियतामिति यावत्। अथवा प्रमाणं प्रार्थना। तद्युक्तः प्रमाणी। मत्प्रार्थनायुक्तः क्रियतामिति। लोके हि कन्यार्थिनो विवाहात् पूर्वं कन्यावरणं कुर्वते। तस्मात् कञ्चित् पुरुषं तत्समीपं सम्प्रेष्य त्वया मम प्रार्थना वा क्रियतां इत्यर्थः। प्रार्थितश्चासौ मां दास्यति। तत्प्रमयैव मामुद्वोढुमर्हसीति विवक्षिताभिप्रायः। अथवा प्रमाणं सम्भावना। तद्युक्तः प्रमाणी। सम्भावना युक्तः क्रियतां सम्भाव्यतामित्यर्थः। मत्प्रदानोद्यतं तमनादृत्य ममापहरणं त्वया न क्रियतामित्यभिप्रायः। इत्येवं विश्वात्मानं प्रतिवक्तुं सखीं मिथः सन्दिदेशेति पूर्वेण सम्बन्धः।। १ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तया व्याहृतसन्देशा सा बभौ निभृता प्रिये।
चूतयष्टिरिवाभाष्ये मधौ परभृतोन्मुखी।। २ ।।

तयेति। तया सख्या प्रिये व्याहृतसन्देशा निभृता स्वयं निर्वचना सती सा गौरी बभौ। तत्रोपमानमाह - आभाष्ये आलापयोग्ये मधौ वसन्ते परभृतोन्मुखी चूतयष्टिरिव। परभृतोन्मुखीति शाकपार्थिवादित्वात् मध्यमपदलोपी समासः। परभृतावचनोन्मुखीति द्रष्टव्यम्। परभृता कोकिला तया आलपितुमुपक्रान्तेत्यर्थः। आभाषणीये मधौ स्वयं निभृता परभृतया कारिताभाषणा चूतयष्टिर्यथा भाति तद्वदाभाष्ये प्रिये निभृता तया सख्या व्याहृतसन्देशा सा गौरी शुशुभ इत्यर्थः। यथा वसन्तकाले चूतयष्टिः स्वयं तूष्णीं स्थित्वा कोकिलालपैरेव मधुना सह सम्भाषते तद्वत्।। २ ।।

स तथेति प्रतिज्ञाय विसृज्य कथमप्युमाम्।
ऋषीन् ज्योतिर्मयान् सप्त सस्मार स्मरशासनः।। ३ ।।

सइति। यथा त्वया कथितं तत्तथैवास्तु इति प्रतिज्ञायोमां कथमपि विसृज्योमास्वीकारे कृतदृढाभिलाषत्वात् कथञ्चित्तां त्यक्त्वा स स्मरशासनः स्मरनिग्रहीता स शम्भुः ज्योतिर्मयान् सप्तर्षीन् सस्मार। उमाप्रार्थनार्थं हिमवत्पुरं प्रति प्रेषयितुं ज्योतिःस्वरूपान् सप्तर्षीन् स स्मृतवानित्यर्थः। ज्योतिर्ग्रहानिति केषाञ्चित् पाठः। तत्र ज्योतिर्मयग्रहस्वरूपानित्यर्थः। सप्तर्षीणामपि ग्रहत्वं पराशरसंहितायामुक्तम् -

कालाच्चरन्ति दिवि ये सप्तर्षयो मरीच्याद्याः।
सूर्यादयश्च ते खचराः सर्वे ग्रहाः प्रोक्ताः।। इति।। ३ ।।

ते प्रभामण्डलैर्व्योम द्योतयन्तस्तपोधनाः।
सारुन्धतीकाः सपदि प्रादुरासन् पुरः प्रभोः।। ४ ।।

तइति। हिमवत्पुरं प्रेषयितुं शिवेन संस्मृतास्ते तपोधनाः सप्तर्षयः प्रभामण्डलैः व्योम द्योतयन्तः प्रकाशयन्तः सारुन्धतीकाः। अरुन्धती नाम वसिष्ठस्य पत्नी। सा पतिं त्यक्त्वा कदाचिदपि पृथक् न तिष्ठति। अतोऽरुन्धत्या सहिताः। एवम्भूताः प्रभोः पुरः सपदि प्रादुरासन् प्रादुर्बभूवुरित्यर्थः।। ४ ।।

आप्लुता इत्यादिषड्भिः श्लोकैः तेषां तपःफलजनितं महत्त्वं दर्शयति -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आप्लुतास्तीरमन्दारकुसुमोत्किरवीचिषु।
व्योमगङ्गाप्रवाहेषु दिङ्नागमदगन्धिषु।। ५ ।।

आप्लुता इति। तीरजातानां मन्दाराणां कुसुमोत्किराः पतित कुसुमोत्क्षेपिण्यः वीचयस्तरङ्गाः येषां ते तथा, तेषु। तथा दिङ्नागमद गन्धिषु सलिलावगाढदिग्गजमदगन्धयुक्तेषु आकाशगङ्गास्त्रोतस्सु प्रवाहेषु आप्लुताः स्नाताः। समानावाप्लुतस्नातौ इति श्रीमहाराजः भोजः।। ५ ।।

तेषां विशेषणान्याह -

मुक्तायज्ञोपवीतानि बिभ्रतो हैमवल्कलाः।
रत्नाक्षसूत्राः प्रव्रज्यां कल्पवृक्षा इवाश्रिताः।। ६ ।।

मुक्ताइति। मुक्तायज्ञोपवीतानि मौक्तिकनिर्मितयज्ञोपवीतानि बिभ्रतः दधानाः हैमवल्कलाः स्वर्णमयवल्कलोपेताः रत्नाक्षसूत्राः रत्नमया- क्षमालायुक्ताः। तेषामुपमानमाह - प्रव्रज्यां आश्रिताः कल्पवृक्षा इव। प्रव्रज्या स्यात् संन्यसनमिति भोजः। पुरुषवत् कृतसंन्यासाः कल्पद्रुमा इव लक्ष्यमाणा इत्यर्थः। तेऽपि विमुक्ताः हेमरत्नैरावृतास्तिष्ठन्तीति। प्रव्रज्या- शब्दोऽत्र संन्यासवाचकोऽपि अत्र वानप्रस्थत्ववाचको ग्राह्यः। वानप्रस्थत्वमपि संन्याससमानमेव पुत्रवित्त- लोकैषणानां त्यागात्। संन्यासे नैष्कर्म्यम्, अत्र कर्मानुष्ठानमस्तीत्येव एतावान् द्वयोर्भेदः।। ६ ।।

अधः प्रस्थापिताश्वेन समावर्जितकेतुना।
सहस्ररश्मिना शश्वत् सप्रणाममुदीक्षिताः।। ७ ।।

अधइति। अधःप्रस्थापिताश्वेन सप्तर्षिस्थानादधस्तात् प्रस्थापित तुरङ्गेण। समावर्जितकेतुना तन्मण्डलस्खलनभयात् विनमितध्वजेन। सहस्ररश्मिना सूर्येण शश्वत्सप्रणामं सनमस्कारमुदीक्षिताः तन्मण्डलिताः। सूर्यादुपरि सप्तर्षीणां स्थानम्। तस्मात् अधःस्थितेन सूर्येण ऊर्ध्वं अवलोकिता इत्यर्थः।। ७ ।।

आसक्तबाहुलतया सार्धमुद्धृतया भुवा।
महावराहदंष्ट्रायां विश्रान्ताः प्रलयापदि।। ८ ।।

आसक्तेति। आसक्तबाहुलतया उद्धरणे पतनभयाद् वराहदंष्ट्रायां आसक्तबाहुलतया उद्धृतया भुवा सार्धं प्रलयापदि महावराहदंष्ट्रायां विश्रान्ताः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भुवा सह कृतविश्रमा इत्यर्थः। अनेन तेषां नित्यत्वं प्रकाशितम् ।। ८ ।।

सर्गशेषप्रणयनाद् विश्वयोनेरनन्तरम्।

पुरातनाः पुराविद्भिर्धातार इति कीर्तिताः।। ९ ।।

सर्गेति। विश्वयोनेः ब्रह्मणोऽनन्तरं सर्गशेषप्रणयनात् प्रजासृष्टिशेषस्य विधानात् पूर्वं ब्रह्मसर्गस्याल्पत्वात् तदनु महतीनां विशिष्टानां प्रजानां सर्गविधानादित्यर्थः। तस्माद्धातारः स्रष्टार इति पुराविद्भिः कीर्तिताः मरीच्यादिप्रजापतिष्वेषामप्यन्तर्भावात् विद्वद्भिः प्रजापतय इति परिकीर्तिता इत्यर्थः। पुरातनाः देवमानवेभ्यः पूर्वभवाः।। ९ ।।

प्राक्तनानां विशुद्धानां परिपाकमुपेयुषाम्।

तपसामुपभुञ्जानाः फलान्यपि तपस्विनः।। १० ।।

प्राक्तनानामिति। प्राक्तनानां पुराकृतानां विशुद्धानां निर्दोषाणां परिपाकमुपेयुषां प्राप्तानां तपसां फलानि उपभुञ्जानास्तथापि तपस्विनः पूर्वतपःफलोपभोगयुक्ताः सन्तो ह्युपरि विशुद्धफलप्राप्त्यर्थं तपः कुर्वाणा इत्यर्थः सिद्धो भवति।। १० ।।

तेषां मध्यगता साध्वी पत्युः पादार्पितेक्षणा।

साक्षादिव तपःसिद्धिर्बभासे बह्वरुन्धती।। ११ ।।

तेषामिति। तेषां सप्तर्षीणां मध्यगता, साध्वी पतिव्रता, पत्यु- र्वसिष्ठस्य, पादार्पितेक्षणा भर्तृपादादन्यमपश्यन्ती, अरुन्धती बहु भूयिष्ठं, अधिकं बभासे, साक्षान्मूर्तिमती तेषां तपस्सिद्धिरिव लक्ष्यमाणा।। ११ ।।

तामगौरवभेदेन मुनींश्चापश्यदीश्वरः।

स्त्रीपुमानित्यनास्थैषा वृत्तं हि महितं सताम्।। १२ ।।

तामिति। ईश्वरस्तामरुन्धतीं मुनींश्चागौरवभेदेन अपश्यत्। गौरव भेदं अकृत्वा समानमपश्यदित्यर्थः। स्त्रीपुंसयोर्विशेषः किं नासीद् इत्याशङ्क्याह - स्त्रीपुमानित्यनास्था आदरविशेषाभावः। एषामृषीणां मध्य इयं स्त्री पुमान् इत्यादरविशेषो नास्तीत्यर्थः। यस्मादेषां वृत्तं सतां महितम् अभ्यर्हितम्। एषामृषीणां आचार एव सद्भिः पूज्यत इत्यर्थः। आचार विशेषयुक्ता योषिदपि पूज्यत एवेत्यभिप्रायः ।। १२ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तद्दर्शनादभूच्छम्भोर्भूयान् दारार्थमादरः।
क्रियाणां खलु धर्म्याणां सत्पत्न्यो मूलकारणम्।। १३ ।।

तदिति। तद्दर्शनात् तस्या अरुन्धत्या दर्शनात् शम्भोः दारार्थं दारक्रियार्थमादरः भूयानभूत्। पत्नीस्वाचारादरो महानासीत् खलु। यस्मात् सत्पत्न्यः साध्व्यः पत्न्यः, धर्म्याणां धर्मादनपेतानां, क्रियाणां मूलसाधनम्। धर्मसाधनभूतानां यज्ञादिक्रियाणां पत्न्य एव प्रधानकारणभूता इत्यर्थः। पत्नीरहितस्य क्रियाधिकाराभावात्। तथा च श्रुतिः - अयज्ञो वा एष योऽपत्नीकः इति।। १३ ।।

धर्मेणापि पदं शर्वे कारिते पार्वतीं प्रति।
पूर्वापराधभीतस्य कामस्योच्छ्वसितं मनः।। १४ ।।

धर्मेणेति। धर्मेण कन्याप्रार्थनादिसदाचारसम्प्रतिपन्नपरिणयन चिकीर्षारूपेण धर्मेण शर्वे पार्वतीं प्रति पदं मनसावस्थानं कारिते सति गमिते सत्यपि पूर्वापराधभीतस्य कामस्य मन उच्छ्वसितमासीत्। धर्मवशे पुरुषे धर्मविरोधिनः कामस्य अवकाशः प्रायशो नास्ति। तथापीह विवाहचिकीर्षारूपेण धर्मेण शर्वे पार्वतीवशत्वं प्रापिते सति तद्विवाहकाले पुनरात्मनो जननायानुग्रहस्य शिवेन कृतत्वात् कामस्य मनः उच्छ्वसितं आसीत्। किञ्चिद् दुःखाद् विमुक्तमभूदित्यर्थः।। १४ ।।

आगतैस्तैर्मुनिभिः किं कृतमित्याह -

अथ ते मुनयः सर्वे मानयित्वा जगद्गुरुम्।
इदमूचुरनूचानाः प्रीतिकण्टकितत्वचः।। १५ ।।

अथेति। अनूचानाः साङ्गवेदाध्यायिनः। सोऽनूचानोऽयमाचार्यात् साङ्गं वेदमधीतवान् इति भोजः। प्रीतिकण्टकितत्वचः। रोमहर्षेऽपि कण्टकः इति शाश्वतः(रोमाञ्चे क्षुद्रशत्रौ च तरोरङ्गे च कण्टकः १८१)। ईश्वरसाक्षात्कारजातया प्रीत्या कण्टकिता सञ्जातरोमाञ्चा त्वग्येषां ते। तथैव प्रीत्या पुलकितशरीरा इत्यर्थः। एवम्भूतास्ते मुनयः सर्वेऽपि जगद्गुरुं प्रणिपत्येदं ऊचुः वक्ष्यमाणप्रकारमेतद्वचनमुक्तवन्तः।। १५ ।।

यद् ब्रह्म सम्यगाम्नातं यदग्नौ विधिना हुतम्।
यच्च तप्तं तपस्तस्य विपक्वं फलमद्य नः।। १६ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यदिति। अस्माभिर्यद् ब्रह्म सम्यगाम्नातं पठितम्। ब्रह्मशब्देन वेद उच्यते। यो वेदः सम्यगधीतः। अग्नौ विधिना यद् हुतम्। कल्पोक्तेन विधिना यद् हविरग्नौ हुत्वा यद् यज्ञकर्म कृतमित्यर्थः। यत् तपश्च तप्तम्। नः अस्माकं तस्य सर्वस्य फलमद्य विपक्कं विपाकं परिपाकं प्राप्तम्। अत्र यद्ब्रह्मेत्यादिभिः त्रिभिः पदैः क्रमात् ब्रह्मचारि - गृहस्थ - वानप्रस्थाश्रमानुष्ठानमुक्तम्। अत्र तस्य फलं विपक्कमिति। यद्ब्रह्मेत्यादिभिः पूर्ववाक्यैस्त्रिभिरपि पृथक् संयोजनीयं वा।। १६ ।।

कुत इत्याह -

यदध्यक्षेण जगतां वयमारोपितास्त्वया।

मनोरथस्याविषयं मनोविषयमात्मनः।। १७ ।।

यदिति। जगतामध्यक्षेण साक्षिणा। अधीश्वरेण वा। अध्यक्षौ साक्ष्यधीश्वराविति भोजः। त्वया वयं मनोरथस्याप्यपदं अस्थानं मनसापि काङ्क्षितुमशक्यं आत्मनो मनोविषयं तव मनःस्थानं मनःप्रदेशं आरोपिता इति यत्। यत् त्वया मनसा वयं यच्चिन्तिता इत्यर्थः। तस्मात् कारणाद् अध्ययनादेः फलं विपक्कमिति। पूर्वोक्तस्यात्र हेतुनिर्देशः कृतः। स्थानमन्तरेणारोपणस्य अशक्यत्वात् विषयपदप्रयोगः।। १७ ।। तन्मनःस्थानप्राप्तिमेव स्तौति -

यस्य चेतसि वर्तेथाः स तावत् कृतिनां वरः।

किं पुनर्ब्रह्मयोनेर्यस्तव चेतसि वर्तते।। १८ ।।

यस्येति। त्वं यस्य चेतसि वर्तेथाः अवतिष्ठेथाः तावदिदानीं वृत्तिकाल एव स पुरुषः कृतिनां वरः कृतार्थानां श्रेष्ठः। कृती कृतार्थो ज्ञानी चेति भोजः। ब्रह्मयोनेः हिरण्यगर्भजनकस्य तव चेतसि यो वर्तते स किमुत इति। कृतिनां वर इति किमु वाच्यम्। न वक्तव्यमेवेत्यर्थः। तस्यातिदुर्लभत्वात् कृतिनामतिश्रेष्ठ एवेत्यभिप्रायः।। १८ ।।

नित्यमर्काच्च सोमाच्च परमध्यास्महे पदम्।

अद्य तूच्चैस्तरं ताभ्यां स्मरणानुग्रहात्तव।। १९ ।।

नित्यमिति। अर्काच्च सोमाच्च परमुन्नतं पदं स्थानं वयं नित्यमध्यास्महे अधिवसामः। अद्य तु ताभ्यां उच्चैस्तरं अत्युन्नतं पदं स्थानमध्यास्महे। कुत इत्याह - तव स्मरणानुग्रहात् अस्मत्संस्मरणाख्यो योऽयमस्मासु तवानुग्रहोऽभूत्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तस्माच्चन्द्रार्काभ्यामपि विशिष्टं पदं वयमद्य प्राप्ताः स्म इत्यर्थः। इदमुक्तं ज्योतिर्भद्रके -

शनिजीवकुजादित्यभृगुसौम्येन्दवः क्रमात्।
उपर्युपरि वर्तन्ते तेभ्यः सप्तर्षिमण्डलम्।। इति।। १९ ।।

त्वत्सम्भावितमात्मानं बहु मन्यामहे वयम्।
प्रायः प्रत्ययमाधत्ते स्वगुणेषूत्तमादरः।। २० ।।

त्वदिति। त्वत्सम्भावितं त्वया स्मरणानुग्रहेण सम्भावितमात्मानं बहु भूयिष्ठं महान्तं मन्यामहे। बह्विति क्रियाविशेषणम्। आत्मानमिति जातावेकवचनम्। वेदान्तसिद्धान्तादन्यत्रात्मनो बहुत्वमस्ति। तत्त्वया कृतसम्भावनानात्मनोऽस्मान् सर्वेभ्योऽप्युत्तमान् मन्यामहे इत्यर्थः। तथाहि - उत्तमादरः उत्तमैः कृत आदरः। स पुंसां स्वगुणेषु प्रायः प्रायशः प्रत्ययं विश्वासमाधत्ते। यस्मिन् गुणाः सन्ति तस्मिन्नेव सन्त आदरं कुर्वन्तीति। सद्भिरादृतस्यात्मनि गुणाः सन्तीति विश्वासो भवतीत्यभिप्रायः।। २० ।।

या नः प्रीतिर्विशालाक्ष त्वदनुध्यानसम्भवा।
सा किमावेद्यते तुभ्यमन्तरात्मा हि देहिनाम्।। २१ ।।

या न इति। हे विशालाक्ष, त्वदनुध्यानसम्भवा त्वदनुस्मरणाज्जाता, नोऽस्माकं, या प्रीतिरभूत्, सा तुभ्यं किमावेद्यते। किमर्थमावेदनीया। त्वं देहिनामन्तरात्मा हि, जीवत्वेनान्तः प्रविष्टः। सर्वभूतानां मनसि स्थितं जानासीत्यर्थः। हि यस्मात्, तस्माद् नावेद्यते इत्यर्थः। जीवोऽन्तरात्मा क्षेत्रज्ञ इति भोजः। तव निध्यानसम्भवेति केषाञ्चित् पाठः। अत्र निध्यानं दर्शनम्। निध्यानमवलोकनमिति भोजः।। २१ ।।

साक्षाद् दृष्टोऽसि न पुनर्विद्मस्त्वां वयमञ्जसा।
प्रसीद कथयात्मानं न धियां पथि वर्तसे।। २२ ।।

साक्षादिति। त्वं साक्षाद् दृष्टोऽसि। अस्माभिश्चक्षुषैव प्रत्यक्षं दृष्टोऽसि। पुनरञ्जसा तत्त्वेन, त्वां वयं न विद्मः। तव तत्त्वं न जानीम इत्यर्थः। तत्त्वे त्वद्धाञ्जसा द्वयम् इत्यमरः(३.५.११)। अतः कारणात् त्वं प्रसीद, आत्मानं कथय। इत्थम्भूतोऽहमिति तव तत्त्वं त्वमेव वद। अस्मदादिकानां पुंसां धियां

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

बुद्धीनां पथि त्वं न वर्तसे। बुद्धिगम्यो न भवसीत्यर्थः।। २२ ।।

किं येन सृजसि व्यक्तमुत येन बिभर्षि तत्।
अथ व्यक्तस्य संहर्ता भागः कतम एष ते।। २३ ।।

किमिति। किं येन सृजसीति। विकल्पे किम्। किमुत विकल्पे स्यादिति भोजः। अथवा त्वं येन तद् व्यक्तं प्रपञ्चं सृजसि। उत विकल्पे। अथवा येन तद् व्यक्तं बिभर्षि। अथो तस्य व्यक्तस्य संहर्ता तव तेषां भागानां मध्ये दृश्यमान एष कतमो भागः। स्रष्टा वा, गोप्ता वा, संहर्ता वा अयमंश इति कथयेति शेषः।। २३ ।।

अथवा सुमहत्येषा प्रार्थना देव तिष्ठतु।
चिन्तितोपस्थितांस्तावच्छाधि नः करवाम किम्।। २४ ।।

अथवेति। हे देव, अथ भेदे अथवा अस्माकं एषा सुमहती प्रार्थना तिष्ठतु। अलमनया प्रार्थनयेति शेषः। किं तर्हि कार्यमित्यपेक्ष्याह - चिन्तितेति। चिन्तिताश्चानन्तरमुपस्थिताश्च ये ते तथा तव स्मरणानन्तरं आगतान्नोऽस्मान् तावदिदानीं शाधि आज्ञापय। वयं किं करवाम। किं कार्यं तवास्माभिः क्रियतामित्यर्थः।। २४ ।।

अथ मौलिगतस्येन्दोर्विशदैर्दशनांशुभिः।
उपचिन्वन् प्रभां तन्वीं प्रत्याह परमेश्वरः।। २५ ।।

अथेति। अस्य श्लोकस्यार्थः श्लोकान्तरेणोच्यते। अथ मौलिगतस्य खण्डमूर्तेः शशिनोऽत्यल्पां तां प्रभां स्वकीयैः धवलैर्दशनांशुभिः समृद्धं जनयन् शम्भुरुवाच तान् प्रतीत्थम्।। २५ ।।

विदितं वो यथा स्वार्था न मे काश्चित् प्रवृत्तयः।
ननु मूर्तिभिरष्टाभिरित्थम्भूतोऽस्मि सूचितः।। २६ ।।

विदितमिति। वः युष्माकं, यथा विदितम्। युष्माभिः तथा ज्ञायतां इत्यर्थः। मम स्वार्थाः आत्मार्थाः, प्रवृत्तयो यथा न सन्ति, तथेति। तर्हि कथमित्थं प्रवर्तसे इत्याह - नन्विति। नन्वधारणे। अष्टाभिर्मूर्तिभिः।

भूमिरापोऽनलो वायुरात्मा व्योम रविः शशी।
इतीमाः सर्वलोकानां प्रत्यक्षाः शिवमूर्तयः।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इति शैवागमोक्ताभिः अष्टसङ्ख्याभिः मूर्तिभिरित्थम्भूतः सूचितोऽहमस्मि, लोकाय निवेदितोऽहमस्मि। आसां कर्ता कश्चिदीश्वर इति लिङ्गभूताभिः आभिः ज्ञातोऽस्मीति भावः।। २६ ।।

सोऽहं तृष्णातुरैर्वृष्टिं विद्युत्त्वानिव चातकैः।
अरिविप्रकृतैर्देवैः प्रसूतिं प्रति याचितः।। २७ ।।

सोहमिति । सोऽहं स इत्यष्टमूर्तिभिस्सूचितोऽहमरिविप्रकृतैश्शत्रुबाधितैः, देवैः प्रसूतिं पुत्रोत्पादनं प्रति याचितोऽस्मि । क इवेत्याह । तृष्णातुरैश्चातकैः विद्युत्वान् तडित्वान्मेघो वृष्टिमिव। चातकाख्याः पक्षिविशेषाः मेघं वृष्टिं यथा याचन्ते, तथा देवाः मां प्रसूतिं प्रति याचितवन्त इत्यर्थः । याचतेः द्विकर्मकत्वाद् एवमुक्तम् । विद्युत्वाञ्जलदो मेघ इति भोजः ।। २७ ।।

अत आहर्तुमिच्छामि पार्वतीमात्मजन्मने।
उत्पत्तये हविर्भोक्तुर्यजमान इवारणिम्।। २८ ।।

अत इति । अतः कारणाद् अहं आत्मजन्मनः पुत्रस्य, उत्पत्तये उत्पादाय उत्पादनाय, पार्वतीं आहर्तुं आनेतुं, इच्छामि। हविर्भोक्तुः अग्नेः, उत्पादनाय यजमानोऽरणिमिव। अग्निहोत्रादिषु अग्निमथनार्थं दारु अरणिः इत्युच्यते ।। २८ ।।

तामस्मदर्थे युष्माभिर्याचितव्यो हिमालयः।
विक्रियायै न कल्पन्ते सम्बन्धाः सदनुष्ठिताः।। २९ ।।

तामिति । अस्मदर्थे, अर्थः प्रयोजनं, निमित्तसप्तमीयम्। अस्मत्प्रयोजन-निमित्तेन युष्माभिः हिमालयस्तां याचितव्यः । यूयं हिमाद्रिं पार्वतीं याचध्वमित्यर्थः । याचेर्द्विकर्मकत्वादेवं प्रयोगः । स कन्यां दास्यति चेत् तां भवानेव उद्वहतु, किमस्माभिरित्याशङ्क्याह - विक्रियायै इति। सदनुष्ठिताः सद्भिरनुष्ठापिताः। अन्तर्भाविण्यर्थोऽयं प्रयोगः। सद्भिः कारिताः सम्बन्धाः विक्रियायै न कल्पन्ते, विकारं गन्तुं समर्था न भवन्ति। तादृशानां विवाहादिसम्बन्धानां कदाचिदप्युपप्लवो न भवतीत्यर्थः। पूर्वं स्वेच्छयैव कृते दाक्षायण्याः सत्या विवाहे तद्वियोगादुपप्लवस्य दृष्टत्वादिहापि पुनस्तथा माभूदिति युष्माभिरेव कार्यमित्यभिप्रायः।। २९ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गिरेः कन्यारूपेण त्वं वाञ्छितोऽसि । अतस्तत्सम्बन्धं कर्तुमिच्छसि। न पुनस्तव समानः सम्बन्धयोग्योऽस्ति गिरिरित्याशङ्क्याह तद्योग्यतामाचष्टे -

उन्नतेन स्थितिमता धुरमुद्वहता भुवः।
तेन योजितसम्बन्धं वित्त मामप्यवञ्चितम्।। ३० ।।

उन्नतेनेति । उन्नतेनोच्छ्रितेन, स्थितिमता एकत्रावस्थानयुक्तेन, भुवो धुरमुद्वहता भूधरत्वात् भूमेर्भारमुद्वहता, तेन हिमालयेन, योजितसम्बन्धं युष्माभिस्तेन सङ्घटितसम्बन्धं मामपि यूयमवञ्चितमविप्रलब्धं वित्त जानीध्वम्। अपिशब्दः समुच्चयार्थः । हिमालयं याचध्वं च । मामवञ्चितं वित्त चेत्यर्थः । अत्र विशेषणैः सम्बन्धयोग्यत्वं द्योतितम् । औन्नत्ययुक्तः स्थितिमान् प्रतिष्ठितो भूभारस्य उद्वाहकश्च पुरुषः सम्बन्धयोग्यो भवतीति ।। ३० ।।

एवं वाच्यः स कन्यार्थमिति वो नोपदिश्यते।
भवत्प्रणीतमाचारमामनन्ति हि साधवः।। ३१ ।।

एवमिति । एवं स गिरिः, कन्यार्थं कन्याप्रदानार्थं, युष्माभिरेवं वाच्यः एवं वक्तव्य इति, वो युष्मभ्यं, मया नोपदिश्यते । हि यत आचारं स्मृत्यादिकं आचारशास्त्रं, भवत्प्रणीतं युष्माभिर्विरचितमिति, साधव आमनन्तीति यत् तस्माद् लोकाचारोपदेष्टृभ्यो भवद्भ्य आचारोपदेशो मया न क्रियत इत्यर्थः । आमनन्ति मनीषिण इति वा पाठः । आचरन्ति इति केषाञ्चित्पाठः ।। ३१ ।।

आर्याप्यरुन्धती तत्र व्यापारं कर्तुमर्हति।
प्रायेणैवंविधे कार्ये पुरन्ध्रीणां प्रगल्भता।। ३२ ।।

आर्येति। आर्या पूज्या, अरुन्धत्यपि तत्र कन्याप्रार्थनायां, व्यापारं उत्साहं, कर्तुमर्हति। एवंविधे कार्ये पुरन्ध्रीणां कुटुम्बिनीनां, प्रायेण प्रगल्भता धृष्टता सामर्थ्यं, भवति। पुरन्ध्री स्यात्कुटुम्बिनीति भोजः।। ३२ ।।

तत् प्रयातौषधिप्रस्थं सिद्धये हिमवत्पुरम्।
महाकौशिकपातेऽस्मिन् सङ्गमः पुनरेव नः।। ३३ ।।

तदिति । ओषधिप्रस्थमिति हिमवत्पुरस्य नाम । तत् तस्माद्यूयं सिद्धये इष्टार्थकार्यसिद्ध्यर्थम्। ओषधिप्रस्थाख्यं हिमवत्पुरं प्रति प्रयात प्रतिष्ठध्वम्। ओषधिप्रस्थं प्रति प्रयाणं कुरुध्वमित्यर्थः। अस्मिन् गिरौ महाकौशिकपाते एव

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नोऽस्माकं, पुनस्सङ्गमः। हिमवति कस्यचित् पुण्यप्रदेशस्य महाकौशिकपात इति नाम। हिमवत्पुरं प्राप्य पुनरागतानां युष्माकञ्च मम चात्र महाकौशिकपाताख्ये स्थान एव पुनरपि सङ्गमनं भवत्वित्यर्थः। भागीरथीप्रपातेऽस्मिन्निति केषाञ्चित्पाठः ।। ३३ ।।

तस्मिन् संयमिनामाद्ये जाते परिणयोन्मुखे।
जहुः परिग्रहव्रीडां प्राजापत्यास्तपस्विनः।। ३४ ।।

तस्मिन्निति। संयमिनां जितेन्द्रियाणां, आद्ये तस्मिन् शिवे, परिणयोन्मुखे विवाहोन्मुखे, जाते सति, प्राजापत्याः प्रजापतिपुत्रास्ते, तपस्विनः मुनयः, परिग्रहव्रीडां जहुः। परिग्रहैः कलत्रैः व्रीडा परिग्रहव्रीडा। जितेन्द्रियत्वात् कलत्रस्वीकारजनितां व्रीडां लज्जां अत्यजन्नित्यर्थः।। ३४ ।।

ततः परममित्युक्त्वा प्रतस्थे मुनिमण्डलम्।
भगवानपि सङ्क्रान्तः प्रथमोद्दिष्टमास्पदम्।। ३५ ।।

ततइति। ततः परमं बाढं एवमस्तु इत्युक्त्वा, मुनिमण्डलं ततस्तस्मात् स्थानात्, प्रतस्थे प्रस्थानमकरोत्।

अङ्गीकारस्य वचनं परमं बाढमों तथा

इति भोजः। भगवानीश्वरोऽपि प्रथमोद्दिष्टमास्पदं सङ्क्रान्तः सम्प्राप्तः। महाकौशिकपातेऽस्मिन्निति पूर्वोक्तं स्थानं प्राप्तवानित्यर्थः।। ३५ ।।

ते चाकाशमसिश्याममुत्पत्य परमर्षयः।
आसेदुरोषधिप्रस्थं मनसा समरंहसः।। ३६ ।।

त इति। ते परमर्षयश्च असिश्याममाकाशं उत्पत्य, उपरिष्टाददतिदूरे दृश्यमानस्य आकाशस्य असिश्यामत्वं विभातीति अत्युन्नतं आकाशं उपप्लुत्येत्यर्थः। ओषधिप्रस्थमासेदुः। मनसा समरंहस इति विशेषणं तेषां गमनत्वरायाः सूचकमपि। त्वरया हिमवत्पुरमुपाजग्मुरित्यर्थः।। ३६ ।।

ओषधिप्रस्थस्य विशेषणमाह -

अलकामतिवाह्येव वसतिं वसुसम्पदाम्।
स्वर्गाभिष्यन्दवमनं कृत्वेवोपनिवेशितम्।। ३७ ।।

अलकामिति। वसुसम्पदां वसतिं अलकां वैश्रवणपुरीं अतिवाह्येव

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

धनसम्पद्भिरतिक्रम्येव स्थितमित्यर्थः। एवं केचिद् व्याचक्षते। अलकामतिवाह्य वसुसम्पदां वसतिमिवेत्यन्ये योजयन्ति। अतिवाह्याति- क्रम्यातिशय्येत्यर्थः। अलकामतिशायि च वसुसम्पदां आस्पदमिव लक्ष्यमाणमिति तत्रार्थः। स्वर्गाभिष्यन्दवमनं कृत्वा उपनिवेशितमिव। अभिष्यन्दशब्दः कल्पिते नवाकारे वस्तुनि वर्तते। स्वर्गाभिष्यन्दस्य स्वर्गाय कल्पितायाः तत्रालब्धावकाशायाः अधिकायाः स्त्रीपुरुषधनादिसम्पदः वमनं समानयनं स्वर्गाधिकसमृद्ध्यानयनं कृत्वा सम्पादितमिवेत्यर्थः। अथवा करयन्त्रादिभिः निष्पीडिताद् वस्तुनः निस्सृतः सारोऽभिष्यन्दः। स्वर्गात् निष्पीड्य तत्सारसङ्ग्रहणं कृत्वेवोपनिवेशितं इति भावः। तदपेक्षया स्वर्गस्य निष्पीडितविसृष्टवन्निस्सारत्वेन प्रतीयमान त्वादस्य विशिष्टसारत्वादेवमुत्प्रेक्षते। उत्प्रेक्षाव्यञ्जकश्चायमिवशब्दः। अभिष्यन्द शब्दस्य द्वावप्येतावर्थौ भोजेनाभिहितौ। यथा -

द्वावभिष्यन्दनिष्यन्दौ सारे निष्पीडनोद्भवे।
व्यवस्थितादत्यधिकेऽप्यभिष्यन्दो जनाधिके।। इति।। ३७ ।।

तत्पुरस्य विशेषणान्तराण्याह -

गङ्गास्रोतःपरिक्षिप्तं वप्रान्तज्वलितौषधि।
बृहन्मणिशिलासालं गुप्तावपि मनोहरम्।। ३८ ।।

गङ्गेति। गङ्गास्रोतसा परिक्षिप्तं परिवेष्टितम्। वप्रान्तज्वलितौषधि प्राकारस्थैर्यार्थं कल्पितं अधिष्ठानं वप्रं इत्युच्यते। तस्यान्ते ज्वलिता ओषधयो यस्य तत् तथा। बृहन्तो मणय एव शिलाः पाषाणास्तन्मयः सालः प्राकारो यस्य तत्। स्थूलरत्नपाषाणरचितप्राकारं इत्यर्थः। सालः प्राकारः। स्याच्चयो वप्रं अस्त्रियाम्, प्राकारो वरणः सालः(२.२.२) इत्यमरः। एवम्भूतत्वात् गुप्तावपि रक्षायामपि मनोहरम्। अयमभिप्रायः - अन्यानि दुर्गवन्ति पुराणि अशुचिकलुषोदकादिभिः परिखाभिः कण्टकित द्रुमावृतैर्वप्रैः स्थूलपाषाणमयैः सालैश्च दृष्टिप्रियाणि न भवन्ति। इदन्तु विशिष्टजलगङ्गादुर्गयोगाद् दुर्गरक्षायां सत्यामपि मनोहरमिति। एवम्भूतं तत्पुरमासेदुरिति पूर्वेण सम्बन्धः। तदेव तच्छब्देन परामृश्यते।। ३८ ।।

वीतसिंहभयेत्याद्यष्टभिः श्लोकैः तद्गुणं स्तौति -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वीतसिंहभया नागा यत्राश्वा बिलयोनयः।

यक्षाः किम्पुरुषाः पौरा योषितो वनदेवताः।। ३९ ।।

वीतेति। यत्र नागा गजाः विगतसिंहभयाः सिंहभयरहिताः भवन्ति। यत्राश्वा बिलयोनयः बिलोत्पन्नाः एव। न तु गर्भोत्पन्ना इत्यर्थः। हिमगिरेः कुतश्चिद् बिलाद् अश्वा जायन्त इति प्रसिद्धिः। अश्वानां बिलोत्पत्तिश्च अश्वशास्त्रेषूपदिश्यते। यक्षकिम्पुरुषा एव यत्र पौराः पुरवासिनः। वनदेवता एव यत्र योषितः। वनवासिन्यो देवता एव यत्र स्त्रियो वर्तन्ते इत्यर्थः। अत्रावीतभया नागा इति केचित् पठन्ति। गजशिक्षार्थं यन्तुः पादकर्माङ्कुशकर्म च वीतमित्युच्यते। तस्योद्वेजकत्वात् ततो गजानां भयं भवति। तद्रहिता इत्यर्थः।

शिक्षार्थं द्विरदे यत्तु पादकर्म वितं स्मृतम्।

अङ्कुशावेशनं खातं वीतकर्म द्वयं च तत्।।

इति भोजः। अत्र वीतसिंहभया नागा इति पाठस्तु पदं तुषारस्रुति धौतरक्तम् (१.६) इत्यनेन विरुध्यत इति नादरणीय इति दक्षिणावर्तनाथेन निराकृतोऽप्यादरणीय एव। ओषधिप्रस्थादन्यत्र हिमगिरिप्रदेशे सिंहा गजान् निघ्नन्ति। इह तु गजानां सिंहभयं नास्तीति न कश्चिद् विरोधः।। ३९ ।।

शिखरासक्तमेघानां व्यज्यन्ते यत्र वेश्मनाम्।

अनुगर्जितसन्दिग्धाः करणैर्मुरवस्वनाः।। ४० ।।

शिखरेति। यत्र विश्वेषु गृहेषु शिखरासक्तमेघानां गृहशिखरेषु आसक्तानां मेघानामनुगर्जितसन्दिग्धाः अनुगर्जितैः सन्दिग्धाः मुरवस्वनाः करणैः पटहाक्षरस्थापितैस्ताडनविच्छेदैर्व्यज्यन्ते। अयमर्थः - मुरवो नाम नाट्याभिनयक्रियाकाले ताडनीयो वाद्यविशेषः। प्रतिगृहं क्रियमाणे नाट्याभिनयोत्सवे ताड्यमानानां मुरवानां स्वनाः गृहशृङ्गासक्तमेघगर्जितैः सन्दिग्धाः। किमेते मेघस्वनाः, किं वा मुरवस्वनाः इति जनैः संशयिता निश्चयकारणैः तन्मानविच्छेदविद्भिः ताडनविशेषैः व्यक्ताः क्रियन्ते। एते मुरवस्वना एवेति निश्चीयत इति। उक्तञ्च सङ्गीतशास्त्रे राजकन्दर्पेण -

नृत्तवादित्रगीतानां प्रयोगवशभेदिनाम्।

संस्थानं ताडनं रोधः करणानि प्रचक्षते।। इति।। ४० ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यत्र कल्पद्रुमैरेव विलोलविटपांशुकैः।
गृहयन्त्रपताकाश्रीरपौरादरनिर्मिता।। ४१ ।।

यत्रेति। यत्र विलोलविटपांशुकैः विलोलशाखावसक्तवस्त्रैः कल्पद्रुमैरेव अपौरादरनिर्मिता गृहयन्त्रपताकाश्रीर्भवति। यन्त्रशब्देन पताकाबन्धनार्थमुपरि कल्प्यमानो दारुविशेष उच्यते। गृहाणामुपान्ते यन्त्रेषु बन्धनीयपताकाशोभा भवति। अपौरादरनिर्मिताः पौरैरनादरेण निर्मिता पौरादरेण न निर्मिता न कृता गृहयन्त्रपताकाश्रीः प्रतिगृहमवस्थितैः कल्पद्रुमैरेव कृतेत्यर्थः। तद्विटपलम्बमानां-शुकान्येव पताकावच्छोभन्त एवेत्यर्थः।। ४१ ।।

यत्र स्फटिकहर्म्येषु नक्तं सोपानभूमिषु।
ज्योतिषां प्रतिबिम्बानि प्राप्नुवन्त्युपहारताम्।। ४२ ।।

यत्रेति। यत्र स्फटिकहर्म्येषु स्फटिकमयसोपानभूमिषु नक्तं रात्रौ ज्योतिषां तारकाणां प्रतिबिम्बानि उपहारतां प्राप्नुवन्ति। धवलकुसुमोप- हारतां वहन्ते। अन्यत्र सोपानेषु कुसुमोपहाराः क्रियन्ते। यत्र पुर्यां तारकप्रतिबिम्बान्येव तद्देवतार्चनार्थमुपहृतसितपुष्पवद् भान्तीत्यर्थः।। ४२ ।।

यत्रौषधिप्रकाशेन नक्तं दर्शितसञ्चराः।
अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिकाः।। ४३ ।।

यत्रेति। यत्रौषधिप्रकाशेन ओषधीनां भासा नक्तं दर्शितसञ्चाराः। सञ्चरशब्दो गोचरसञ्चरादि(पा.सू.३.३.११९)सूत्रेण निपातितः। मार्गोऽध्वा सञ्चरः पन्थाः इति भोजः। प्रकाशितमार्गाः अभिसारिकाः दुर्दिनेऽपि मेघान्धकारित दिनेऽपि तमिस्राणां अनभिज्ञा भवन्ति। मेघच्छन्नेऽह्नि दुर्दिनम्(१.३.१२), तमिस्रा तामसी रात्रिः(१.४.५) इत्यमरः। सर्वास्वपि रात्रिषु निरन्तरेणौषधिप्रकाशेन दर्शितमार्गा वेश्यास्तमःसंवृता रात्रीः नाभिजानन्तीत्यर्थः। सर्वा अपि रात्रयः तमस्सम्बन्धरहिता एवेति जानन्तीत्यभिप्रायः। तमिस्राणामिति कर्मणि षष्ठी। तमिस्राणां अन्धकाराणां अनभिज्ञा इति वा। तमिस्रं तिमिरं तमः (१.८.३) इत्यमरः।

अभिसारिकालक्षणं भोजराजेनोक्तम् -
पुष्पेषुपीडिता कान्तं याति या साऽभिसारिका इति।। ४२ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यौवनान्तं वयो यस्मिन् नातङ्कः कौसुमायुधः।

रतिखेदसमुत्था च निद्रा संज्ञाविपर्ययः।। ४४ ।।

यौवनेति। यस्मिन् पुरे स्त्रीपुरुषाणां वयो यौवनान्तम्। रतिखेद समुत्था चेत्यत्र स्थितश्चशब्दो वाक्यत्रये सम्बध्यते। स चावधारणार्थो ग्राह्यः। वयो यौवनान्तञ्च यौवनान्तमेव। यौवनस्वरूपमेवेत्यर्थः। अन्तः स्वरूपे मध्ये चावसाने निश्चयेऽन्तिक इति भोजः। यस्मिन् कौसुमायुधः कुसुमायुधभव एवातङ्कः। रुग्भीतितापेष्वातङ्क इति वैजयन्ती(७.१.९)। कामभवमेव भयमित्यर्थः। आतङ्कः कुसुमायुधादिति वा पाठः। रतिखेदसमुत्था निद्रा च संज्ञाविपर्ययः। सुरतश्रमसञ्जाता निद्रैव मोहः। दृढप्रहारज्वरादिरोगैः संज्ञाविनाशो नास्तीत्यर्थः ।। ४४ ।।

भ्रूभेदिभिः सकम्पोष्ठैर्ललिताङ्गुलितर्जनैः।

यत्र कोपैः कृताः स्त्रीणामाप्रसादार्थिनः प्रियाः।। ४५ ।।

भ्रूभेदिभिरिति। यत्र प्रियाः प्रेयांसो भर्तारः स्त्रीणां कोपैः आप्रसादार्थिनः कृताः। कोपविशेषणान्याह - भ्रूभेदिभिः भ्रूभेदयुक्तैः, सकम्पोष्ठैः सकम्पाः कम्पसहिताः ओष्ठाः भवन्ति येषु तैः। ललिताङ्गुलि तर्जनैः ललितानि अङ्गुल्यग्रतर्जनानि भवन्ति, येषु तैः। स्त्रीणां कोपस्यैतेऽ नुभावा भवन्ति। जनितभ्रूभङ्गैः प्रकम्पितोष्ठैः स्त्रीकारिताङ्गुलितर्जनैः स्त्रीणां कोपैः पुरुषाः आप्रसादार्थिनः यावत्तासां प्रसादो भवति। तावदर्थिनः पादाग्रप्रणतशिरस्काः कृता इत्यर्थः। अनेन शत्रूणामन्येषां कोपैः पुरुषा आप्रसादार्थिनो न भवन्तीति ज्ञापितम्।। ४५ ।।

सन्तानकतरुच्छायासुप्तविद्याधराध्वगम्।

यस्य चोपवनं बाह्यं बन्धुरं गन्धमादनम्।। ४६ ।।

सन्तानकेति। सन्तानकाख्यदेववृक्षच्छायायां सुप्ता विद्याधरा एवाध्वगाः पथिका यत्र तत्तथाभूतम्। यत्र बाह्यमुपवनं बन्धुरं भद्रं, गन्धमादनमेव। चशब्दोऽवधारणे। गन्धमादनाख्यः पर्वत एव यत्र बाह्यं उपवनं भवतीत्यर्थः। गन्धवत् गन्धमादनमिति केषाञ्चित्पाठः। गन्धमादनशब्दः पर्वतवाचकोऽपि नपुंसकलिङ्गोऽपि भवति। तदुक्तं अमरसिंहेन -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

हिमवान् निषधो विन्ध्यो माल्यवान् पारियात्रकः ।
गन्धमादनमन्ये च हेमकूटादयो नगाः।।(२.३.३) इति।। ४६ ।।

तत् कान्तं मुनयो दिव्या वीक्ष्य हैमवतं पुरम्।
स्वर्गाभिसन्धिं सुकृतां वञ्चनामिव मेनिरे।। ४७ ।।

तदिति। एवं कान्तं मनोहरं, हैमवतं हिमवत्स्वामिकं, तत्पुरं प्रेक्ष्य दिव्यास्ते ऋषयः, स्वर्गाभिसन्धिं सुकृतां वञ्चनामिव मेनिरे। पुण्य कारिणां स्वर्गफलेषु स्वर्गवैशिष्ट्यबुद्धिः स्वर्गाभिसन्धिः। स्वर्गादपि हिमव- त्पुरस्य विशिष्टत्वात् पुण्यफलतायै तत्पुरप्रार्थनामपहाय स्वर्गाभिनिवेश बुद्धिः सुकृतां देवैः कृता वञ्चना नूनमिति मेनिरे इत्यभिप्रायः ।। ४७ ।।

ते सद्मनि गिरेर्वेगादुन्मुखद्वास्थवीक्षिताः।
अवपेतुर्जटाभारैर्लिखितानलनिश्चलैः।। ४८ ।।

ते इति। उन्मुखद्वाःस्थवीक्षितास्ते मुनयः, गिरेस्सद्मनि व्योम्न आकाशाद् अवपेतुः अवतीर्णवन्तः। लिखितानलनिश्चलैः अधःपतनवेगातिशयादूर्ध्वगताग्रैः चित्रलिखिताग्निवत् निष्कम्पैः, जटाभारैरुपलक्षिताः ।। ४८ ।।

गगनादवतीर्णा सा यथावृद्धपुरस्सरा।
तोयान्तर्भास्करालीव रेजे मुनिपरम्परा।। ४९ ।।

गगनेति। गगनादवतीर्णा अवतरन्ती, यथावृद्धपुरस्सरा यथावृद्धं वृद्धानतिक्रमेण पुरस्सरा अग्रगामिनो विद्यन्ते यस्याः सा। मरीचिवसिष्ठादिवृद्ध-मुनिपुरस्सरेत्यर्थः। एषां स्थितिक्रमः पराशरेणोक्तः -

मरिचिः पूर्वभागस्थो वसिष्ठः पुरतस्ततः ।
ततोऽङ्गिरास्ततश्चात्रिः पुलस्त्यः पुलहः क्रतुः।।

इति। एवम्भूता सा मुनिपरम्परा मुनिपङ्क्तिः, तोयान्तभास्करालीव रेजे। जलान्तर्दृश्यमानभास्करप्रतिबिम्बमालेव शुशुभे इत्यभिप्रायः।। ४९ ।।

तानर्घ्यानर्घ्यमादाय दूरात् प्रत्युद्ययौ गिरिः।
नमयन् सारगुरुभिः पादन्यासैर्वसुन्धराम्।। ५० ।।

तानिति। तदा गिरिरर्घ्यमादायार्घ्यान् अर्घ्यार्हान् पूज्यांस्तान्मुनीन् दूरात् प्रत्युद्ययौ अभ्युत्थितवान्। कथम्भूतः। सारगुरुभिः, सारस्थैर्य भारकारणं बलं,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तेन गुरुभिः। पादन्यासैः वसुन्धरां भूमिं नमयन्। प्रतिपदं नतं कुर्वन्नित्यर्थः ।। ५० ।।

धातुताम्राधरः प्रांशुर्देवदारुबृहद्भुजः।

प्रकृत्यैव शिलोरस्कः सुव्यक्तो हिमवानिति।। ५१ ।।

धात्विति। धातुताम्राधरः मनश्शिलादिधातुवत्ताम्राधरोष्ठो यस्य सः। प्रांशुरुन्नतः। देवदारुबृहद्भुजः देवदारुवत् स्थूलभुजः। प्रकृत्यैव स्वभावेनैव, शिलोरस्कः शिलावत्कठिनविस्तीर्णवक्षाः। स गिरिराजो हिमवानिति सुव्यक्तोऽभूत्। गिरिरूपमपहाय निजदेवतास्वरूपमादाय आगच्छन् स स्वकीये स्थावररूपे दृष्टानामौन्नत्यधातुदेवदारुशिलासङ्घातानां समानैस्तुङ्गत्वताम्रोष्ठ-बृहद्बाहुकठिनवक्षस्स्थलैः गिरिराजोऽयं हिमवानिति सुव्यक्तोऽभूदित्यभिप्रायः ।। ५१ ।।

विधिप्रयुक्तसत्कारः स्वयं मार्गस्य दर्शकः।

स तैराकारयामास शुद्धान्तं शुद्धकर्मभिः।। ५२ ।।

विधीति। विधिप्रयुक्तसत्कारः, विधिना प्रयुक्तो विहितः सत्कारः पूजा येन सः। स्वयं मार्गस्य दर्शकोऽन्तःपुरस्यायं मार्ग इति स्वयमेव दर्शयन्, गिरिः शुद्धकर्मभिस्तैः मुनिभिः, शुद्धान्तमाक्रामयामास। अन्तःपुरं तैराक्रान्तमकरोत्। तानन्तःपुरं प्रापयामासेत्यर्थः। विधिप्रयुक्तसत्कारैरिति वा पाठः। गिरिणा विधिवत्कल्पितार्घ्यादिसपर्यैरित्यर्थः।। ५२ ।।

तत्र वेत्रासनासीनान् अनासनपरिग्रहः।

इत्युवाचेश्वरान् वाचं प्राञ्जलिः पृथिवीधरः।। ५३ ।।

तत्रेति। तत्रान्तःपुरे अनासनपरिग्रहः अकृतासनस्वीकारः, प्राञ्जलिः स पृथिवीधरः, वेत्रासनासीनान् वेत्रलतानिर्मितेष्वासनेष्वासीनान्, ईश्वरान् तपस्सिद्धैश्वर्ययुक्तान्मुनीनिति वाचमुवाच।। ५३ ।।

अपमेघोदयं वर्षमदृष्टकुसुमं फलम्।

अतर्कितोपपन्नं वो दर्शनं प्रतिभाति मे।। ५४ ।।

अपेति । अतर्कितोपपन्नं पूर्वमतर्कितं, सहसा प्राप्तं, वः युष्माकं, दर्शनं मे मम, अपमेघोदयं वर्षं प्रतिभाति । मेघोद्गमनरहितं वर्षवत् प्रतिभातीत्यर्थः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तथा अदृष्टकुसुमं फलं प्रतिभाति। लोकैरदृष्टकुसुमं कुसुमोद्गमनेन विधिना सहसोद्गतं फलमिव प्रतिभातीत्यर्थः।। ५४ ।।

मूढं बुधमिवात्मानं हैमीभूतमिवायसम्।
भूमेर्दिवमिवारूढं मन्ये भवदनुग्रहात्।। ५५ ।।

मूढमिति। अहं भवदनुग्रहात् आत्मानमेवं मन्ये। मूढं अविद्वांसं, बुधमिव विद्वांसं इव। पूर्वं मूढं पुरुषं, ततो विद्वत्तां प्राप्तं इवेत्यर्थः। आयसं हैमीभूतमिव अयोविकारं, खड्गदण्डादिकं सिद्धरसघुटिकादिसम्बन्धेन हेममयतां प्राप्तमिवेत्यर्थः। भूमेः दिवमारूढमिव, पूर्वं भूमौ वसन्तं मानुषं, ततो दिवमारूढमिव। देवत्वं प्राप्तमिवेत्यर्थः। एवं हीनमप्यात्मानमिदानीं त्वदनुग्रहात् कारणात् उत्तमतां प्राप्तं भावयामीत्यभिप्रायः। अत्र केचिदेतान्यात्मविशेषणानि योजयन्ति। मूढमात्मानं बुधमिव मन्ये इत्यादि। तेषां पक्षे हैमीकृतमिवात्मानं इति पाठः। आत्मानमश्ममयं मां हैमीकृतमिव मन्ये। भूमेर्दिवमारूढमिव, स्थावरत्वमपहाय देवत्वं प्राप्तमिव मां भावयामीत्यभिप्रायः ।। ५५ ।।

अद्यप्रभृति मर्त्यानामधिगम्योऽस्मि शुद्धये।
यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते।। ५६ ।।

अद्येति। अद्य प्रभृति शुद्धये स्वकृतमहापातकादिदोषपरिहाराय, मर्त्यानामहमधिगम्योऽस्मि। मर्त्यैरहमाश्रयणीयो भवामि। तदेवोपपादयति- यदिति। अर्हद्भिः पूज्यैः महद्भिः, यत् स्थानमध्यासितम् अध्युषितं, तत् तीर्थं सम्प्रचक्षते। हि प्रसिद्धमेतत्। भवद्भिरधिष्ठितत्वात् अहमद्यप्रभृति तीर्थं भविष्यामीत्यभिप्रायः।। ५६ ।।

अवैमि पूतमात्मानं द्वयेनैव द्विजोत्तमाः।
मूर्ध्नि गङ्गाप्रपातेन धौतपादाम्भसा च वः।। ५७ ।।

अवैमीति। हे द्विजोत्तमाः, अहमात्मानं द्वयेनैव पूतमवैमि। किं तद् द्वयमित्याह - मूर्ध्नि गङ्गाप्रपातेन। तथा वो युष्माकं, धौतपादाम्भसा प्रक्षालितपादजलेन चेति द्वयेन मां शुद्धमवैमीत्यर्थः।। ५७ ।।

जङ्गमं प्रेष्यपक्षे वः स्थावरं चरणाङ्कितम्।
विभक्तानुग्रहं मन्ये द्वैरूप्यमपि मे कृतम्।। ५८ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जङ्गममिति। वः प्रेष्यपक्षे स्थितं जङ्गमम्। नियोगकृत् कर्मकरः प्रेष्यो भृत्यश्च किङ्करः इति भोजः। प्रेष्यपक्षे प्रेष्यकोट्यामवस्थितम्। किङ्करतां प्राप्तमित्यर्थः। युष्मत्किङ्करभावे स्थितं जङ्गमं मे रूपम्। चरणाङ्कितं पादन्यासलाञ्छनयुक्तं स्थावरमिति मे द्वैरूप्यं रूपद्वयमपि, विभक्तानुग्रहं पृथक्कृतानुग्रहं, कृतमिति मन्ये। जङ्गमस्य नियोगकरणं, स्थावरस्य चरणन्यास इति विभज्य विहितानुग्रहं मम रूपद्वयं युष्माभिः कृतं मन्येऽहमित्यर्थः। द्वैरूप्यमिति चातुर्वर्ण्यादित्वात् (वार्तिकम् ५.१.१२४) ष्यञ्। प्रेक्ष्यपक्षे व इति केषाञ्चित् पाठः। तत्र प्रेक्ष्येति पदच्छेदः। तत्रैवं योजना कार्या। प्रेक्ष्य वः पक्षे प्रविष्टं जङ्गममिति दृष्ट्या, वः युष्माकं, पक्षे स्थितं पक्षतां प्राप्तम्। त्वदुक्त-कर्मकर्तृत्वं प्राप्तं जङ्गममित्यर्थः। प्रोक्तकर्मकर्ता सहायभूतो जनः पक्ष इत्युच्यते।

पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु

इति वैजयन्ती (६.१.३५) ।। ५८ ।।

भवत्सम्भावनोत्थाय परितोषाय मूर्च्छते।
अपि व्याप्तदिगन्तानि नाङ्गानि प्रभवन्ति मे।। ५९ ।।

भवदिति। भवत्सम्भावनोत्थाय युष्मत्सम्भावनोत्पन्नाय मूर्च्छते व्याप्नुवते परितोषाय व्याप्तदिगन्तान्यपि मे ममाङ्गानि न प्रभवन्ति। महान्त्यपि ममाङ्गानि युष्मत्सम्भावनोत्पन्नाय महते परितोषाय पर्याप्तानि न भवन्ति। महतोऽस्य सन्तोषस्य ममाङ्गेष्ववकाशो न पर्याप्तः। मदङ्गेषु सन्तोषो न मातीत्यभिप्रायः। एतद्विषये माघेनाप्युक्तम् (१.२३) -

तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः

इति। तनुशब्दस्यार्थग्रहणात् साध्विति। मूर्च्छत इति मूर्च्छन्। मूर्च्छ मोहसमुच्छ्राययोः इति धातोः शतृप्रत्ययो भवति।। ५९ ।।

न केवलं दरीसंस्थं भास्वतां दर्शनेन वः।
अन्तर्गतमपास्तं मेऽरजसोऽपि परं तमः।। ६० ।।

नेति। भास्वतां तेजस्विनां, वो दर्शनेन मम दरीसंस्थं गुहास्ववस्थितं, तम एव केवलं नापास्तम्। किन्तु अरजसो मेऽन्तर्गतं परं भूयिष्ठं, तमोऽप्यपास्तमित्यन्वयः। अरजस इति पदच्छेदः। भवद्दर्शनाद् विरहितरजो-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गुणस्य विनष्टकलुषस्येत्यर्थः। शुद्धान्तःकरणस्य मम मनसोऽ न्तर्गतमपि तमो भवद्दर्शनेन निरस्तमित्यर्थः। मनसोऽपि परं तम इति केषाञ्चित् पाठः। भूयिष्ठोत्कृष्टयोः परम् इति भोजः।। ६० ।।

कर्तव्यं वो न पश्यामि स्याच्चेत् किं नोपपद्यते।
मन्ये मत्पावनायैव प्रस्थानं भवतामिह।। ६१ ।।

कर्तव्यमिति। अहं वः कर्तव्यं करणीयं, किञ्चिन्न पश्यामि। स्याच्चेत् तत् कर्तव्यं यदि स्यात्। किं नोपपद्यते, किमेव न सिध्यति। सर्वमप्युपपद्यते एवेत्यर्थः। तर्हि किमर्थमिहागमनमित्याशङ्क्य तत् कारणादुत्प्रेक्षते। भवतामिह प्रस्थानं एतत् स्थानं प्रति प्रयाणं आगमनं, मत्पावनायैव मम विशुद्धिविधानायैव इति शङ्के। मत्पावनायेति तादर्थ्ये चतुर्थी। मत्पावनार्थमेव इत्युत्प्रेक्षेऽहम् इत्यर्थः।। ६१ ।।

अथापि तावत् कस्मैचिदाज्ञां मे दातुमर्हथ।
विनियोगप्रसादा हि किङ्कराः प्रभविष्णुषु।। ६२ ।।

अथापीति। अथापि तावदिदानीं कस्मैचित् प्रयोजनाय यूयं मे मह्यमाज्ञां दातुमर्हथ। कस्मिंश्चिदिति कश्चित् पाठः। क्वापि कार्य इत्यर्थः। तथा हि। किङ्कराः प्रभविष्णुषु प्रभुषु स्वामिषु, विनियोगप्रसादा भवन्ति। कार्ये विनियोग एव प्रसादो येषां ते तथा। कार्यनियोगः स्वामिभिः कृतश्चेत्स एव किङ्कराणां स्वामिकृतः प्रसाद इत्यर्थः।। ६२ ।।

एते वयममी दाराः कन्या च कुलजीविका।
ब्रूत येनात्र वः कार्यमनास्था बाह्यवस्तुषु।। ६३ ।।

एते इति। एते एवम्भूता वयं विनियोगप्रसादार्थिनः किङ्करभूता वयम्। अमी दाराः।

भार्या पत्नी प्रिया जाया दाराः पुंस्येव भामिनी

इति भोजः। इयं भार्येत्यर्थः। कुलजीविका कुलस्य जीवनभूता इयं कन्या च। अत्र एतेष्वस्मासु येन वः कार्यम्। मया वा भार्यया वा कन्यया वा वः भाव्यं कार्यमस्ति तद् ब्रूत। सामान्यनिर्देशे नपुंसकमिति येनेति नपुंसक प्रयोगः। बाह्यवस्तुषु अनास्था, अस्मद्व्यतिरिक्तेषु धनादिषु वस्तुष्वनादर एव।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अस्माभिर्यदि कार्यमस्ति तर्ह्यस्मानपि वयं ददाम। किमुतान्यानि धनादीनीत्यभिप्रायः।। ६३ ।।

इत्यूचिवांस्तमेवार्थं गुहामुखविसर्पिणा।
द्विरिव प्रतिशब्देन व्याजहार हिमालयः।। ६४ ।।

इतीति। इत्यूचिवान् एवमुक्तवान्, हिमालयः दरीमुखविसर्पिणा प्रतिशब्देन तमेवार्थं उक्तमेवार्थं, द्विरिव व्याजहार द्विवारमुक्तवानिव। पुनरपि कथितवान् नूनमित्युत्प्रेक्षा। ऊचिवानित्यस्य व्युत्पत्तिर्मृग्या। पातनीये वचेः क्वसुविधानाभावात्। भाषायां सदवसश्रुवः, उपेयिवाननाश्वाननूचानश्च (पा.सू.३.२.१०८ - १०९)इत्येतेभ्य एव धातुभ्यो भाषायां क्वसुविधानादिति। अत्र केचिदतः कारणादित्युक्तवांस्तमेवार्थमिति पङ्क्तिं पठन्ति।। ६४ ।।

अथाङ्गिरसमग्रण्यमुदाहरणवस्तुषु।
ऋषयो नोदयामासुः प्रत्यवोचत् स भूधरम्।। ६५ ।।

अथेति। उदाहरणवस्तुषु अग्रण्यं तपःशमदमज्ञानादिगुणानां उदाहरणभूतेषु वस्तुषु अग्रे नेतारं प्रथमं श्रेष्ठम्। सर्वेषां गुणवतामेव दृष्टान्तभूतमित्यर्थः। अथवा उदाह्रियन्त इत्युदाहरणानि शब्दाः। वस्तून्यर्थाः। उदाहरणानि वस्तूनि चोदाहरणवस्तूनि। तेषु अग्रगण्यम्। शब्दार्थेषु विशेषज्ञं इत्यर्थः। एवम्भूतमाङ्गिरसं ऋषयश्चोदयामासुः वक्तुं चोदयामासुरित्यर्थः।

अत्र केचिदन्यथा पदार्थानां योजनां कुर्वन्ति - अथ ऋषयः अग्रण्यं श्रेष्ठं आङ्गिरसमुदाहरणवस्तुषु ऋषयश्चोदयामासुरिति। शिवेन कृतो यः सन्देशः उदाहरणं तस्य यानि वस्तूनि प्रयोजनानि तेषु चोदयामासुः। तानि वक्तुं चोदयामासुरित्यर्थः। एवं वक्तुं तैश्चोदितः सोऽङ्गिराः भूधरं गिरिं प्रत्यवोचत् प्रत्युक्तवान्।। ६५ ।।

उपपन्नमिदं सर्वमतः परमपि त्वयि।
मनसः शिखराणां च सदृशी ते समुन्नतिः।। ६६ ।।

उपपन्नमिति। उक्तमिदं सर्वमपि त्वय्युपपन्नमपि सम्भावितं सङ्घटितं युक्तम्। अतःपरमपि अतोऽधिकमपि त्वय्युपपन्निमिति सम्बन्धः। तथाहि। ते तव, मनसः शिखराणाञ्च समुन्नतिः सुसदृशी। यथा ते शिखराणां समुन्नतिस्तथा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एवं, ते मनसोऽपि समुन्नतिरस्तीत्यर्थः। समुन्नतमनास्त्वं उक्तं सर्वमपि दातुं समर्थोऽसीत्यभिप्रायः।। ६६ ।।

स्थाने त्वां स्थावरात्मानं विष्णुमाहुस्तथा हि ते।
चराचराणां भूतानां कुक्षिराधारतां गतः।। ६७ ।।

स्थान इति। सन्तस्त्वां स्थावरात्मानं स्थावररूपं, विष्णुमाहुः। तत् स्थाने, तद् युक्तम्। स्थाने इति सप्तमीप्रतिरूपकं अव्ययम्। स्थाने युक्तार्थं अव्ययमिति भोजः। तथा हि। ते कुक्षिः चराचराणां भूतानां आधारतां गतः। विष्णोः कुक्षिरपि चराचराणां भूतानामाधारो भवति। तद्वत् अखिलभूतानामाधारोदरं त्वां पर्वतरूपं विष्णुं वदन्तीत्यर्थः।। ६७ ।।

गामधास्यत् कथं नागो मृणालमृदुभिः फणैः।
आरसातलमूलात्त्वमवालम्बिष्यथा न चेत्।। ६८ ।।

गामिति। तर्हि नागोऽनन्तो मृणालसदृशैः फणैः गां भूमिं, कथमधास्यत् कथं धारयेत्। डुधाञ् धारणपोषणयोरिति धातोर्लृङन्तम्। यदि त्वं भूमिं आरसातलान्नावलम्बिष्यथाश्चेत्। अयमर्थः - यदि त्वमापातालमूलात् पृथ्वीं न बिभृथाः तर्हि कोमलैः फणैरनन्तः पृथ्वीं कथं धारयेत्। तैस्तु धारयितुं शक्तो न भवेदिति। अत्र क्रियातिपत्तौ सत्यां, लिङ्निमित्ते लृङ् क्रियातिपत्तौ (पा.सू.३.३.१३९)। उभयत्र लृङ्।। ६८ ।।

अच्छिन्नामलसन्तानाः समुद्रोर्मिनिवारिताः।
पुनन्ति लोकान् पुण्यत्वात् कीर्तयः सरितश्च ते।। ६९ ।।

अच्छिन्नेति। अच्छिन्नामलसन्तानाः कीर्तिकारणधर्माणां प्रत्यहं पुनः पुनरनुष्ठीयमानत्वात् अच्छिन्ननिर्मलसन्ततावस्थानाः। समुद्रोर्मि निवारिताः। आसमुद्रं क्षितौ व्याप्ताः इत्यर्थः। एवम्भूताः ते कीर्तयः पुण्यत्वात् पावनत्वात् लोकं पुनन्ति। ते सरितश्च पुण्यत्वाल्लोकं पुनन्तीति सम्बन्धः। त्वत्सम्बन्धिन्यो भवत्पादनिर्गता नद्यश्च लोकस्याघं हरन्तीत्यर्थः। सरितोऽप्यच्छिन्नामलप्रवाहाः समुद्रगामिन्यश्चेति विशेषणं समम्।। ६९ ।।

यथैव श्लाघते गङ्गा पातेन परमेष्ठिनि।
प्रभवेण द्वितीयेन तथैवोच्छिरसा त्वया।। ७० ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यथेति। परमेष्ठिनि, परमे स्थाने तिष्ठतीति परमेष्ठी शिवः। ब्रह्मेशौ परमेष्ठिनाविति भोजः। गङ्गा परमेष्ठिनि शम्भौ, पातेन यथैव श्लाघते शम्भु मूर्ध्नि प्रथमपातेन विशिष्टाऽहमस्मि, नान्या मत्समा सरिदित्यात्मानं यथा स्तौति। उच्छिरसि उन्नतमूर्ध्नि, त्वयि द्वितीयेन पातेन तथैव श्लाघते शम्भुवत् त्वयि पातोऽपि तस्याः श्लाघकारणमेवेत्यर्थः। श्लाघृ कत्थन इति धातुः ।। ७० ।।

तिर्यगूर्ध्वमधस्ताच्च व्यापको महिमा हरेः।
त्रिविक्रमोद्यतस्यासीत् स तु स्वाभाविकस्तव।। ७१ ।।

तिर्यगिति। त्रिविक्रमोद्यतस्य हरेर्महिमा तिर्यगूर्ध्वमधस्ताच्च व्यापक आसीत्। स तु तव स्वाभाविकः। तुशब्दोऽवधारणे। स्वाभाविक एवेत्यर्थः। पदत्रयेण त्रैलोक्यविक्रमेणोद्यमनकाल एव हरेस्सर्वव्यापी महिमाऽभूत् तादृशः। स महिमा तव स्वभावसिद्ध एवेत्यभिप्रायः।।७१।।

यज्ञभागभुजां मध्ये स्वयमाक्रम्य तिष्ठता।
उच्चैर्हिरण्मयं शृङ्गं सुमेरोर्वितथीकृतम्।। ७२ ।।

यज्ञेति। यज्ञभागभुजां देवानां मध्ये स्वयमाक्रम्य तिष्ठता त्वया सुमेरोः हिरण्मयं शृङ्गं वितथीकृतम्। यज्ञाङ्गयोनित्वमित्यत्र(१.१७) श्लोके हिमाद्रेः यज्ञभूभागभुक्त्वं प्रकाशितम्। ब्रह्मणा कल्पितेन यज्ञभागेन भवता यज्ञभागहीनस्य सुमेरोः सुवर्णमयशृङ्गत्वनिमित्तोऽभिमान एव त्वया भग्न इत्यभिप्रायः। शृङ्गमित्युपचारपदप्रयोगः। मञ्चाः क्रोशन्तीति प्रयोगे मञ्चस्थाः पुरुषा यथा गृह्यन्ते, तथेहापि शृङ्गमिति शृङ्गजन्योऽभिमानो गृह्यते। अत्राक्रम्येत्यनेनार्थान्तरमपि प्रतीयते। तत्कथमिति चेद् ब्रूमः - देवाः सुमेरुशृङ्गमाक्रम्य तिष्ठन्ति, यज्ञभागं भुक्त्वा देवत्वं प्राप्तेन हिरण्मयं मेरुशृङ्गं स्वयमाक्रम्याधिरुह्य तिष्ठता त्वया मेरोस्तच्छृङ्गं विफलीकृतमिति देवस्य भवतः पादाधः स्थितत्वात् सुवर्णमयमपि तद् व्यर्थमेवासीत्। ततो वैशिष्ट्य-कृन्नासीदित्यर्थः। शृङ्गं प्राधान्यमिति केचिदाहुः।

शृङ्गं विषाणशिखरप्राधान्येषु प्रवर्तते।

इति भोजः । मेरोर्हिरण्मयत्वोद्भवं तत्प्राधान्यं त्वया निरस्तमिति तत्रार्थः ।। ७२ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

काठिन्यं स्थावरे काये भवता सर्वमर्पितम्।
इदं तु ते भक्तिनम्रं सतामाराधनं वपुः।। ७३ ।।

काठिन्यमिति । स्थावरे पर्वतरूपेऽस्मिन् काये भवता सर्वं काठिन्यं कठिनत्वमर्पितम्। भक्तिनम्रमिदं तु पुनस्ते वपुः महदाराधनं महतां अर्हतां आराधनसाधनं भवति ।। ७३ ।।

यदागमनकार्यं नः शृणु कार्यं तवैव तत्।
श्रेयसामुपदेशात्तु वयमत्रांशभागिनः।। ७४ ।।

यदिति। यदागमानान्नोऽस्माकं, यदागमनकार्यं त्वत्पुरागमन प्रयोजनं, तच्छृणु । श्रेयसामुपभोगात् तवैव कार्यम् । उपभोजनमुपभोगः। हेतुमण्यन्तात् भुजेर्घञ्। त्वदीयश्रेयःसमुपभोगहेतुत्वात्तवैव कार्यमित्यर्थः। ममैव कार्यार्थं इदमागमनमिह भवतां किमपि कार्यं किं नास्तीत्याशङ्क्याह - वयं तु पुनः अत्रांशभागिनः। विवाहदर्शनसन्तोषादेस्तन्निमित्ताल्लोकस्यासुरनिग्रहविनाशसुखानुभवादेश्च श्रेयसोऽशंभागिनः एव वयम्। प्राधान्येन तवैव श्रेयांसि भविष्यन्तीत्यर्थः ।। ७४ ।।

अणिमादिगुणोपेतमस्पृष्टपुरुषान्तरम्।
शब्दमीश्वर इत्युच्चैः सार्धचन्द्रं बिभर्ति यः।। ७५ ।।

अणिमेति च। स ते दुहितरं ... शम्भुरिति वक्ष्यति(६.७८) । तमेव यच्छब्देन विशिनष्टि - अणिमादिगुणोपेतम्। अणिमादयोऽष्टौ गुणाः, तैरुपेतं युक्तम्। तदुक्तं स्कान्दपुराणे -

अणिमा लघिमा चैव महिमा गरिमा तथा ।
ईशित्वञ्च वशित्वञ्च प्राप्तिः प्राकाश्यमेव च ।
ईश्वरस्येत्थमैश्वर्यमष्टधा परिकीर्तितम् ।। इति ।

अस्पृष्टपुरुषान्तरमिति, अस्पृष्टं पुरुषान्तरं येन तथा। वाच्यत्वेन पुरुषान्तरं अस्पृशन्तमित्यर्थः। अणिमाद्यष्टैश्वर्ययुक्तं पुरुषान्तरसम्बन्धरहितम्। ईश्वर इति शब्दं यस्सार्धचन्द्रम् अर्धचन्द्रेण सह बिभर्ति। तथैश्वरशब्दमपि बिभर्तीत्यर्थः। अर्धचन्द्रभरणमीश्वरवाच्यत्वं च यत्तस्यैव नान्येषां इत्यभिप्रायः। उच्चैरित्यव्ययं शब्दविशेषणम्। उच्चैरुन्नतमिति। विशिष्टं इत्यर्थः।। ७५ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कल्पितान्योन्यसामर्थ्यैः पृथिव्यादिभिरात्मभिः।
येनेदं ध्रियते विश्वं धुर्यैर्यानमिवाध्वनि।। ७६ ।।

कल्पितेति । कल्पितान्योन्यसामर्थ्यैः कल्पितं साधितमन्योन्यस्य सामर्थ्यं यैस्तैः। पृथिव्यादिभिर्यस्यात्मभिः भूम्यादिभिर्मूर्तिभिरिदं व्यक्तं विश्वं ध्रियते ध्रियते। आकाशः पृथिव्यादीनाञ्चतुर्णां स्वकार्यसामर्थ्यं जनयति । जलतेजसी पृथिव्या युक्ते स्वकार्यं कुरुतः। ताभ्यां युक्ता पृथिवी स्वकार्यं करोतीति सर्वत्रापि द्रष्टव्यम् । धुर्यैरध्वनि यानमिव अश्वैर्यथा रथो ध्रियते, तथा यदात्मभिरयं प्रपञ्चो ध्रियते इत्यर्थः।। ७६ ।।

योगिनो यं विचिन्वन्ति क्षेत्राभ्यन्तरवर्तिनम्।
अनावृत्तिभयं यस्य पदमाहुर्मनीषिणः।। ७७ ।।

योगिन इति । योगिनः समाधियुक्ता मुनयः, क्षेत्राभ्यन्तरवर्तिनं यं विचिन्वन्ति। क्षेत्रं शरीरम्।

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते (१३.१)

इति भगवद्गीतायामुक्तम्। शरीरान्तर्वर्तिनं क्षेत्रजं आत्मानं अन्विच्छन्ति। ज्ञानदृशा द्रष्टुमुत्सहन्ते इत्यर्थः। मनीषिणो विद्वांसः यस्य पदं अनावृत्ति भयमाहुः। आवृत्तिः पुनरावर्तनं, ततो भयमावृत्तिभयं तेन रहितम्।

अयमभिप्रायः। यस्य स्थानं प्राप्तवतां पुनरावृत्तिर्नास्ति। तत्रैव वासः शाश्वतो भवतीति। अत्र केचिदन्यथा व्याचक्षते - आवृत्तिस्संसारः, तद्भयरहितमित्यर्थः।। ७७ ।।

स ते दुहितरं साक्षात् साक्षी विश्वस्य कर्मणः।
वृणुते वरदः शम्भुरस्मत्सङ्क्रमितैः पदैः।। ७८ ।।

स त इति। विश्वस्य जगतां, कर्मणस्साक्षी पुण्यपापात्मकस्य कर्मणस्साक्षिभूतः। वरदः अन्येषां वरदाताऽपि सन्। स शम्भुः अस्मत्सङ्क्रमितैः पदैस्ते दुहितरं साक्षाद्वृणुते। सङ्क्रमणं सङ्क्रमः, सङ्क्रमणस्थानात् स्थानान्तरप्राप्तिः। सङ्क्रमितैः जातसङ्क्रमैः। तदस्य सञ्जातं तारकादिभ्य इतच्(पा.सू.५.२.३६)। अस्मासु कृतसङ्क्रमणैः पदैः शब्दैः, तव कन्यां प्रत्यक्षं प्रार्थयते। अथवा अस्मत्सङ्क्रमितैः अस्माभिः प्रापितैः, पदैः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उदीरितैः वचनैः इति अस्मन्मुखेन शम्भुः स्वयमेव ते कन्यावरणं करोति इत्यभिप्रायः। वरणं प्रार्थनं याच्ञेति भोजः। वृञ् वरणे इति धातोरिदं रूपम्।

अत्र प्रथमेन (६.७५) श्लोकेन तस्येश्वरत्वमुक्तम्। ततो द्वाभ्यां (६.७६ - ७७) तस्य क्रमाद् विश्वपालकत्वं मुक्तिप्रदायित्वं चोक्तम्। स ते विश्वस्य कर्मणः साक्षी स्वयमकर्ताप्ययाचितापि वरदः परेषां इष्टवर प्रदोऽपि स शम्भुस्ते दुहितरं कन्यां साक्षाद् वृणुते याचते। स्वयमब्रुवन् कथं साक्षाद् वृणुते। इह अस्मत्सङ्क्रमितैः पदैरिति, अस्माभिरानीतैः पदैर्वचोभिः इति प्रेषणाद् वयं प्राप्ता इति भावः।। ७८ ।।

तमर्थमिव भारत्या सुतया योक्तुमर्हसि।
अशोच्या हि पितुः कन्या सद्भर्तृप्रतिपादिता।। ७९ ।।

तमिति। अर्थमभिधेयं, भारत्या वाचा, शब्देनेत्यर्थः । वागर्थाविव सम्पृक्तावितीदमादावेव प्रकाशितम्(रघुवंशम् १.१)। यथा वाचार्थस्य समीचीनो योगो भवति, तथा त्वं सुतया योक्तुं योजयितुमर्हसि। अतिप्रियकन्यापरित्यागे मम शोकः स्यादित्याशङ्क्याह - अशोच्येति। सद्भर्तृप्रतिपादिता समीचिनाय भर्त्रे दत्ता कन्या, पितुः शोच्या शोचनीया, न भवति । तव च श्रेयस्स्यादिति भावः ।। ७९ ।।

भाविन्या श्लाघ्यतया तस्या अशोच्यत्वमेव दर्शयति श्लोकद्वयेन -

यावन्त्येतानि भूतानि स्थावराणि चराणि च।
मातरं कल्पयन्त्येनामीशो हि जगतः पिता।। ८० ।।

द्वयानीति। यावन्ति स्थावराणि चराणि चेति द्वयानि द्विविधानि, भूतानि एनां त्वत्कन्यां मातरं कल्पयन्तीत्यर्थः। यावत्पुरानिपातयोर्लट्।

अन्ये केचिद् आहुः - वर्तमानसामीप्ये वर्तमानवद्वा(पा.सू.३.३.१३१) इति भविष्यदर्थे लट्। अत्रावधारणे यावच्छब्दः। ईशो जगतः पिता हि। अतोऽस्या मातृत्वं युक्तमिति।। ८० ।।

प्रणम्य शितिकण्ठाय विबुधास्तदनन्तरम्।
चरणौ रञ्जयन्त्यस्याश्चूडामणिमरीचिभिः।। ८१ ।।

प्रणम्येति। विबुधा देवाः, शितिकण्ठाय प्रणम्य नमस्कृत्य, तदनन्तरं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चूडामणिमरीचिभिः किरीटरत्नप्रभाभिः, अस्याश्चरणौ रञ्जयन्ति। रञ्जयिष्यन्ति इत्यर्थः।। ८१ ।।

अनेन तवैव न केवलं श्रेय इति, त्वत्कुलस्यापि श्रेयः स्यादित्याह -

उमा वधूर्भवान् दाता याचितार इमे वयम्।

वरः शम्भुरलं ह्येष त्वत्कुलोद्भूतये विधिः।। ८२ ।।

उमेति। उमा कन्या देया, भवान् दाता, इमे वयं याचितारः, शम्भुर्वरः। अस्मद्याच्ञया भवता शम्भवे वराय कन्यादानमित्येष विधिः। तत् कर्म तद् विवाहकर्म, त्वत्कुलोद्भूतये त्वत्कुलस्य विशिष्टश्रेयसे, अलं समर्थः स्यात्। अत्रोमायाः शीलादयो गुणाः। हिमाद्रेस्तव भूभृत्त्वश्रद्धादयः। अस्माकं तपोनियमादयः। शम्भोरीश्वरत्वादयः इति लोकोत्तरा इमे गुणाः। अतः एभिः कृतोऽयं विवाहविधिः त्वत्कुलोन्नतये समर्थः स्यादिति भावः ।। ८२ ।।

तवाप्यनेन लोकोत्तरत्वं भविष्यतीति कन्यादानश्रद्धोत्पादनार्थं आह -

अस्तोतुः स्तूयमानस्य वन्द्यस्यानन्यवन्दिनः।

सुतासम्बन्धविधिना भव विश्वगुरोर्गुरुः।। ८३ ।।

अस्तोतुरित्यादि। अस्तोतुः विश्वगुरुत्वाद् अन्यं अस्तुवतः। परैः स्तूयमानस्य, वन्द्यस्य परेषां वन्दनीयस्य। अनन्यवन्दिनः अन्येषां वन्दनं अकुर्वतः, विश्वगुरोः शम्भोस्त्वं स्वसुतासम्बन्धविधिना कन्यादानसम्बन्ध-कर्मणा, गुरुर्भव । श्वशुरस्यापि गुरुत्वं स्मृतावुक्तम् -

पित्रादयस्त्रयः पूर्वे ज्येष्ठो भ्राता च मातुलः।

मातामहश्च श्वशुरः सप्तैते गुरवः स्मृताः।। इति।। ८३ ।।

प्रसङ्गात्सर्वमनुवर्ण्य नायिकाकर्मानुगुणसन्धानं विधत्ते -

एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी।

लीलाकमलपत्राणि गणयामास पार्वती।। ८४ ।।

एवमिति। देवर्षावङ्गिरसि, एवमित्थं, वादिनि वादयुक्ते। वदति सतीत्यर्थः। पितुः पार्श्वे अधोमुखी तिष्ठन्ती पार्वती लीलाकमलपत्राणि गणयामास। अत्र मुनीनां पितुश्च वचनाकर्णनाय तत्र स्थितायाः पार्वत्या लज्जाभावध्वनिः। लीलाकमलपत्रगणनमवहित्थाख्यो व्यभिचारिभावः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्मृतिर्वितर्क उत्कण्ठा चिन्ता चपलतामतिः ।
गर्वः स्नेहो धृतिः व्रीडाऽवहित्था मूढता मदः ।। (५.१६)

इत्यादयस्त्रयस्त्रिंशत् सरस्वतीकण्ठाभरणे भोजराजेनोक्ताः। अवहित्थालक्षणमपि तत्रैव तेनोक्तम्। अधोमुखत्वमनुभावः, देवर्षिवाक्यमुद्दीपन विभावः, शृङ्गाररस एव भावरूपेण जात इति रसोक्त्यलङ्कारोऽयम् ।। ८४ ।।

तदा हिमवता किं कृतमित्याह -

शैलः सम्पूर्णकामोऽपि मेनामुखमुदैक्षत।
प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः।। ८५ ।।

शैल इति। सम्पूर्णकामः पूर्वमपि शिवाय कन्यां ददामीति मनोरथं कृत्वा तिष्ठन् दिष्ट्या तत्फलनात् पर्याप्तमनोरथोऽपि शैलः मेनामुखमुदैक्षत, मेनाया मुखमालोकितवान्। तस्या मुखं तत्कार्याननुमत्या अप्रसन्नमिति भावेन मेनामुखं उदीक्षितवान् इत्यभिप्रायः। प्रतिवाक्यकथने तस्यात्मन एव सामर्थ्यं किं नास्तीत्याशङ्क्याह - प्रायेणेत्यादि। कुटुम्बिनो गृहस्थाः, कार्यार्थेषु कन्यादानादिकार्येषु, गृहिणीनेत्राः प्रायेण भवन्ति। गृहिणी पत्नी, सैव नेत्रं नयनसाधनं येषां ते तथा। यथा चक्षुः पुरुषान्नयति, चक्षुषा विना न कश्चिदपि कर्तुं शक्यते, तद्वत् कन्याकार्येषु गृहिणी नेत्रभूतेति भावः। कन्यार्थे हीति, कन्यार्थिषु चेति केषाञ्चित्पाठः ।। ८५ ।।

(मेने मेनापि तत्सर्वं पत्युः कार्यमभीप्सितम्।
भवन्त्यव्यभिचारिण्यो भर्तुरिष्टे पतिव्रताः।। ८६ ।।)

इदमत्रोत्तरं न्याय्यमिति बुद्ध्या विचिन्त्य सः।
आददे वचसामन्ते मङ्गलालङ्कृतां सुताम्।। ८७ ।।

इदमिति। मेनामुखमपि प्रसन्नं दृष्ट्वा, स शैलः, अत्र कन्याप्रार्थने, इदं कन्यासमर्पणमेव, न्याय्यं न्यायादनपेतं युक्तं, उत्तरमनन्तरकरणीयं, कार्यं विचिन्त्य बुद्ध्या विचार्य, वचसामन्ते मुनिवाक्यानामन्ते, मङ्गलालङ्कृतां सुतां, दूर्वाधारणादीनि मङ्गलानि। सुताम् आददे हस्तेन गृहीतवान् ।। ८७ ।।

एहि विश्वात्मने वत्से भिक्षासि परिकल्पिता।
अर्थिनो मुनयः प्राप्तं गृहमेधिफलं मया।। ८८ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एहीति। हे वत्से, त्वमेहि त्वमागच्छ। त्वं विश्वात्मने सर्वात्मने शिवाय, भिक्षा परिकल्पिता। अत्र भिक्षाग्रहीतुरसन्निधानात् कथं स्यादित्याह - अर्थिने शिवाय कन्याभिक्षार्थिनो मुनयः। अनेन भिक्षादानेन गृहमेधिफलं प्राप्तम्। गृहमेधी गृहस्थः स्यात् इति भोजः।

गृहस्थः श्रद्धया दद्याद् भिक्षां भिक्षार्थिने सदा।

भिक्षामददतः पुंसो गार्हस्थ्यं निष्फलं भवेत्।। इति स्मृतिः।

अतो मया भिक्षादानाद् गार्हस्थ्यफलं प्राप्तमित्यभिप्रायः।। ८८ ।।

एतावदुक्त्वा तनयामृषीनाह महीधरः।

इयं नमति वः सर्वांस्त्रिलोचनवधूरिति।। ८९ ।।

एतावदिति। महीधरः तनयामेतावदुक्त्वा महीधरः ऋषीनाह - मया समर्पितत्वात् कार्यस्य सिद्धत्वनिश्चयाय इयं मम तनया त्रिलोचनवधूरिति वः सर्वान् नमति। रुद्रपत्न्यहं भोः अभिवादयामीति युष्मान् वदति। नमस्करोतीत्यर्थः।। ८९ ।।

ईप्सितार्थक्रियोदारं तेऽभिनन्द्य गिरेर्वचः।

आशीर्भिरेधयमासुः पुरःपाकाभिरम्बिकाम्।। ९० ।।

ईप्सितेति। ईप्सितार्थकरण उदारं औदार्ययुक्तम्। अर्थिभ्यः प्रार्थितार्थानां आशुदानमुदारता इति भोजेन भावदीपिकायामुक्तम्। गिरेर्वचः वचनं, अभिनन्द्य सन्तोषं कृत्वा, ते मुनयः पुरःपाकाभिः भविष्यत्फलाभिः, अम्बिकां आशीर्भिः आशीर्वादैरेधयामासुर्वर्धयामासुः। सन्तोषे सति शरीरस्य विकासो जायते।।९०।।

तां प्रणामादरस्त्रस्तजाम्बूनदवतंसकाम्।

अङ्कमारोपयामास लज्जमानामरुन्धती।। ९१ ।।

तामिति। सादरः प्रणामः प्रणामादरः, तेन स्रस्तो निपतितो जाम्बूनदवतंसः शेखरपष्पमाला च, यस्याः ताम्। अवतंसो वतंसश्च मूर्ध्निस्थः पुष्पशेखरः इति भोजः। आसन्नविवाहत्वात् लज्जमानां तामरुन्धती वसिष्ठपत्नी अङ्कमारोपयामास।। ९१ ।।

तन्मातरं चाश्रुमुखीं दुहितृस्नेहविक्लवाम्।

वरस्यानन्यपूर्वस्य विशोकामकरोद् गुणैः।। ९२ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तदिति। अश्रुमुखीं दुहितृस्नेहविक्लवां दुहिता मे दूरीभविष्यतीति तत्स्नेहाद् धैर्यहीनाम्। अत एव गलद्बाष्पक्लिन्नमुखी इत्यर्थः। एवम्भूतां तां मातरं मेनां, सारुन्धती, अनन्यपूर्वस्य अन्या पूर्वं न विद्यते यस्य स तथा। तस्य वरस्य गुणैः कीर्त्यमानैः तत्तद्गुणैः विशोकामकरोत्।। ९२ ।।

वैवाहिकीं तिथिं पृष्टास्तत्क्षणं हरबन्धुना।

ते त्र्यहादूर्ध्वमाख्याय चेरुश्चीरपरिग्रहाः।। ९३ ।।

वैवाहिकीमिति। वैवाहिकीं विवाहयोग्यां, तिथिं हरबन्धुना भविष्यता हरश्वशुरेण, हिमवता विवाहयोग्यं विशिष्टदिनं कदा स्यादिति पृष्टाः चीरपरिग्रहाः वल्कलवसना मुनयः, तां तिथिं त्र्यहादूर्ध्वं इतश्चतुर्थेऽह्नि, इत्याख्याय चेरुः तस्माज्जग्मुः। चर गतिभक्षणयोरिति धातुः।। ९३ ।।

ते हिमालयमामन्त्र्य पुनः प्राप्य च शूलिनम्।

सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः।। ९४ ।।

ते इति। हिमालयमामन्त्र्य आपृच्छ्य, पुनः शूलिनं प्रेक्ष्य च, तस्मै शूलिने, तदर्थं प्रयोजनं, सिद्धं फलितमिति निवेद्य विज्ञाप्य च, ततः तद्विसृष्टाः तेन अनुज्ञापिताः, खं आकाशं, उद्ययुः। तेषां ज्योतिर्गणत्वात् ज्योतिर्ग्रहत्वं प्राप्ताः इत्यर्थः।। ९४ ।।

पशुपतिरपि तान्यहानि कृच्छ्राद्

अगमयद्द्रिसुतासमागमोत्कः।

कमपरमवशं न विप्रकुर्यु-

र्विभुमपि तं यदमी स्पृशन्ति भावाः।। ९५ ।।

पशुपतिरिति। ब्रह्मादितृणान्ताश्चेतनाः पशवः। तथा चोक्तं शैवागमे -

ब्रह्मादयो जगति जीवगणाश्च सर्वे

मायाविमोहतधियः पशवः प्रदिष्टाः।

तेषामभूदधिपतिः शिव एक एव

तस्माद् विदुः पशुपतिं परमेश्वरं तम्।। इति।

तथाभूतः शिवोऽपि तान्यहानि कृच्छ्राद् अगमयत्। कृच्छ्रहेतुमाह, अद्रिसुतायाः समागमे उत्कः उत्सुकः सन्, तानि त्रीणि दिनानि कथमप्यतिवाहितवान्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विषयाणां सामर्थ्यं दर्शयति - कमित्यादि। अमी भावाः औत्सुक्यादयः अवशं अस्वतन्त्रं विषयासक्तमनसं, तस्माद् विभोरन्यं कं न पुरुषं विप्रकुर्युः न बाधेरन्। यद् यस्मात्, तं विभुमपि अमी भावाः स्पृशन्ति, स्वतन्त्रमीश्वरमपि बाधन्ते। तस्माद् अन्येषु का कथेति भावः।

पुष्पिताग्राख्यमर्धसमवृत्तमिदम्।। ९५ ।।

कुमारसम्भवस्यास्मिन् व्याख्याने गुणवानयम्।
षष्ठः सर्गः समाप्तोऽभूद् विद्यमाधवनिर्मिते।।

इति विद्यामाधवीये कुमारसम्भवव्याख्याने षष्ठः सर्गः।। श्रीः।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गौरीविवाहः

अथ तद्विवाहमनुक्रमेण वर्णयितुमुपक्रमते -

अथौषधीनामधिपस्य वृद्धौ तिथौ च जामित्रगुणान्वितायाम्।
समेतबन्धुर्हिमवान् सुताया विवाहदीक्षाविधिमन्वतिष्ठत्।। १ ।।

अथेत्यादि। अथ तदनन्तरं, त्र्यहानन्तरम्। ओषधीनामधिपस्य चन्द्रस्य वृद्धौ। पूर्वपक्ष इत्यर्थः। उदगयने आपूर्यमाणपक्षे विवाहोपनयन चौलादिकं कुर्यादिति गृह्यम्(बो.गृ.सू.२.१)। जामित्रगुणान्वितायां तिथौ। जामित्रगुणः जामित्रशुद्धिः। जामित्रमिति सप्तमस्थानस्य संज्ञा। तदुक्तं मुहूर्त्तदर्शने (१.१२) - जामित्रास्तकलत्रमन्मथमदद्यूनाभिधं सप्तमम् इति।

ननु लग्नस्यैव जामित्रशुद्धिः ज्योतिश्शास्त्रोक्ता(मुहूर्तदीपिका पुटसंख्या १७४) -

षण्णां प्रयोगसमये खलु सप्तमादि-
स्थानेषु षट्सु परिशुद्धिमुशन्ति सन्तः ।
वैवाहिकोपनयचौलनवान्नभुक्ति-
मौलिक्रियाभवनवृत्तिरिति क्रमेण।। इति।

तत् कथमत्र तिथौ जामित्रगुण उच्यते इति चेद्, अत्र ब्रूमः। सत्यमेतद्। जामित्रगुणान्वितायामित्यत्रापि लग्नस्यैव जामित्रगुणोऽभिप्रेतः। जामित्रशुद्धिमल्लग्नगुणान्वितायामित्यर्थः। शुद्धिमल्लग्नस्य लोपः कृतः। शाकपार्थिवादित्वाद् मध्यमपदलोपी समासः।

उत्तरायणगे सूर्ये पूर्वपक्षस्तु शुद्धिमत्।
लग्नं शुभग्रहक्षेत्रं शुभयुक्तं शुभेक्षितम्।
त्रिषडायाश्रितं क्रूरमुद्वाहे शुभदं स्मृतम्।।

इत्याद्यात्रेयेणोक्ता लग्नगुणाः। तद्युक्तायां तिथौ समेतबन्धुः बन्धुसहितः हिमवान् सुताया विवाहदीक्षाविधिमन्वतिष्ठत्। विवाहदीक्षा विवाहोपनयनं विवाहसम्पादनम्। तस्य विधिस्तदर्थकर्तव्यदेवताराधनादिः। पुरालङ्करणादीन् अनुष्ठितवान् कृतवान्। दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेष्विति (सिद्धान्त

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कौमुदी पुटसंख्या १९१) धातोराङ्प्रत्यये कृते दीक्षापदं स्यात्।

अथवा स्त्रीणां विवाहमेवोपनयनम्। तथा च मनुः(२.६७) -

वैवाहिको विधिः स्त्रीणामौपनायनिकं स्मृतम्।। इति।

तनौ च जामित्रगुणान्वितायामिति केषाञ्चित्पाठः। तनुरिति लग्नस्य संज्ञा। होरायाम्(१.१५) - होरादयस्तनुकुटुम्बसहोत्थबन्धु ... इत्यादिना लग्नादिराशीनां संज्ञा वराहमिहिरेणोक्ता। इन्द्रवज्रोपेन्द्रवज्रोपजातिवृत्तेन अयं सर्गो विरच्यते।। १ ।।

वैवाहिकैः कौतुकसंविधानैः गृहे गृहे व्यग्रपुरन्ध्रिवर्गम्।

आसीत् पुरं सानुमतोऽनुरागाद् अन्तःपुरं चैककुलोपमेयम्।।२।।

वैवाहिकैरिति। वैवाहिकैः विवाहार्थैः। कौतुकसंविधानैः। कौतूहले मङ्गले च कौतुकमिति भोजः। स्नानकुसुमवसनालङ्कारमङ्गलोपकरणसम्पादनैः। करणे हेतौ वा तृतीया। तैः गृहे गृहे प्रतिगृहम्। व्यग्रपुरन्ध्रिवर्गम् व्याकुलस्त्रीसंघम्।

स्यात् पुरन्ध्री पुरस्त्री च पतिपुत्रवती वधूः इति भोजः।

व्यग्रस्तु विगताग्रे स्यात् व्यापृताकुलयोरपि

इति केशवस्वामी। एवम्भूतं सानुमतो गिरेः पुरं अन्तःपुरञ्च अनुरागात् सन्तोषाद्। एकपुरोपमेयमासीत्। एककुलोपमेयमासीद्वा। कुलशब्देनात्र गृहं वा गृह्यते। सर्वगृहं एकगृहमिवाभूदित्यर्थः। एकवंशजमिवासीदिति वार्थः ।। २ ।।

सन्तानकाकीर्णमहापथं तच्चीनांशुकैः कल्पितकेतुमालम्।

भासोज्ज्वलत्काञ्चनतोरणाङ्कं स्थानान्तरं स्वर्ग इवावभासे।। ३ ।।

सन्तानकेति। सन्तानकाकीर्णमहापथं सन्तानकानि सन्तानकाख्य देवतरुकुसुमानि, तैराकीर्णो महापथो राजमार्गो यत्र तत्। तथा चीनांशुकैः। चीनाख्यो जनपदविशेषः। तत्र निर्मितैरंशुकैः वस्त्रैः। कल्पित केतुमालम्। कल्पिता विरचिता केतुमाला पताका यत्र तत्। तथा भासा उज्ज्वलत्काञ्चनतोरणाङ्कम्। दीप्त्या ज्वलत्काञ्चनतोरणाङ्कम्। एवम्भूतं तत् गिरिपुरम्। स्थानान्तरं मेरुशृङ्गादन्यत्र स्थाने स्थितः स्वर्ग इव आबभासे। पताकातोरणरथ्याकुसुमविकिरणादीनि मङ्गल्यानि कृतानि इत्यभिप्रायः।। ३ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एकेव सत्यामपि पुत्रपङ्क्तौ चिरस्य दृष्टेव मृतोत्थितेव।
उपोढपाणिग्रहणेति पित्रोः उमा विशिष्टोच्छ्वसिता बभूव।। ४ ।।

एकेवेति। पुत्रपङ्क्तौ सत्यामपि बहुषु पुत्रेषु सत्स्वपि। एकेव एका कन्या यथातिप्रिया भवति, तद्वत् चिरस्य दृष्टेव आसन्नकाल एव दृष्टा चिरकालादृष्टेव। मृतोत्थितेव कदाचित् गतप्राणा पुनः प्राप्तजीवनेव। उपोढपाणिग्रहणा आसन्नविवाहेति हेतोः। इति हेतौ। उमा उक्तोपमानवत् पित्रोर्विशिष्टोच्छ्वसिता बभूव। अधिकलालितातिप्रियाऽभूदित्यर्थः।। ४ ।।

अङ्काद् ययावङ्कमुदीरिताशीः सा मण्डनान्मण्डनमन्वभुङ्क्त।
सम्बन्धिभिन्नोऽपि गिरेः कुलस्य स्नेहस्तदेकायनतां जगाम।। ५ ।।

अङ्कादिति। बन्धुभिः उदीरिताशीः प्रयुक्ताशीर्वादा सा बन्धूनाम् अङ्काद् अङ्कं ययौ। तां सर्वेऽप्यङ्कमारोपयामासुरित्यर्थः। सा मण्डनात् मण्डनं अन्वभुङ्क्त। एकया कृतं मण्डनं भूषणमनुभूय पुनरन्यया कृतं मण्डनमनुबभूव इत्यर्थः। सम्बन्धिभिन्नोऽपि। सम्बन्धिनः पुत्रादयः। तैर्भिन्नोऽपि विभक्तोऽपि, गिरेः कुलस्य स्नेहः तदेकायनतां जगाम। एकशब्दः प्रधानार्थः। मुख्यान्यकेवलेष्वेक इति। सैव मुख्यमयनमाधारो यस्य सः तदेकायनः। तस्य भावस्तत्ता, तां प्राप्तः। पुत्रादविभक्तस्तत्स्नेह उमानामैकमाधारं प्राप्तवानित्यर्थः। अत्र नूनमित्युत्प्रेक्षाव्यञ्जकं अव्यय पदमप्यध्याहार्यम्।। ५ ।।

मैत्रे मुहूर्ते शशलाञ्छनेन योगं गतासूत्तरफल्गुनीषु।
तस्याः शरीरे प्रतिकर्म चक्रुर्बन्धुस्त्रियो याः पतिपुत्रवत्यः।। ६ ।।

मैत्रइति। मुहूर्तो नाडिकाद्वयम्। सूर्योदयात् तृतीयो मुहूर्तो मैत्रः। रौद्रः सार्पस्तथा मैत्र इति ज्यौतिषम्।(भारद्वाजः, मुहूर्तदीपिकापुटः २७१ -

रौद्रः सार्पस्तथा मैत्रः पैत्रो वासव एव च।
आप्यो वैश्यस्तथा ब्राह्मप्राजेशैन्द्राग्नमुच्यते।।
ऐन्द्रोऽथ नैरृतश्चैव वारुणार्यमणौ तथा।
भाग्यश्चैव दिवा ज्ञेया मुहूर्ता दश पञ्च च।।)

उत्तराफल्गुनीषु। फल्गुनीप्रोष्ठपदानाञ्च नक्षत्रे (पा.सू. १.२.६०) इति बहुवचनम्। उत्तराफल्गुनीसंज्ञासु तारासु। शशलाञ्छनेन चन्द्रेण। उत्तराफल्गुनीषु योगं गतासु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सतीषु। चन्द्रे उत्तरफल्गुनीयोगं प्राप्ते। उत्तर फल्गुनीनक्षत्र इत्यर्थः। याः पतिपुत्रवत्यः पतिषु पुत्रवत्यः पुरस्त्रियः। तासामेव मङ्गलकर्मयोग्यत्वात्। ता एवम्भूताः बन्धुस्त्रियः उत्तरफल्गुनी नक्षत्रे मैत्रे मुहूर्ते तस्याः शरीरे प्रतिकर्म चक्रुरित्यन्वयः। नखशोधनादिकं शरीरप्रतिकर्म। अथवा शरीरालङ्करणम् इति।

आकल्पवेषौ नेपथ्यं प्रतिकर्म प्रसाधनम् (२.६.९९) इत्यमरः।

स्थिरोर्ध्वमुखतारा सा मित्रक्षेत्रगता च या।

विवाहे शुभदात्यर्थं तस्मादुत्तरफल्गुनी।।

इति गौतमवचनम् ।। ६ ।।

सा गौरसिद्धार्थनिवेशवद्भिर्दूर्वाप्रवालैः प्रतिभिन्नभागम्।

निर्नीविकौशेयमुपात्तबाणमभ्यङ्गनेपथ्यमलञ्चकार।। ७ ।।

सा गौरेति। गौराणां सिद्धार्थानां सर्षपाणां निवेशो योगः तद्युक्तैः दूर्वाप्रवालैः श्वेतसर्षपयुक्तैः दूर्वाङ्कुरैः प्रतिभिन्नभागं प्रतिभिन्नाङ्गसम्बन्धम्।

भागः प्रदेशे शकले भागधेये च कथ्यते

इति शाश्वतकोशः।

मङ्गल्यानि दधि-क्षौद्र-दूर्वा-धवलसर्षपाः।

शङ्खो धवलपुष्पञ्च पूर्णकुम्भः सदर्पणः।।

इति। निर्नीविकौशेयं निर्गतनीवीबन्धनं नीवीबन्धेन रहितं कौशेयं क्षौमवसनं यत्र तत् तथा। विवाहात् पूर्वं कन्याभिर्वसने नीवीबन्धो न क्रियते। तदनेन दर्शितम्। उपात्तबाणम्, रक्षार्थं गृहीतशरम्। ब्राह्मण क्षत्रियकन्याभ्यां शरो गृहीतव्यः। तथा बौधायनगृह्ये(१.२.१२) - इषुहस्तां वधूं समीक्षत इति।

शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया।

वासोदशा शूद्रया तु (वर्णोत्कृष्टस्य वेदने।।)

इति मनुवचनञ्च(३.४४) अत्र गृह्यते। एवम्भूतमभ्यङ्गनेपथ्यं साऽ लञ्चकार। अभ्यङ्गस्य तैलाभ्यञ्जनस्याङ्गभूतं नेपथ्यं प्रसाधनमलञ्चकार। मण्डनस्यापि मण्डनमभूदित्यर्थः। सर्वेषामप्याभरणानां तदङ्गसङ्गादेव अलङ्कारः स्यात्, अन्यथा नेत्यभिप्रायेणैवमुक्तम्। तत्तदाभरणस्थानेषु मङ्गलार्थं पूर्वं दूर्वासितसर्षपेषु क्षिप्तेषु ततः सा स्नानोन्मुखी तत्र तत्र योग्यानि आभरणानि गृहीतवतीति भावः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रसाधनं स्यान्नेपथ्यं गृहे देहे च भूभृताम्

इति भोजः। वचनबलात् केचिदस्यार्थान्तरमाचक्षते - श्वेतसिद्धार्थयुक्तैः दूर्वाङ्कुरैः सम्बन्धान्तरालप्रदेशः। मूल्ये च कथ्यते नीवीति निर्नीवि कौशेयं मूल्यरहित कौशेयं, स्नानानन्तरपरिधानार्थं विन्यस्तानर्घ्यवस्त्रमित्यर्थः। दीक्षानन्तरं ग्रहणार्थमुपात्तबाणं विन्यस्तशरमित्यर्थः। एवम्भूतमभ्यङ्गनैपथ्यं मण्डनार्थं कल्पितं गृहं साऽलञ्चकार। तैलाभ्यङ्गशालां सा प्रविवेशेत्यर्थः। अस्याः प्रवेश एतस्या अलङ्कार इति।। ७ ।।

द्वितीयस्यार्थस्य साधनार्थं शरग्रहणं पश्चादाचष्टे -

बभौ च सम्बन्धमुपेत्य बाला नवेन दीक्षाविधिसायकेन।

करेण भानोर्बहुलावसाने सन्धुक्ष्यमाणेव शशाङ्करेखा।। ८ ।।

बभाविति। नवेन दीक्षाविधिसायकेन विवाहदीक्षाविहितग्रहणेन शरेण च सम्बन्धं सम्पर्कमुपेत्य सा बाला बभौ। शरग्रहणं च सा कृतवती। तेन बभौ। बहुलावसाने। बहुलः कृष्णपक्षः स्यादिति भोजः। कृष्णपक्षावसाने पूर्वपक्षप्रतिपदीत्यर्थः। भानोः करेण सन्धुक्ष्यमाणा सन्दीप्यमाना संवर्ध्यमाना वा शशाङ्कलेखेव। सन्धुक्षणोद्दीपने च वर्धने दहनेऽपि च इति भोजः। पूर्वपक्षद्वितीयायां चन्द्रकला भास्करेण सम्पर्काद् यथा शोभते तद्वद् विवाहदीक्षाशरसम्पर्कात् सा बभावित्यर्थः। तत्कलायाः संवर्धनञ्च सूर्यादेव भवति। तदुक्तं साम्बेन (साम्बपञ्चाशिका श्लो.३५) -

सौषुम्नेन त्वममृतपथेनेत्य शीतांशुभावमित्यादि।। ८ ।।

तां लोध्रकल्केन हृताङ्गतैलामाश्यानकालेयकृताङ्गरागाम्।

वासो वसानामभिषेकयोग्यं नार्यश्चतुष्काभिमुखं व्यनैषुः।। ९ ।।

तामिति। पूर्वं कृततैलाभ्यङ्गां अथ लोध्रकल्केन हृताङ्गतैलाम्। आश्यानेति। आश्यानमीषदार्द्रं स्याद् इति भोजः।

कालेयं कुङ्कुमं केचिद् केचिद् यावकमूचिरे

इति। आश्यानकुङ्कुमरसकृताङ्गरागां ईषदार्द्रयावकरसकृतानुलेपनामिति वा स्नानात् प्रागङ्गरागकरणं लोध्रकल्करौक्ष्यपरिहारार्थमुक्तम्। अभिषेकयोग्यं वासो वसानाम्। एवम्भूतां तां नार्यः चतुष्काभिमुखं व्यनैषुः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रतिष्ठितचतुस्तम्भचतुष्कं स्नानमण्डपम्

इति स्नापनाय स्नानमण्डपाभिमुखीं नीतवत्य इत्यर्थः।। ९ ।।

विन्यस्तवैदूर्यशिलातलेऽस्मिन् आबद्धमुक्ताफलभक्तिचित्रे।

आवर्जिताष्टापदकुम्भतोयैः सतूर्यमेनां स्नपयाम्बभूवुः।। १० ।।

विन्यस्तेति। विन्यस्तरोचनवैडूर्यपूर्वमयशिलातले। आबद्धेति मुक्ताफलैरेव सम्पादितभक्तिरचनाशोभे अस्मिन् चतुष्के तं नार्यः। सतूर्यं मङ्गलवादित्रशब्दैः सह आवर्जिताष्टापदकुम्भतोयैः स्नावितसुवर्णकलशजलैः एनां उमां स्नपयाम्बभूवुः स्नानं कारितवत्यः। ष्णादेर्मत्वर्थाद् ह्रस्वः। स्वर्णमष्टापदं हैममिति भोजः।। १० ।।

सा मङ्गलस्नानविशुद्धगात्री गृहीतपत्युद्गमनीयवस्त्रा।

निवृत्तपर्जन्यजलाभिषेका प्रफुल्लकाशा वसुधेव रेजे।। ११ ।।

सेति। सा मङ्गलस्नानविशुद्धगात्री सत्युद्गमनीयवस्त्रा मङ्गलार्थ स्नानेन विशुद्धगात्री निर्मलाङ्गी। पत्युः वरस्य उद्गमनीयवस्त्रं धौतवस्त्रम्। धौतमुद्गमनीयं स्यात् इति हलायुधः(२.३९६)। अमरसिंहेनात्र विशेष उक्तः(२.६.११२) -

तत् स्याद् उद्गमनीयं यद् धौतयोर्वस्त्रयोर्युगम्

इति। तद् गृहीतवती सा रेजे। निवृत्तपर्जन्यजलाभिषेका। पर्जन्यो मेघः। निवृत्तमेघजलाभिषेका शरदि प्रफुल्लकाशा विकसितकाशकुसुमा वसुधेव भूमिर्यथा राजते तद्वत्। अत्र काशवस्त्रयोरुपमा।। ११ ।।

तस्मात् प्रदेशाच्च वितानवन्तं युक्तं मणिस्तम्भचतुष्टयेन।

पतिव्रताभिः परिगृह्य निन्ये क्लृप्तासनं कौतुकवेदिमध्यम्।। १२ ।।

तस्मादिति। सा तस्मात् प्रदेशात् स्थानात् प्रतिव्रताभिः ताभिः स्त्रीभिः परिगृह्य आदाय स्नेहादरविशेषात् करे संस्पृश्येत्यर्थः। आबद्धवितानमणिमय स्तम्भचतुष्टयेन युक्तं कल्प्तासनं कौतुकवेदिमध्यं निन्ये नीता। यत्र मङ्गलानि आभरणान्यामुच्यन्ते, सा कौतुकवेदिः। तन्मध्यं तदन्तरालम्। अयमभिप्रायः - तस्मात् स्नानप्रदेशात् तामादाय नार्यः कौतुकवेद्यन्तरालं नीतवत्य इति।। १२ ।।

तां प्राङ्मुखीं तत्र निवेश्य तन्वीं क्षणं व्यलम्बन्त पुरो निषण्णाः।

भूतार्थशोभाह्रियमाणनेत्राः प्रसाधने सन्निहितेऽपि नार्यः।। १३ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तामिति। तत्र कौतुकवेदिमध्ये निहितासने तन्वीं भद्रां तां प्राङ्मुखीं निवेश्य, मङ्गल्यकार्येषु प्राङ्मुखोपवेशनमिष्टम्। मङ्गल्ये प्राङ्मुखो भवेदिति। तस्याः पुरो निषण्णास्ता नार्यः प्रसाधने सन्निहितेऽपि सर्वस्मिन् आभरणे पुरस्ताद् आनीतेऽपि क्षणं व्यळम्बन्त, विळम्बं अकुर्वन्। कुत इत्यत आह - भूतेति। अर्थः प्रयोजनं अलङ्कारफलम्। भूतः स्वयमेव जातः। स्वाभाविक इत्यर्थः। भूतार्थशोभानां अङ्गानां भूतार्थशोभया स्वाभाविकशोभया ह्रियमाणनेत्राः। अस्याः अङ्गानां भूषणैः विनापि स्वाभाविकी तत्कान्तिः सम्पन्ना। भूषणामोचन-क्लेशोऽस्माभिः वृथा लभ्यते इति लज्जया आह्रियमाणनेत्रा इवेत्यर्थः। अथवा आह्रियमाणनेत्रा इति पदं स्यात्। आङ्-उपसर्गेण लज्जार्थो द्योत्यते। आह्रियमाण नेत्रा अपि लज्जमानलोचना इवेत्यर्थः। अथवा भूतार्थोऽर्थभूता। वाहिताग्न्यादिषु (पा.सू.२.२.३७) इत्यत्र आहिताग्न्यादेः आकृतिगणत्वाद् अग्न्याहितशब्दवत् भूतार्थशब्देऽपि द्रष्टव्यः। अर्थभूता भूषणफलभूता शोभा भूतार्थशोभा, तयेत्यर्थः। आह्रियमाणनेत्राः। एतेषां रमणीयत्वात् चक्षुर्मनोहरत्वं अनेनोक्तम्।। १३ ।।

धूपोष्मणा त्याजितमार्द्रभावं केशान्तमन्तःकुसुमं तदीयम्।
पर्याक्षिपत् काचिदुदारबन्धं दूर्वावता पाण्डुमधूकदाम्ना।। १४ ।।

धूपेति। धूपस्योष्मणा औष्ण्येन आर्द्रभावं आर्द्रत्वं त्याजितम् परिहारितम्। निराकृतार्द्रत्वमित्यर्थः। अन्तःकुसुमम् अन्तर्मध्ये कुसुमानि विद्यन्ते यस्य तम्। अथवा अन्तःकुसुमं कुसुमगर्भितम्। कृत्वेत्यर्थः। एवम्भूतं तदीयं केशान्तं केशकलापं काचिद् दूर्वावता पाण्डुमधूकदाम्ना उदारबन्धं पर्याक्षिपत् वेष्टयामास। केशान्तमित्यत्रान्तशब्दः स्वरूपवचनः।

अन्तः स्वरूपे पर्यन्ते मृते मध्यावसानयोः

इति भोजः। उदारबन्धमिति क्रियाविशेषणं वा। उदारो विदग्धो बन्धो बन्धन प्रकारो यस्य इति केशान्तविशेषणं वा। पाण्डुशब्दो वर्णोत्कर्षद्योतकः। दूर्वा युक्तेन श्वेतमधूकपुष्पदाम्ना। मधूकपुष्पमालयेत्यर्थः। दूर्वामधूकधारणं विवाहे मङ्गल्यार्थम्।। १४ ।।

प्रसन्नशुक्लागुरु चक्रुरङ्गं गोरोचनापत्रविभक्तमस्याः।
सा चक्रवाकाङ्कितसैकतायास्त्रिस्रोतसः कान्तिमतीत्य तस्थौ ।। १५ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रसन्नेति। ताः स्त्रियः प्रसन्नशुक्लागरु प्रसन्नं प्रकर्षेण गतम्। षद्लृ विशरणगत्यवसादनेषु इति धातोः निष्ठान्तमेतत् पदम्। सर्वाङ्गव्याप्तं शुक्लागरु यस्य तत्। अस्या अङ्गं शरीरं गोरोचनापत्रविभक्तं चक्रुः। अरुणैर्गोरोचनाविरचितैः पत्रैः विभक्तं संयुक्तमकुर्वन्। तथाभूता सा चक्रेति। अरुणवर्णैश्चक्रवाकैर्लक्षितपुलिनायाः स्वाभाव्यात् श्वेतायाः त्रिस्रोतसः गङ्गायाः कान्तिमतीत्य तस्थौ शोभां विजित्यावस्थिता ।। १५ ।।

लग्नद्विरेफं परिभूय पद्मं समेघलेशं शशिनश्च बिम्बम्।
तदाननश्रीरलकैः प्रसिद्धैश्चिच्छेद सादृश्यकथाप्रसङ्गम्।। १६ ।।

लग्नेति। लग्नद्विरेफं आसक्तभृङ्गं पद्मं परिभूय समेघलेशं मेघखण्ड सहितं शशिनो बिम्बं च परिभूय विजित्य, तदाननश्रीः तस्या मुखश्रीः, प्रसिद्धैश्चूर्णकुसुमाद्यलङ्कृतैरलकैः सादृश्यकथाप्रसङ्गं, चिच्छेद चिक्षेप। उपमा-वार्ताप्रस्तावमपनिनाय। मुखस्य पद्मचन्द्रयोरुपमा क्रियते। अलकानां भृङ्गैर्मेघलेशेन च नीलत्वात् सादृश्यमस्ति। तेषां पराजितत्वाद् अन्यैः मुखस्य सादृश्यं नास्ति इति तयोरर्थयोर्द्वयोः प्रसङ्गाद् तद्वार्तायाः प्रसङ्ग एव नाभूदित्यभिप्रायः।। १६ ।।

कर्णार्पितो लोध्रकषायरूक्षे गोरोचनाभेदनितान्तगौरे।
तस्याः कपोले परभागलाभाद् बबन्ध चक्षूंषि यवप्ररोहः।।१७।।

कर्णेति। लोध्रकषायरूक्षे लोध्रकषायजनितौष्ण्ये। लोध्रकषायरूष इति केषाञ्चित् पाठः। लोध्रकषायेण रूषणं रूषः विद्यते यस्य तस्मिन्। पदातिरन्तर्गिरिरेणुरूषित इति भारविप्रयोगः(१.३४)। रूषणं भावना। श्वेतलोध्रकषायावृत इत्यर्थः। गोरोचनेति रोचनाया भेदः सम्भेदः सम्बन्धः। तेन नितान्तगौरे अत्यन्तारुणे तस्याः कपोले परभागलाभात् वर्णोत्कर्षसिद्धेः। कर्णार्पितो मङ्गलार्थं कर्णे निवेशितो यवप्ररोहः यवाङ्कुर श्चक्षूंषि बबन्ध। दर्शनीयत्वात् कपोले लोकस्य नेत्राणि निरुद्धवान्। तत् कपोलस्थाने वाकरोदित्यर्थः। परभागो गुणोत्कर्षः इति यादवः (५.२.३) ।। १७ ।।

रेखाविभक्तः सुविभक्तगात्र्याः किञ्चिन्मधूच्छिष्टविमृष्टरागः।
कामप्यभिख्यां स्फुरितैरपुष्यदासन्नलावण्यफलोधरोष्ठः।। १८ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

रेखेति। रेखाकारेण विभक्तसन्निवेश इत्यर्थः। मधूच्छिष्टेति। मधूच्छिष्टं सिक्थकम्। तेन किञ्चित् विमृष्टः अपनीतो रागो यस्य स तथा। ओष्ठयोरलङ्कारं दत्त्वा ताम्बूलमुपयुज्य सिक्थगुलिकया ताडयेदिति क्रमः। सुविभक्तगात्र्या अन्यगात्रेभ्यः व्यतिरिक्तं विशिष्टशोभं गात्रं यस्याः सा तथा। तस्याः आसन्नलावण्यफलं प्रियोपभोगलक्षणं यस्य स तथा। स्फुरितैः स्फुरणैः। एवम्भूतः तस्या अधरः स्फुरणैः कामप्यनिर्वचनीयाम् अभिख्यां शोभामपुष्यत्। पुष्टामकरोदित्यर्थः ।। १८ ।।

पत्युः शिरश्चन्द्रकलामनेन स्पृशेति सख्या परिहासपूर्वम्।
सा रञ्जयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं जघान।। १९ ।।

पत्युरिति। चरणौ अलक्तकरसेन रञ्जयित्वा अनेन पत्युः शिरश्चन्द्रकलां स्पृशेति परिहासपूर्वं सख्या कृताशीः सा तां सखीं निर्वचनं माल्येन जघान इत्यन्वयः। चरणौ रञ्जयित्वेत्युक्त्वा आभ्यामिति वक्तव्ये समनन्तररञ्जितश्चरणोऽत्र गृह्यते । अनेन वामचरणेनेत्यर्थः । चन्द्रकलां चन्द्रकलापि रक्ता। तां स्पृश अभिभवेत्यर्थः। केचिद् अन्यथा व्याचक्षते - अनेन कराग्रेण हरशिरश्चन्द्रकलां अभिभवेति। अयमभिप्रायः - मानापनोदाय पादमूले प्रणतस्य हरस्य शिरश्चन्द्रकलायाः स्पर्शो भविष्यति। अतः शम्भोः पत्नी भवेत्याशीर्वादं सखी कृतवतीति। निर्वचनमिति क्रियाविशेषणम्। तद्वचनस्य प्रियत्वात् किञ्चिद् अनुक्त्वेत्यर्थः। अनेन लज्जावहित्थहर्षेर्ष्यासाध्वससौभाग्याभि मानादिः यद्यपि ध्वन्यते, तथापि निर्वचनशब्दार्थस्य कुमारीजनोचितत्व प्रदर्शकत्वात् सा शृङ्गाराङ्गतां एतीति। माल्येन करधृतेन लीलारविन्देनेत्यर्थः।। १९ ।।

तस्याः सुजातोत्पलपत्रकान्ते प्रसाधिकाभिर्नयने निरीक्ष्य।
न चक्षुषोः कान्तिविशेषबुद्ध्या कालाञ्जनं मङ्गलमित्युपात्तम्।। २० ।।

तस्या इति। तस्याः सुजातं सुष्ठु जातम्। जलपङ्कादिसम्पत्त्या प्राप्तसम्पत्तिकमित्यर्थः। सुजातकुवलयदलवत्कान्ते मनोहरे स्निग्धनीले इत्यर्थः। एवम्भूते तस्या नयने समीक्ष्य प्रसाधिकाभिरलङ्कर्त्रीभिः स्त्रीभिः कालाञ्जनं कज्जलं मङ्गलं शुभं इति मङ्गलमिदमवश्यं कर्त्तव्यमिति हेतोः उपात्तं स्वीकृतम्। चक्षुषोः कान्तिविशेषबुद्ध्या न, अस्मिन् निक्षिप्ते चक्षुषः कान्तिविशेषः स्यादिति बुद्ध्या

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नोपात्तम्। तयोरञ्जनेन विनापि नीलत्वस्य स्वाभाविकत्वात् मङ्गलार्थमेव कज्ज्ञलमुपात्तमिति। अत्र विभावनालङ्कारो द्योतितः(सरस्वतीकण्ठाभरणम् ३.९ -

प्रसिद्धहेतुव्यावृत्त्या यत्किञ्चित् कारणान्तरम्।
यत्र स्वाभाविकत्वं च भाव्यते सा विभावना।। (पुटः ३१८) इति।
कालाञ्जनं दीपमषी कज्ज्ञलं योषिदञ्जनमिति भोजः।। २० ।।

सा सम्भवद्भिः कुसुमैर्लतेव ज्योतिर्भिरुद्यद्भिरिव त्रियामा।
सरिद् विहङ्गैरिव लीयमानैरामुच्यमानाभरणा चकाशे।। २१ ।।

सेति। आमुच्यमानाभरणा सा गौरी हेमनीतैराभरणैः चकाशे अशोभत। तत्रोपमात्रयमाह - सम्भवद्भिरुत्पद्यमानैर्विकसद्भिर्वा कुसुमैः लतेव। लता यथा शोभते, तद्वत्। उद्यद्भिरुदीयमानैः ज्योतिर्भिः ग्रहनक्षत्रादिभिः त्रियामेव रजनी यथा। लीयमानैराश्लिष्यद्भिः आसक्तिं प्राप्नुवद्भिः विहङ्गैः चक्रवाकादिपङ्क्तिभिः सरिदिव, नदी यथा। तथा सा भूषणैश्चकाशे इति। अत्र आमुच्यमानाभरणैरिति केषाञ्चित्पाठः। स एव ग्राह्यः। तस्मिन्नुपमानसाम्यं स्यादिति। सा मुच्यमानैराभरणैश्चकाश इति योगः।। २१ ।।

आत्मानमालोक्य च शोभमानमादर्शबिम्बे स्तिमितायताक्षम्।
हरोपयाने त्वरिता बभूव स्त्रीणां प्रियालोकफलो हि वेषः।। २२।।

आत्मानमिति। चशब्दोऽथार्थः। अथ भूषणैः शोभमानं आत्मानं स्वदेहं आदर्शबिम्बे दर्पणमण्डले आलोक्य। स्तिमितायताक्षमिति क्रिया विशेषणम्। स्तिमिते निमेषपरित्यागात् निश्चले आयते सन्तोषविशेषात् प्रसारिते चाक्षीणि यथा भवतः तथात्मानमालोक्य चाथानन्तरमेव वा वरोपयानत्वरितमनसा स्वभर्तुरुपगमनवेगयुक्ता बभूव। त्वरिता उत्सुका इति केचिद् व्याचक्षते। हि यस्मात् स्त्रीणां वेषोऽलङ्कारः प्रियालोकफलो भवति। प्रियेण कृत आलोकः प्रियालोकः। स एव फलं यस्य स तथा। स्त्रीणामलङ्करणं प्रियेण दृष्टञ्चेत् सफलं भवतीत्यभिप्रायः ।। २२ ।।

अथाङ्गुलिभ्यां हरितालमार्द्रं माङ्गल्यमादाय मनःशिलां च।
कर्णावसक्तामलदन्तपत्रं माता तदीयं मुखमुन्निनाय।। २३ ।।

अथेति। अथ तस्या माता मेना तदीयं मुखं कर्णावसक्तामलदन्त पत्रं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कृत्वा उन्निनाय। विवाहात् पूर्वं कन्यकानां धवलगजदन्तनिर्मितं कुण्डलधारणमेव युक्तमिति तथा कृत्वा मुखमुन्निनाय इति केचित् व्याचक्षते । पुष्पमेव कर्णावसक्तं सितदन्तपत्रमिति केचिदाहुः। अङ्गुलीभ्यां दक्षिणहस्ताङ्गुलीभ्यां आर्द्रं पङ्कीकृतं हरितालं माङ्गल्यं मङ्गलार्थं हरितालं एकाङ्गुल्या आर्द्रां मङ्गल्यां मनःशिलाञ्च मनःशिलाकल्कञ्च अन्यया अङ्गुल्या आदाय सङ्गृह्य तिलकरचनार्थं तन्मुखमुद्धृतवती। तच्चिबुकं वामहस्तेन उत्थितवतीत्यभिप्रायः।। २३ ।।

तन्मुखमुन्नीय किं कृतवतीत्यत आह -

उमास्तनोद्भेदमनुप्रवृद्धो मनोरथो यः प्रथमं बभूव।

तमेव मेना दुहितुः कथञ्चिद् विवाहदीक्षातिलकं चकार।। २४।।

उमेति। उमायाः स्तनोद्भेदमनुप्रवृद्धः स्तनोद्गमनेन सहाभिवृद्धं स्तनोद्गमनकालमारभ्येत्यर्थः। तदादिप्रवृद्धोऽयं प्रथमं पूर्वो मनोरथो बभूव। मनोरथविषय एवासीत्। उमाया यौवने प्राप्ते विवाहाय तिलकं करिष्यामीति पूर्वं मेनाया मनोरथः येनावस्थितोऽभूत् तमेव विवाहदीक्षातिलकमेव विवाहदीक्षायां कर्त्तव्यं तिलकमेव मेना कथञ्चिद्दिष्ट्या प्राप्तं चकार। तिलकं विरचितवतीत्यर्थः।। २४।।

तिलकरचनानन्तरं हस्तसूत्रबन्धनञ्च स्वयमेव कृतवतीत्याह -

बबन्ध चास्राकुलदृष्टिरस्याः स्थानान्तरेऽतर्कितसन्निवेशम्।

धात्र्यङ्गुलीभिः प्रतिसार्यमाणमूर्णामयं कौतुकहस्तसूत्रम्।। २५ ।।

बबन्धेत्यादि। आस्राकुलदृष्टिः। बाष्पमश्रु तथास्रञ्चेति भोजः। आनन्दोत्पन्नेनाश्रुणा व्याकुलदृष्टिः सती मेना ऊर्णामयं ऊर्णनाभितन्तु विरचितम्। उमायाः कौतुकहस्तसूत्रं विवाहे बन्धनीयं मङ्गल्यं हस्तसूत्रं स्थानान्तरे बन्धनस्थानाद् अन्यत्र स्थाने बबन्ध च। अतर्कितसन्निवेशं हर्षपरवशत्वाद् आकुलदृष्टित्वाच्चानिरूपितबन्धनस्थानमित्यर्थः। अत एव धात्र्यङ्गुलीभिः प्रतिसार्यमाणं स्थानं प्रत्यानीयमानम्। एवम्भूतं ऊर्णसूत्रमयं विवाहमङ्गलहस्तसूत्रं तस्या मातैव बबन्धेति सम्बन्धः।। २५ ।।

क्षीरोदवेलेव सफेनपुञ्जा पर्याप्तचन्द्रेव शरत्त्रियामा।

नवं नवक्षौमनिवासिनी सा भूयो बभौ दर्पणमादधाना।। २६ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्षीरोदेति। सफेनपुञ्जा राशीभूतं फेनपुञ्जम्, तेन सहिता क्षीरोदवेलेव क्षीरसमुद्रस्य वेला यथा शोभते तद्वत्। पर्याप्तचन्द्रा परिपूर्णचन्द्रमण्डलयुता, शरत्त्रियामेव शरत्कालरात्रिरिव। नवक्षौम निवासिनी नवक्षौमवस्त्रपरिधानयुक्ता। नवं दर्पणमादधाना सा भूयो बभौ नितरामशोभत। चन्द्रयुक्तरात्र्याः फेनपुञ्जयोः दर्पणेन साम्यम्।। २६ ।।

तामञ्चिताभ्यः कुलदेवताभ्यः कुलप्रतिष्ठां प्रणमय्य माता।

अकारयत् कारयितव्यदक्षा क्रमेण पादग्रहणं सतीनाम्।। २७ ।।

तामिति। अञ्चिताभ्यः पूजिताभ्यः कुलदेवताभ्यः लक्ष्मीदुर्गादिभ्यः स्वकुलपारम्पर्यपूजनीयाभ्यः कुलप्रतिष्ठां स्वकुलस्य संरक्षिणीमित्यर्थः। तां प्रणमय्य प्रणामावलिभिः कुलदेवताभ्यो नमस्कारयित्वा अथ कारयितव्य- दक्षा कारयितव्ये प्रयोजने कुशला तन्माता क्रमेण यथावयो यथाभिजनं तथा तथा क्रमात् सतीनां पतिव्रतानां पादग्रहणमकारयत्। मेना प्रथमं कुलदेवताराधनं, ततस्ताभ्यः नमस्कारं, ततः सतीनां पादप्रणामञ्च तां कारयामासेत्यर्थः।। २७।।

तया गृहीतपादास्ताः कथमाशीर्वादमकुर्वन्नित्यत आह -

अखण्डितं प्रेम लभस्व पत्युरित्युच्यते ताभिरुमा स्म नम्रा।

तया तु तस्यार्धशरीरभाजा पराकृताः स्निग्धजनाशिषोऽपि ।। २८ ।।

अखण्डितमिति। अखण्डितमन्ययानुपात्तांशं इत्यर्थः। त्वं अखण्डितं पत्युः प्रेम लभस्व प्राप्नुहीति नम्रा पादाग्रप्रणता उमा ताभिरुच्यते स्म। सोक्ता, तां सत्यः तस्या इत्थमाशीर्वादं अकुर्वन् इति अभिप्रायः। तुशब्दो विशेषार्थः। देव्या रूपयौवनवैदग्ध्यशीलसौभाग्यादि- गुणसम्पद् विशेषतया गौर्याः तस्याः पत्युरर्धशरीरलाभात् शरीरार्धग्रहणात् प्रेमलाभपराः स्निग्धस्त्रीजनाशिषः स्निग्धस्त्रीजनाशीर्वादाः पराकृताः अधरीकृताः। प्रेमलाभाच्छरीरार्धलाभस्य विशिष्टत्वात् तदाशीर्वादाद् अतिक्रान्ता इत्यर्थः। अपिशब्देन तदाशिषामेव अतिभूम्यगौणीत्वं द्योतते।। २८ ।।

न केवलं मातैव, पितापि तस्याः कारयितव्यं सर्वमकारयदित्याह -

इच्छाविभूत्योरनुरूपमद्रिस्तस्याः कृती कृत्यमशेषयित्वा।

सभ्यः सभायां सुहृदास्थितायां तस्थौ वृषाङ्कागमनप्रतीक्षः।। २९ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इच्छेति। इच्छाविभूत्योः इच्छाया अनुरूपं विभूतेरैश्वर्यानुरूपं विवाहोचितं तस्याः कृत्यं कार्यं अशेषयित्वा पश्चात् कार्यतया अस्थापयित्वा। सर्वमपि कृत्वेत्यर्थः। कृती कुशलः, सभ्यः सभापतित्व योग्यः, अद्रिः हिमवान्, सुहृदास्थितायां सुहृद्भिरधिष्ठितायां, सभायां वृषाङ्कागमनं वृषभध्वजस्य हरस्यागमनं, प्रतीक्ष्य तस्थौ। वरस्य हरस्यागमनं प्रतीक्षमाणः सभामध्ये सुहृद्भिः सह सन्निविष्टवानित्यर्थः।। २९ ।।

अथ शम्भोरपि वरभूषणधारणप्रकार उच्यते तावदित्यादिभिः षड्भिः श्लोकैः -

तावद् भवस्यापि कुबेरशैले तत् पूर्वपाणिग्रहणानुरूपम्।
प्रसाधनं मातृभिरादृताभिर्न्यस्तं पुरस्तात् पुरशासनस्य।। ३० ।।

तावदिति। तावदित्यव्ययम्। यावता कालेन गौर्याः प्रसाधनं कृतं तावता कालेन हरेणापि प्रसाधनं कृतमित्यभिप्रायेणाह तावदिति। कुबेरशैले कैलासे भवस्य शम्भोरपि पुरस्तात् तत्पूर्वपाणिग्रहणानुरूपं तस्य तदानीं प्रथमविवाहानुरूपं प्रसाधनमलङ्करणजातं आदृताभिः आदरणयुक्ताभिः मातृभिः ब्रह्माण्यादिभिः अष्टाभिः मातृभिर्न्यस्तं भवस्य पुरस्तात् स्थापितम्। पुरशासनेत्यनुप्रासार्थं विशेषणम्।। ३० ।।

तद्गौरवान्मङ्गलमण्डनश्रीः सा पस्पृशे केवलमीश्वरेण।
स्वमेव वेषः परिणेतुरिष्टं भावान्तरं तस्य विभोः प्रपेदे।। ३१ ।।

तदिति। तद्गौरवात् तासु मातृकासु गौरवात्, सा ताभिः पुरो निहिता, मङ्गलमण्डनश्रीः मङ्गलार्था भूषणसम्पदा अलङ्कारसंहतिरीश्वरेण केवलं पस्पृशे स्पृष्टमात्रैव। तत्तत्स्थानेषु न निदधे। तर्हि भूषणानि किमासन् इत्यत आह - स्वमेवेति। तस्येश्वरस्य स्वमेव वपुः परिणेतुर्वरस्य इष्टमपेक्षितं वेषं वेषतया जातम्। भावान्तरमन्यथा भवनं प्रपेदे। तत्तद्भूषणमासीदित्यर्थः।। ३१ ।।

तदेव प्रपञ्चयति -

बभूव भस्मैव सिताङ्गरागः कपालमेवामलशेखरश्रि।
उपान्तभागेषु च रोचनाङ्को गजाजिनस्यैव दुकूलभावः।। ३२ ।।

बभूवेत्यादि। भस्मैव सिताङ्गरागो बभूव धवलमनुलेपनमासीत्। मूर्ध्नि धृतं कपालमेवामलशेखरश्रि बभूव। अमलस्य शेखरस्य श्रीर्विद्यते यस्य तत्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तथा। नपुंसकत्वात् ह्रस्वत्वम्। शम्भुना धृतस्य गजाजिनस्यैव दुकूलभावो बभूव। दुकूलत्वं वस्त्रत्वमासीत्। तस्य वस्त्रस्य उपान्तभागेषु पर्यन्तभागेषु पर्यन्तप्रदेशेषु रोचनाङ्कश्च आसीत्। गोरोचनादिकृतो हंसादिलक्षणाङ्कश्चासीद् इत्यर्थः। पर्यन्तप्रदेशयोः गोरोचनालिखितं हंसादि लक्षणम्। गजचर्मैव वस्त्रमभूदित्यर्थः।। ३२ ।।

शङ्खान्तरद्योति विलोचनं यदन्तर्निविष्टामलपिङ्गतारम्।

सान्निध्यपक्षे हरितालमय्यास्तदेव जातं तिलकक्रियायाः।। ३३ ।।

शङ्खेति। शङ्खो निधिललाटास्थ्नीति भोजः। शङ्खान्तरे ललाटास्थिमध्ये द्योतत इति। तथा यद् विलोचनं शम्भोरस्ति तस्य विशेषणमाह अन्तरिति। नेत्रस्यान्तर्निविष्टोऽनलोऽग्निवत्पिङ्गः पिङ्गलो रागः कान्ति- विशेषो यस्य तत्तथा। अन्तर्निविष्टानलपिङ्गलाभमिति केषाञ्चित्पाठः। अन्तर्निविष्टेनानलेन इव पिङ्गला आभा प्रभा कान्तिर्यस्य तत्तथा। शङ्खो निधिः ललाटास्थ्नीति भोजः। शङ्खो भालास्थिमर्मणोरिति केशवः(१३०१)। एवम्भूतं शम्भोर्यत्तृतीयं नेत्रमस्ति तदेव ललाटमध्ये कार्यायाः तथा हरितालमय्यास्तिलकक्रियायास्सान्निध्यपक्षे जातमित्यन्वयः। पक्षस्सहाये मासार्धे साध्यपार्श्वगरुत्मसु इति भोजः। सान्निध्यं संनिधानम्। तत्पक्षे सहायत्वेऽभूत् सान्निध्यसाधकमासीत्। ललाटे हरितालतिलकमासीद् इत्यभिप्रायः। हरितालतिलकमप्यग्निवत् पिङ्गलं भवतीति।। ३३ ।।

यथाप्रदेशं भुजगेश्वराणां करिष्यतामाभरणान्तरत्वम्।

शरीरमात्रं विकृतिं प्रपेदे तथैव तस्थुः फणरत्नशोभाः।। ३४ ।।

यथेति। यथाप्रदेशमित्यत्र वीप्साभिप्रेता। स्वस्वप्रदेशेष्वित्यर्थः। आभरणान्तरत्वं तत्तत्स्थानोचितहाराद्यन्याभरणत्वं गमिष्यताम्। आभरणानां भविष्यत्वं भुजगेश्वराणां सर्पेन्द्राणां शरीरमात्रं विकृतिं अन्यथात्वं प्रपेदे। फणरत्नशोभाः तथैव पूर्ववदेव तस्थुः। तेन सर्पाभरणानां भासुरफणरत्नशोभा-पूरत्वमासीदिति भावः।। ३४ ।।

दिवापि निष्ठ्यूतमरीचिभासा बाल्यादनाविष्कृतलाञ्छनेन।

चन्द्रेण नित्यं प्रतिभिन्नमौलेश्चूडामणेः किं ग्रहणं हरस्य।। ३५ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दिवापीति। दिवा अपि निष्ठ्यूतमरीचिभासा निष्ठ्यूतैः निर्गच्छद्भिः मरीचिभिः किरणैः जाता शोभा विद्यते यस्य तेन। दिवापि सञ्जनितप्रतिहत-किरणसम्भावितशोभेनेत्यर्थः। बाल्यात् कलामूर्तित्वाद् अनाविष्कृतलाञ्छनेन अप्रकाशितकलङ्केन चन्द्रेण नित्यं प्रतिपन्नमौलेः संयोजितमकुटस्य हरस्य चूडामणेर्ग्रहणं किम्। अन्यचूडामणिग्रहण प्रयोजनं नास्तीत्यर्थः। अतः स चूडामणिं अन्यं न गृहीतवान्। चन्द्र एव तस्य चूडामणिरासीदित्यभिप्रायः। अत्र निष्ठ्यूतशब्दस्य नाग्राह्यत्वम्। निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयमिति तस्यानुमतत्वात्।। ३५ ।।

इत्यद्भुतैकप्रभवः प्रभावात् प्रसिद्धनेपथ्यविधेर्विधाता।
आत्मानमासन्नगणोपनीते टङ्के निषिक्तप्रतिमं ददर्श।। ३६ ।।

इतीति। अद्भुतैकप्रभवः सर्वेषामद्भुतानामेक एव निमित्तभूतः, प्रभावाद् आत्मसामर्थ्यात्, इतीत्थं, अशेषनेपथ्यविधेः सर्वालङ्कारकर्मणः, विधाता कर्त्ता, स हरः, आसन्नगणोपनीते आसन्नैः भूतगणैरुपनीते, टङ्के निर्मले परश्वधे, निषिक्तप्रतिमं आसक्तप्रतिबिम्बं, आत्मानं ददर्श। टङ्क एव तस्य दर्पणोऽभूदित्यर्थः। टङ्कः परश्वध इति भोजः।। ३६ ।।

स गोपतिं नन्दिभुजावलम्बी शार्दूलचर्मान्तरितोरुपृष्ठम्।
तद्भक्तिसंक्षिप्तबृहत्प्रमाणमारुह्य कैलासमिव प्रतस्थे।। ३७ ।।

स इति। नन्दिभुजावलम्बी अन्तर्द्वारपालस्य नन्दिकेश्वरस्य भुजं अवलम्बमानो गृह्णानः स शम्भुर्गोपतिमारुह्य प्रतस्थे। गोपतेर्विशेषणान्याह शार्दूलेति। व्याघ्रचर्मणाच्छादितं बृहत्पृष्ठदेशम्। तद्भक्तीति। शिवे भक्त्या सङ्कुचितमहायामपरिणाहं कैलासाद्रिवद् दृश्यमानं धवलत्वस्थौल्योन्नत्यादिगुणैः कैलाससमानं, वृषभराजमारुह्य प्रतस्थे प्रस्थितवान् ।। ३७ ।।

तं मातरो देवमनुव्रजन्त्यः स्ववाहनक्षोभचलावतंसाः।
मुखैः प्रभामण्डलरेणुसारैः पद्माकरं चक्रुरिवान्तरिक्षम्।। ३८ ।।

तमिति। तं देवमनुव्रजन्त्यः। स्ववाहनेति। हंसादिस्ववाहनानां क्षोभेण चलनेन, चलाः अवतंसाश्शेखरा यासां ताः। तथा एवम्भूता ब्राह्म्याद्या अष्टौ मातरः, प्रभामण्डलरेणुसारैः प्रभामण्डलं कान्तिसमूह एव रेणवः सारभूता येषां

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तैः। मुखेषु प्रभासमूहसारः। पद्मेषु परागाः सारभूताः। एवंभूतैः स्वकीयैर्मुखैः अन्तरिक्षं पद्माकरं चक्रुरिव। बहूनां पद्मानामावासः पद्माकरः। बहुभिः स्वमुखपद्मैराकाशं पद्माकरमिव दर्शयामासुरित्यर्थः।। ३८ ।।

तासां च पश्चात् कनकप्रभाणां काली कपालाभरणा चकासे।
बलाकिनी नीलपयोदराजी दूरं परिक्षिप्तशतह्रदेव।। ३९ ।।

तासामिति। तासां कनकप्रभाणां सुवर्णवर्णानां, मातृकाणां पश्चात् पृष्ठतो व्रजन्ती कपालाभरणा काली चकाशे, महाकाल्यपि शुशुभे। तस्या उपमामाह - बलाकिनी बलाकाख्यैश्च तैः पक्षिविशेषैः युक्ता। व्रीह्यदित्वादत इनिठनौ(पा.सू.५.२.१२५) इति मत्वर्थीय इनिः। दूरं परिक्षिप्तशतह्रदा दूरतः प्रसारितविद्युत्। एवंभूता नीलपयोदराजिः नीलवर्णा मेघमालेव सा यथा शोभते तद्वदत्र कपालानां बलाकानाञ्च साम्यं, सुवर्णवर्णमातॄणां तडितां साम्यं, काल्याः कृष्णमेघराजेरुपमा। तटिच्छतह्रदा विद्युदिति भोजः।। ३९ ।।

ततो गणैः शूलभृतः पुरोगैरुदीरितो मङ्गलतूर्यघोषः।
विमानशृङ्गाण्यवगाहमानः शशंस सेवावसरं सुरेभ्यः।। ४० ।।

तत इति। ततः अनन्तरं, शूलभृतः शम्भोः, पुरोगैः पुरस्तात् गच्छद्भिः, गणैः प्रमथैः, उदीरितः उत्थापितः, मङ्गलतूर्यघोषः विवाहमङ्गलार्थानां तूर्याणां वाद्यानां घोषः, विमानशृङ्गाण्यवगाहमानः प्रविशन् पूरयन्, स घोषः सुरेभ्यस्सेवावसरं शंशंस। देवानामयं सेवार्थमवसर इति शशंस शंसितवान्। सूचितवान् इत्यर्थः।। ४० ।।

तेनाज्ञापितसेवावसरास्तमेवं सेवन्ते इत्याह -

उपाददे तस्य सहस्ररश्मिस्त्वष्ट्रा नवं निर्मितमातपत्रम्।
स तद्दुकूलादविदूरमौलिर्बभौ पतद्गङ्ग इवोत्तमाङ्गे।। ४१ ।।

उपाददं इत्यादि। त्वष्ट्रा विश्वकर्मणा, नवनिर्मितमातपत्रं छत्रं, तस्य शिवस्य, सहस्ररश्मिरादित्यः, एवोपाददे उपात्तवान्। गृहीतवान् इत्यर्थः। तद्दुकूलाच्छत्रान्तः बद्धात् वलम्बमानात् सितवस्त्राद्, अविदूरमौलिः अदूरस्थितमौलिः। तच्छत्रवस्त्रसंस्पर्शितमकुट इत्यर्थः। एवंभूतस्स हर उत्तमाङ्गे मूर्ध्नि, पतद्गङ्ग इव तदानीं निपतज्जाह्नवीप्रवाह इव, बभौ। अत्र सितवस्त्रस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गङ्गानुरूपत्वं ज्ञेयम् ।। ४१ ।।

मूर्ते च गङ्गायमुने तदानीं सचामरे देवमसेविषाताम्।

समुद्रगारूपविपर्ययेऽपि सहंसपाते इव लक्ष्यमाणे।। ४२ ।।

मूर्ते इति। मूर्तियुक्ते गृहीतदेवस्त्रीशरीरे, गङ्गायमुने च सचामरे गृहीत-चामरे, भूत्वा तदानीं तं देवमसेविषाताम्। गङ्गायमुने अपि उभयपार्श्वयोः गते चामरं गृहीत्वा तमसेविषातामित्यर्थः। तदानीमुत्प्रेक्षते - समुद्रगारूपविपर्यये नदीरूपस्य व्यत्यासे, दिव्यस्त्रीरूपग्रहणेऽपि सहंसपाते इव चामराक्षेपस्य हंसपातानुरूपत्वात् हंसपातयुक्त इव लक्ष्यमाणे दृश्यमाने इतीयमुत्प्रेक्षा।। ४२।।

तमभ्यगच्छत् प्रथमो विधाता श्रीवत्सलक्ष्मा पुरुषश्च साक्षात्।

जयेति वाचा महिमानमस्य संवर्धयन्तौ हविषेव वह्निम्।। ४३ ।।

तमिति। प्रथमः सर्वेषामाद्यः, विधाता ब्रह्मा तं देवं अभ्यगच्छत्। तस्य समीपं प्राप्तवान्। श्रीवत्सलक्ष्मा श्रीवत्सलाञ्छनः पुरुषो विष्णुश्च साक्षाद् रूपान्तरव्यवधानरहितः स्वेनैव रूपेणाभ्यगच्छदित्यर्थः। जयेति वाचा, जयेति स्तुतिद्योतिन्या वाचास्य शम्भोर्महिमानं संवर्धयन्तौ। ब्रह्मणा विष्णुना च स्तूयमानत्वात् अस्य महिमातिशयो द्योत्यते। तस्य तावेव स्तोतारौ (स्तुति)कर्तारौ भवतः। हविषा वह्निमिव, हविषा यथाग्नेः संवर्धनं भवति, तद्वत् तस्य महिमानं स्तुत्या वर्धयन्तौ ब्रह्मा विष्णुश्च साक्षात् तमभ्यगच्छतामित्यर्थः। अत्र शिवस्यैव माहात्म्यं विशेषादुक्तम्।। ४३ ।।

तेन ब्रह्मविष्ण्वोः हीनत्वं किं न स्यादित्याशङ्क्य त्रिमूर्तीनां समत्वं दर्शयन्नाह -

एकैव मूर्तिर्बिभिदे त्रिधा सा सामान्यमेषां प्रथमावरत्वम्।

विष्णोर्हरस्तस्य हरिः कदाचिद् वेधास्तयोस्तावपि धातुराद्यौ।। ४४ ।।

एकैवेति। त्रिमूर्तिषु बुधो बुद्ध्या द्वेषहीनः समो भवेद् इत्यात्मनो बुधत्वञ्च दर्शयति। आदौ एकैव समरूपा मूर्तिरासीत्, गुणत्रयसम्भेदात्। सा मूर्तिः त्रिधा बिभिदे। त्रिधा ब्रह्मविष्णुशिवात्मना व्यस्ता भिन्नाभूत्। एषां ब्रह्मविष्णुशिवानां प्रथमावरत्वं सामान्यं समानम्। जन्मनः पूर्वापरत्वं समानमेव। न नियतम्। सामान्यं तु समानत्वे समानेऽपि क्वचिद् भवेद् इति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कौशिकः। सामान्योऽयं धर्मसेतुर्नराणाम्(स्कन्दपुराणम्, सेतुखण्डः) इति प्रयोगश्चास्ति। तत्सामान्यं श्रुत्यादिप्रसिद्धम्।

स ब्रह्मा स हरिः स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्

(महानारायणोपनिषत् ११.११) इति श्रुतिः। सामान्यमेव दर्शयति - विष्णोरित्यादि। कदाचिद् एकस्मिन् कल्पे विष्णोर्हरः आद्यः आदौ भवः। तस्य हरस्य कदाचित् कल्पे हरिराद्यः। कदाचिद् वेधा ब्रह्मा तयोराद्यः। कदाचित् तावपि तौ हरिहरौ अपि धातुराद्यौ भवतः। अतो न नियमः। ततः सामान्यं सिद्धम्। प्रक्षिप्तोऽयं श्लोक इति केचिदाहुः। अत्र काव्ये शिवस्य नायकस्योत्कर्षकथनस्य युक्तत्वात्। तथा हि भागवतादिषु विष्णोरेवोत्कर्षः साध्यते। लैङ्गपुराणादिषु शिवस्यैवेति एतच्छ्लोककरणेऽपि न कश्चिद् दोष इति ।। ४४ ।।

तं लोकपालाः पुरुहूतमुख्याः श्रीलक्षणोत्सर्गविनीतवेषाः।
दृष्टिप्रदाने कृतनन्दिसंज्ञास्तद्दर्शिताः प्राञ्जलयः प्रणेमुः।। ४५ ।।

तमिति। पुरुहूतमुख्याः इन्द्रादयः लोकपालाः, तं प्रणेमुः इत्यन्वयः। लोकपालानां विशेषणान्याह - श्रीलक्षणेति। श्रीलक्षणानि च्छत्रचामरवितानानुलेपनशेखरधारणकम्बलाध्यासनान्दोलिकादीनि। तेषां उत्सर्गेण त्यागेन विनीतः स्वामिदर्शनसमयसमुचितो वेषो येषां ते तथा। अथवा छत्रादिविसर्गो न विनीताकारः। प्रश्रयावनत्यादयः।

वेषप्रसाधनाकारपरिवेषाप्रवेष्टन इति

भोजः। दृष्टिप्रदाने देवस्य दृष्टिं दापयितुं कृता देवान्तरागमनेन नन्दिना संज्ञा हस्तादिसूचना येषां ते तथा। अथवा दृष्टिप्रदाने दर्शनं निमित्तमिति निमित्तसप्तमीयम्। भवतां देवदर्शनकालोऽयमिति नन्दिना सूचिता इत्यर्थः। तद्दर्शिताः तेन नन्दिना दर्शिताः प्राञ्जलयः कृताञ्जलिपुटाः एवम्भूता लोकपालास्तं शिवं ववन्दिरे इत्यर्थः।। ४५ ।।

तेषु प्राप्तेषु देवेषु शिवः कस्य कां सम्भावनां कृतवानित्याह -

कम्पेन मूर्ध्नः शतपत्रयोनिं वाचा हरिं वृत्रहणं स्मितेन।
आलोकमात्रेण सुरानशेषान् सम्भावयामास यथाप्रधानम्।। ४६ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कम्पेनेत्यादि। मूर्ध्नः कम्पेन - चलनेन, शतपत्रयोनिं - ब्रह्माणं, सम्भावयामास। मूर्ध्नः कम्पेन गौरवातिशयः सूचितः। हरिं विष्णुं वाचा। वाचेति गौरवाधिक्यं मित्रभावश्च दर्शितः। वृत्रहणमिन्द्रं स्मितेन। स्मितेनेति प्रसादो दर्शितः। अन्यानशेषान् सुरान् आलोकमात्रेण - निरीक्षणमात्रेण, यथाप्रधानं प्रधानभूतान् मुख्यान् अनतिलङ्घ्य मुख्यादिक्रमेण सम्भावयामास। अत्रालोकमात्रेणेति प्रतिपत्तिमात्रं द्योतितम्। तेषां तेषामुचितां प्रतिपत्तिं कृतवानित्यर्थः।। ४६ ।।

तस्मै जयाशीः ससृजे पुरस्तात् सप्तर्षिभिस्तान् स्मितपूर्वमाह।
विवाहयज्ञे विततेऽत्र यूयमध्वर्यवः पूर्ववृता मयेति।। ४७ ।।

तस्मा इति। तस्मै सप्तर्षिभिः पुरस्तात् पूर्वं, तस्मै शिवाय, जयाशीः जयत्यादिराशीर्वादः, ससृजे प्रयुक्तः। स देवश्च तान् सप्तर्षीन्, स्मितपूर्वं सस्मितमाह उक्तवान् । आहेति वर्तमाने विहितोऽप्यादेशो भूतार्थे बहुभिः प्रयुज्यते। आहेतीदं पदं भूतार्थे तिङ् प्रतिरूपमव्ययम् इति केचिदाचक्षते । विवाहेति - वितते सुविस्तारे, अस्मिन् मदीये विवाहयज्ञे, मया यूयमध्वर्यवः। अध्वर्युशब्दश्छत्रिलक्षणया प्रवर्तते। ये ते पूर्ववृताः पूर्वमेव वृता इति तानाहेति सम्बन्धः ।। ४७ ।।

विश्वावसुप्राग्रसरैः प्रवीणैः सङ्गीयमानस्त्रिपुरावदानः।
अध्वानमध्वान्तविकारलङ्घ्यस्ततार तारापतिखण्डधारी।। ४८।।

विश्वेति। विश्वावसुप्राग्रसरैः, विश्वावसुः प्राग्रसरः पुरस्सरो येषां तैः। विश्वावस्वादिभिरित्यर्थः। प्रवीणैः निपुणैः अथवा प्रकृष्टवीणैः। प्रकृष्टा वीणा विद्यन्ते येषां ते प्रवीणाः, तैः। उत्तमवीणाधरैरित्यर्थः। अत्र विश्वावसोः गन्धर्वराजत्वात् तत्पुरस्सरैरित्यनेन शब्देन प्रवीणत्वं व्यञ्जितम्।

स्याद् वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा(२.१)

इति काव्यप्रकाशे कथितम्। सङ्गीयमानत्रिपुरावदानः, सङ्गीयमानं त्रिपुरविषयं अवदानमद्भुतं कर्म यस्य सः। अत्र दहनादिशब्दस्य लोपः कृतः। त्रिपुरदहनादिकं अवदानं त्रिपुरावदानम्। शाकपार्थिवादित्वात् मध्यपदलोपी समासः। कर्माद्भुतमवदानमिति भोजः। विश्वावसुप्रभृतिभिर्गन्धर्वैः सम्यग्गीयमान

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

त्रिपुरदहनाद्यद्भुतपौरुष इत्यर्थः। अध्वान्तविकारलङ्घ्यः। क्षुब्धस्वान्त(पा.सू. ७.२.१८) इत्यादिना तमसि निपातितो ध्वान्तशब्दस्त्वविद्या- वाची लक्षणया भवति। अविद्याविकारेण लङ्घ्यो न भवतीत्यध्वान्तविकारलङ्घ्ये तारापति-खण्डधारी चन्द्रार्धचूडः। अनुप्रास विशेषार्थमिदं विशेषणद्वयम्। एवम्भूतस्स देवः अध्वानं ततार। हिमाद्रिपुरगमनार्थं मार्गं प्राप्तवानित्यर्थः। अत्र तरतिः प्राप्तावर्थे वर्तते।। ४८ ।।

वृषभवाहनो भगवान् वृषभेण विना किं गतवानित्याशङ्क्याह -

खे खेलगामी तमुवाह वाहः सशब्दचामीकरकिङ्किणीकः।

तटाभिघातादिव लग्नपङ्के धुन्वन् मुहुः प्रोतघने विषाणे।। ४९ ।।

खे इति। खेलगामी। खेला लीला च कूर्दनम्(अ.को.१.७.३३) इति स्त्रीलिङ्गपठितः खेलाशब्दो बालशब्दवत् पुंसि पठितः। खे नभसि लीलामन्थरगामीत्यर्थः। वाहः शिववाहनत्वेन प्रसिद्धो वृषभः तमुवाह। भगवान् वृषभराजमारुरोह इत्यभिप्रायः। वृषभस्य विशेषणान्तरमाह सशब्देति। सशब्दाः सुवर्णकिङ्किण्यो विद्यन्ते यस्य स तथा। नद्यृतश्च(५.४.१५३) इति किङ्किणीशब्दात् कप्रत्ययः। वाहस्य विशेषणान्तरमाह तटेति। तटाभिघाताद्, दृप्ता वृषा वप्रेषु शृङ्गाघातं कुर्वते। अयं तेषां स्वभावः। अतस्तटाभिघाताल्लग्नपङ्के आसक्तकर्दमे इव लक्ष्यमाणे प्रोतघने गगनप्रवेशात् प्रोतमेघे विषाणे उभेऽङ्गे मुहुर्मुहुर्धुन्वन् कम्पयन् एवम्भूतो वृषभः तमुवाहेति योगः।। ४९ ।।

स प्रापदप्राप्तपराभियोगं नगेन्द्रगुप्तं नगरं मुहूर्तात्।

पुरोपलब्धैर्हरदृष्टिपातैः सुवर्णसूत्रैरिव कृष्यमाणम्।। ५० ।।

स इति। स हिमवतः प्रतापातिशयाद् अप्राप्तपराभियोगम् अप्राप्तः पराभियोगः परेषां शत्रूणामभियोग उद्यमः अभिसम्बन्धो वा अप्राप्तो वा येन तत्परैरकृतजयोद्योगम् अप्राप्तशत्रुसम्बन्धं वा। नगेन्द्रगुप्तं नगेन्द्रेण गिरिराजेन रक्षितं, नगरं स देवो मुहूर्तात् प्रापत्, मुहूर्तात् कालतः प्राप्तवान्। प्रापद् इति आप्लृ व्याप्ताविति धातोर्लुङि लृदित्वात् पुषादिद्युताद्लृदितः परस्मैपदेषु (पा.सू. ३.१.५५) इति लुङि रूपम्। नगरस्योत्प्रेक्षानुबन्धं विशेषणान्तरमाह। पुर इत्यादि। पुरोपलब्धैः पुरस्ताद् अवसक्तैः पूर्वमेव प्रतीतैर्हरदृष्टिपातैः कपिलैः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भ्रूविलोचनैः हेतुभूतैः सुवर्ण सूत्रैरिव कृष्यमाणं अतिदूरस्थं अतिकानयनायाकृष्यमाणमिव। लक्ष्यमाणं इति केषाञ्चित्पाठः। लक्ष दर्शनाङ्कनयोरिति धातुः। सुवर्णसूत्रैः लक्ष्यमाणं इव। हरावलोकनानां कपिलत्वात् तत्सम्बन्धेन सुवर्णसूत्राङ्कितं इवाग्रे ऐश्वर्यविशेषप्रकटनार्थैस्तैः समन्तादकल्पितमिव भासमानमित्यर्थः।। ५० ।।

तस्योपकण्ठे घननीलकण्ठः कुतूहलादुन्मुखपौरदृष्टः।
स्ववाहचिह्नादवतीर्य मार्गादासन्नभूपृष्ठमियाय देवः।। ५१ ।।

तस्येति। पुरस्योपकण्ठे समीपे, घननीलकण्ठः सजलमेघवन्नीलकण्ठः, कुतूहलाद् औत्सुक्यात्, उन्मुखपौरदृष्टः ऊर्ध्वमुखैः पौरैः आलोकितः, सः देवः स्ववाहचिह्नात् स्ववाहो मेघः। कपर्दी मेघवाहन इति दर्शनात् पाठान्तरस्य, मेघवाहन इति प्रसिद्ध्या च, मेघचिह्नं यस्य स तथा। तस्मान्मेघो व्योम्नि चरति हि। ततस्तचिह्नत्वमाकाशस्य स्यात्। आकाशमार्गादवतीर्णः आसन्नभूपृष्ठं भूतलमासन्नं यथा भवति तथा गतवान्। गिरिपुरसमीपपर्यन्तमाकाशेन गत्वा तत्समीपे गगनादवतीर्य हिमवद्धामपर्यन्तं तत्पुरश्रियमवेक्षमाणः क्षितितलसमीपे व्योममार्गेणैव गतवानित्यभिप्रायः।

पुरा कदाचन मेघवाहनकल्पो भगवान् विष्णुः मेघो भूत्वा महेशमवहदिति पुराणे श्रूयते। तस्मादागमगर्भेयमुक्तिः।। ५१ ।।

तमृद्धिमद्बन्धुजनाधिरूढैर्वृन्दैर्गजानां गिरिचक्रवर्ती।
प्रत्युज्जगामागमनप्रतीतः प्रफुल्लवृक्षैः कटकैरिव स्वैः।। ५२ ।।

तमिति। ऋद्धिर्वस्त्राभरणादिसमृद्धिः, तद्युक्तः। बन्धुजनादिरूढैः बन्धूनां वृन्दैः, स गिरिचक्रवर्ती गिरिराजो हिमवान्, आगमनप्रतीतः तदागमनेन सन्तुष्टस्सन्, प्रत्युज्जगाम प्रत्युदियाय प्रत्युद्ययौ। प्रत्युत्थानं कृतवान्। प्रफुल्लवृक्षैः विकसितकुसुमद्रुमयुक्तैः, स्वैः कटकैः सानुभिरिवेति गजवृन्दानां कटकानाञ्च साम्यम्। ऋद्धिमद्बन्धुजनानां प्रफुल्लवृक्षाणाञ्च साम्यं द्रष्टव्यम् ।। ५२ ।।

वर्गावुभौ देवमहीधराणां द्वारे पुरस्योद्घटितापिधाने।
समीयतुर्दूरविसर्पिघोषौ भिन्नैकसेतू पयसामिवौघौ।। ५३ ।।

वर्गाविति। उद्घटितापिधाने उत्सारितकवाटे, पूर्वं स्वजन प्रवेशार्थं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

किञ्चिद्विवृते, तदानीं बहुजने प्रवेशार्थम् अतिविवृते, पुरस्य द्वारे देवमहीधराणाम् उभौ वर्गौ, देवानां वर्गः महीधराणां पर्वतानां वर्गश्च इत्युभौ वर्गौ, समीयतुः सङ्गतावभूताम्। दूरविसर्पिघोषौ दूरप्रापिजनघोषौ दूरव्यापितगजबृंहिततुरगहेषा-वादित्रादिघोषाविति वा। इदं वर्गविशेषणम्। भिन्नैकसेतू पयसामोघौ जलप्रवाहाविव। दूरविसर्पिघोषौ जलोघौ यथा सङ्गतौ भवतः तथेति। पुरद्वारे समतया सेतुरुपात्तः ।। ५३ ।।

ह्रीमानभूद् भूमिधरो हरेण त्रैलोक्यवन्द्येन कृतप्रणामः।
पूर्वं महिम्ना स हि तस्य दूरमावर्जितं नात्मशिरो विवेद।। ५४।।

ह्रीमानिति। त्रैलोक्यवन्द्येन हरेण गिरिः कृतप्रणामः कृतनमस्कारो भूमिधरो ह्रीमानभूत्। जगद्वन्द्यस्य हिमवतः नमस्काराङ्गीकरणं अत्यन्तं अनुचितं, तथापि श्वशुरत्वाद् वन्द्यत्वं युक्तम्। ततस्तादृशदुर्लभोपचार लाभात् लज्जायुक्तोऽभवत्। लज्जया तस्य महिमाभरणावर्जितमपि प्रणतशिरा अभवद् इत्यर्थः। पुरापि कैलासे दूरत उपस्थितस्यापि तस्य महिम्ना भरेणावलम्बितमानतमात्मशिरः स्वशृङ्गं, न विवेद न ज्ञातवान्।

अयमभिप्रायः। कैलासाख्ये स्वशृङ्गे निवसतस्तस्य भारेण पूर्वमेवानतं स्वशिरो नूनं न ज्ञातवानिव स शैलः। अन्तिकागतस्य लोकवन्द्यस्य प्रणामेन लज्जानतशिरा अभवदिति। हि यस्मात् न विवेद इति।। ५४ ।।

स प्रीतियोगाद् विकसन्मुखश्रीर्जामातुरग्रेसरतामुपेत्य।
प्रावेशयन्मन्दिरमृद्धमेनमागुल्फपादार्पितमार्गपुष्पम्।। ५५ ।।

स इति। प्रीतियोगात् प्रीतिसम्बन्धात्, विकसन्मुखश्रीः स शैलः जामातुः पुत्रीभर्तुः, अग्रेसरतामुपेत्य। अग्रेसरति गच्छतीत्यग्रेसरः, तस्य भावः, तथा। गुरुत्वाद्वा कन्यादानार्थं कर्मकरणाय वाग्रसरत्वं प्राप्य ह्येनं शिवं, मन्दिरं स्वगृहं, प्रावेशयत् प्रवेशयाञ्चकार। ऋद्धं गृहोपकरणसमृद्धि युक्तं इति। आगुल्फेति। गुल्फशब्देन जङ्घापादसन्धिरुच्यते। आपादगुल्फं गुल्फपर्यन्तमर्पितं, मार्गपुष्पं मार्गेऽवकीर्णं पुष्पं यत्र तदिति द्वयं मन्दिर विशेषणम् ।। ५५ ।।

तस्मिन् मुहूर्ते पुरकामिनीनामीशानसन्दर्शनलालसानाम्।
प्रासादमालासु बभूवुरित्थं त्यक्तान्यकार्याणि विचेष्टितानि।। ५६ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तस्मिन्निति। तस्मिन् मुहूर्ते काले, ईशानसन्दर्शनलालसानां हर सन्दर्शनोत्सुकानां, पुरकामिनीनां प्रासादमालासु त्यक्तान्यकार्याणि शिवदर्शनाद् अन्यानि कार्याणि त्यक्तानि येषां तानि, विचेष्टितानि प्रवृत्तयः, इत्थं वक्ष्यमाणप्रकारेण, बभूवुः।। ५६ ।।

आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः।
बन्धुं न सम्भावित एव तावत् करेण रुद्धोऽपि च केशहस्तः।। ५७।।

आलोकेति। आलोकमार्गं प्रासादे कल्पितमालोकनाय मार्गं प्रति, सहसा शीघ्रं, व्रजन्त्या कयाचित् केशहस्तः प्रस्रस्तकेशकलापः तावत् तदानीं बन्धुं न सम्भावित एव। बन्धुं न चिन्तित एवाभूदित्यर्थः। उद्वेष्टनवान्तमाल्यः उद्वेष्टने वान्तानि उद्गीर्णानि माल्यानि येन स तथा। करेण रुद्धोऽपि इति द्वयं केशहस्तविशेषणम्। अत्र विरोधद्योतनार्थं अपिशब्दः। करेण रुद्धोऽपि बन्धुमचिन्तित एवाभूद् इति विरोधः। केशबन्धने विलम्बो भविष्यतीति केशपाशमबध्वैव द्रुतं गतवतीत्यत्र परमार्थः। यथा कश्चित् बन्धनीयश्चोरादिः असज्ञनः उद्वेष्टनादुद्गीर्णान्त स्थिताहारः करेण रुद्धोऽपि बन्धुं न सम्भाव्यते तद्वदिति। अत्र केशहस्त इति केशात् परो हस्तशब्दः। पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे (२.६.९८) इत्यमरः।। ५७ ।।

प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद् द्रवरागमेव।
उत्सृष्टलीलागतिरा गवाक्षादलक्तकाङ्कां पदवीं ततान।। ५८ ।।

प्रसाधिकेति। काचिन्निक्षिप्यमाणालक्तकं द्रवरागं द्रवीभूतालक्तक रसमेव प्रसाधिकया नखाभरणालक्तकक्षेपादिप्रसाधनकृत्यया, आलम्बितं गृहीतं, अग्रपादं पादाग्रं, आक्षिप्य प्रसाधिकाहस्तात् आक्षिप्य, आगवाक्षात् उत्सृष्टलीलागतिः शीघ्रं हरदर्शनार्थं कृतशीघ्रगमनेत्यर्थः। अन्या युवतिः वातायनपर्यन्तां पदवीं अलक्तकाङ्कां ततान। तन्मार्गमध्यमलक्तकाञ्चितं अकरोत्।। ५८ ।।

विलोचनं दक्षिणमञ्जनेन सम्भाव्य तद्वञ्चितवामनेत्रा।
तथैव वातायनसन्निकर्षं ययौ शलाकामपरा वहन्ती।। ५९ ।।

विलोचनमिति। दक्षिणं विलोचनं, अञ्जनेन सम्भाव्य अञ्जनान्तं कृत्वा,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तद्वञ्चितवामनेत्रा तेनाञ्जनेन वञ्चितं असंयोजितं वामनेत्रं यया सा। अनञ्जितवामलोचनेत्यर्थः। शलाकां वहन्ती वामनेत्राञ्जनार्थं साञ्जनां शलाकां वहन्त्यपरा हरदर्शनार्थं तथैव वातायनसन्निकर्षं गवाक्षसमीपं ययौ।। ५९ ।।

जालान्तरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबन्ध नीवीम्।
नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलम्ब्य वामः।। ६० ।।

जालेति। जालान्तरप्रेषितदृष्टिः हरावलोकनार्थं जालान्तरे वातायनमध्ये प्रेषिता प्रहिता दृष्टिर्यया सा तथा। वातद्वारं गवाक्षं स्याज्जालं वातायनं तथा इति भोजः। प्रस्थानेति। प्रस्थानेन प्रयाणेन भिन्ना विस्रस्ता अकृतबन्धना नीवी यस्याः सा। एवम्भूतान्या योषित्। नाभीति। नाभिह्रदं प्रविष्टकङ्कणप्रभेण हस्तेन वासो वसनमवलम्ब्य तस्थौ। हरं निरीक्षमाणा गवाक्षसमीप एव स्थितवती।।६०

अर्धाचिता सत्वरमुत्थितायाः पदे पदे दुर्निमिते गलन्ती।
कस्याश्चिदासीद् रशना तदानीमङ्गुष्ठमूलार्पितसूत्रशेषा।। ६१ ।।

अर्धेति। हरागमनवाद्यशब्दं श्रुत्वा सत्वरं तूर्णमुत्थितायाः कस्याश्चिद् रशना अर्धाचिता अर्धप्रोतहेममणिरत्ना दुर्निमिते लीलापरित्यागात् समञ्जनिहिते पदे पदे गलन्ती गलन्मणिरत्ना सती कस्याश्चिद् रशना योषितः काञ्ची तदानीं अङ्गुष्ठमूलार्पितसूत्रशेषैवासीत्।। ६१ ।।

तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तराः सान्द्रकुतूहलानाम्।
विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन्।। ६२ ।।

तासामिति। तासां स्त्रीणां मुखैर्व्याप्तान्तराः गवाक्षाः सहस्रपत्रावरणाः। सहस्रपत्रं कमलं, तैरावरणमाच्छादनं, येषां ते तथा। पद्मसदृशैस्तन्मुखैर्व्याप्तमध्या गवाक्षाः पद्मावृता इवासन् इत्यर्थः। पद्मसाम्यमेव मुखानां विशेषणैर्दर्शयति - आसवगन्धगर्भैः मद्यगन्धाधरैः। विलोलनेत्र भ्रमरैः चञ्चलनेत्रभृङ्गैः इति, सान्द्रकुतूहलानाम् प्रभूतौत्सुक्यानां इति स्त्रीणां विशेषणम्।। ६२ ।।

तावत् पताकाकुलमिन्दुमौलिरुत्तोरणं राजपथं प्रपेदे।
प्रासाद शृङ्गाणि दिवापि कुर्वन् ज्योत्स्नाभिषेकद्विगुणद्युतीनि ।। ६३ ।।

तावदिति। यावदेवं स्त्रीचेष्टितान्यासन्, तावत् तावता कालेन, इन्दुमौलिः उत्तोरणं उद्यततोरणं, पताकाकुलं समन्तात् बद्धाभिः पताकाभिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वैजयन्तीभिः आकुलं उज्ज्वलम् । पताकोज्ज्वलमिति केषाञ्चित् पाठः। स हरः एवम्भूतं राजपथं प्रपेदे प्राप्तवान्। इन्दुमौलेः विशेषणमाह - प्रासादशृङ्गाणि दिवापि शिवप्रभावाद् ज्योत्स्नाभिषेकद्युगणद्युतीनि संपादयन्। अत्रेन्दुमौलीति पदं हेतुगर्भयुक्तम्।। ६३ ।।

तमेकदृश्यं नयनैः पिबन्त्यो नार्यो न जग्मुर्विषयान्तराणि।

तथा हि शेषेन्द्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा।। ६४ ।।

तमिति। एकदृश्यं दर्शनीयेषु एकं मुख्यम्। नयनैः पिबन्त्यः इति पानोपचारेण तृष्णातिशयो ध्वन्यते। तं विलोकमाना नार्यः विषयान्तराणि न जग्मुः। शब्दादीन् अन्यविषयान् न बुबुधिरे। गत्यर्था ज्ञानार्थाः। अत्र नयनैः जिह्वाधर्मभूतं पानमाहितमित्ययं समाधिः नाम गुणविशेषः।

रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी(१.५.७)

इत्यमरसिंहः। उक्तमेव प्रपञ्चयति तथाहीति। आसां शेषेन्द्रियवृत्तिः। श्रोत्राद्यन्येन्द्रियाणां वृत्तिः श्रवणादिव्यापारः। उपघातेन विना शक्तिविरोधं अन्तरेण, जडीबभूव कुण्ठितोऽभवत्। एवं श्रोत्रादीनां इन्द्रियाणां, शब्दादिषु विषयेषु, वृत्तिर्नियता हरस्वरूपदर्शनाय प्रवृत्ते चक्षुष्येव मनसः प्रवेशाद् अन्यविषयेषु अन्येन्द्रियप्रवृत्तिशक्तिः नाभूद् इत्यभिप्रायः।। ६४ ।।

अथ तासां तत्र स्तायमानस्य रताख्यशृङ्गारस्य बोधकान् वागारम्भानुभवान् वर्णयति स्थान इत्यादिश्लोकत्रयेण। तासामुक्तीराह -

स्थाने तपो दुश्चरमेतदर्थं अपर्णया पेलवयापि तप्तम्।

या दास्यमप्यस्य लभेत नारी सा स्यात् कृतार्था किमुताङ्कशय्याम्।।६५।।

स्थानइति। एतदर्थं एतस्य हरस्य भर्तृत्वेन प्राप्त्यर्थं, पेलवया मृदुशरीरयाप्यपर्णया पार्वत्या, दुश्चरं तपस्तप्तमिति यत्, तत् स्थाने युक्तमित्यर्थः। स्थान इति युक्तार्थवाचकमव्ययम्। यथोक्तं भोजराजेन -

युक्तार्थमव्ययं स्थाने सप्तमीप्रतिरूपकम्

इति। उक्तार्थमेव साधयति - या अस्य हरस्य, दास्यमपि दासीत्वमपि लभेत प्राप्नुयात्, सा नारी, कृतार्था धन्या स्यात्। या त्वङ्कशय्यां लभेत सा कृतकृत्या स्यादिति किमुत। किमु वक्तव्यम्। न वक्तव्यमेव। नात्र संशयः। किं वाच्यमेतद्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इत्यर्थं किमुतेत्येवमव्ययम् इति भोजः। एतदर्थमस्येति पदद्वयं पुरस्तात् साक्षाद् दृश्यमानस्य भगवतो निर्देशं अस्य विश्वेश्वरस्य सकलगुणविशिष्टस्य सदा स्मरणमपि कृतार्थत्वे हेतुः । दास्यं ततो विशिष्टम्। पत्नीत्वं तस्मादपि दुर्लभतममिति भावः।। ६५ ।।

परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजयिष्यत्।
अस्मिन् द्वये रूपविधानयत्नः पत्युः प्रजानां विफलोऽभविष्यत्।। ६६।।

(अस्य श्लोकस्य व्याख्या न दृश्यते।)

न नूनमारूढरुषा शरीरमनेन दग्धं कुसुमायुधस्य।
व्रीडादमुं देवमुदीक्ष्य मन्ये सन्न्यस्तदेहः स्वयमेव कामः।। ६७।।

न नूनमिति। आरूढरुषा जातकोपेन, अनेन कुसुमायुधस्य कामस्य, शरीरं न दग्धं नूनमिति इयमुत्प्रेक्षा। चारुशरीरमिमं देवं उदीक्ष्य दृष्ट्वा, व्रीडया लज्जया, कामः स्वयमेव संन्यस्तदेहः त्यक्तदेह इति मन्ये इत्युत्प्रेक्षे।

मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः।।

(काव्यादर्शः २.२३४) इति दण्डी। अयमभिप्रायः - कुपितेनानेन कामस्य शरीरं न दग्धं नूनम्। अतिरमणीयममुं दृष्ट्वा स्वदेहसौन्दर्याल्पत्वाज्ज्ञातया लज्ज्या कामः स्वशरीरं स्वयमेव त्यक्तवान् प्राय इति। व्रीलादिति पदम्। वामनसूत्रम्(५.४२) - अविधौ गुरोः स्त्रियां बहुलं विवक्षेति भावे भस्त्वं विवक्षितम्।। ६७ ।।

अनेन सम्बन्धमुपेत्य दिष्ट्या मनोरथप्रार्थितमीश्वरेण।
मूर्धानमालि क्षितिधारणोच्चमुच्चैस्तरं वक्ष्यति शैलराजः।। ६८ ।।

अनेनेति। अनेन ईश्वरेण सम्बन्धं दिष्ट्या दैवगत्या, अवाप्य लब्ध्वा, मनोरथप्रार्थितं मनसा चिरप्रार्थितमित्यर्थः। एतत्सम्बन्धविशेषणम्। चिराभिलषितं इति यावत्। चिरात् मनसा प्रार्थितं सम्बन्धं प्रापितः शैलराजः क्षितितलधराणां देवः, उन्नतं मूर्धानं उच्चैस्तरां अत्युन्नतं, वक्ष्यति धारयिष्यतीति। वक्ष्यतीति वहतेः भविष्यतीत्यर्थे स्यप्रत्यये लृटि रूपम्। हे आलि, हे सखीतीयं सखीं प्रति सख्या उक्तिः। अयमभिप्रायः - काचित् सखी सखीं प्रत्येवमाह। पूर्वं क्षितितलधारणाभिमानेन उन्नतं गिरेः शिर इदानीं परमेश्वरश्वशुरसम्बन्धलाभाद्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अत्युन्नतं भविष्यतीति। उच्चैस्तरामिति अव्ययादाम्र प्रकर्ष(पा.सू.२.४.८२) इत्यस्मादाप्रत्ययः।। ६८ ।।

इत्योषधिप्रस्थविलासिनीनां शृण्वन् कथाः श्रोत्रसुखास्त्रिनेत्रः।
केयूरचूर्णीकृतलाजमुष्टिः हिमालयस्यालयमाससाद।। ६९ ।।

इतीति। एवं ओषधिप्रस्थविलासिनीनां श्रोत्रसुखाः कथाः शृण्वन् तासां परस्परालापान् शृण्वन्, केयूरचूर्णीकृतलाजमुष्टिः पुराङ्गनाभिराक्षिप्यमाणा मङ्गलार्थं पुराङ्गना मुष्टीः गृहीत्वा आचारलाजान् लाजमुष्टीः प्रचलता केयूरेण अङ्गदेन, चूर्णीकृता येन स तथा। पुराङ्गनामुष्टिगृहीतान् स्वोपरि क्षिप्तान् लाजान् अङ्गदेन चूर्णीकुर्वन् इत्यर्थः। एवम्भूतः त्रिणेत्रः हिमालयस्यालयं आससाद। हिमगिरेः शृङ्गं प्रविष्टवान् ।

केयूरं बाहुवलयमङ्गदं बाहुभूषणमिति भोजः।।६९।।

ततोऽवतीर्याच्युतदत्तहस्तः शरद्घनाद् दीधितिमानिवोक्ष्णः।
क्रान्तानि पूर्वं कमलासनेन कक्ष्यान्तराण्यद्रिपतेर्विवेश।। ७० ।।

ततइति। ततः अनन्तरं, अच्युतदत्तहस्तः, यानाद् अवरोहणकाले करावलम्बनार्थं अच्युतेन हरिणा प्रसारितो हस्तो यस्य स तथा। प्रभूणां यानारोहणकाले अवरोहणकाले च अन्तिकस्थैः सखिभिः अवलम्बनाय हस्तः प्रसार्यते खलु। तस्मादिहापि सख्या हरिणा अवलम्बनार्थं दत्तकरेणेत्यर्थः। स हरः, उक्ष्णो वृषभराजाद्, अवतीर्य पूर्वं स्वस्तिमङ्गल्यानि पठता कमलासनेन सुज्येष्ठेन वृद्धेन ब्रह्मणा, क्रान्तानि प्रविष्टानि। अद्रिपतेर्हिमालयस्य कक्ष्यान्तराणि विवेश प्रविष्टवान्। शरद्घनाद् दीधितिमानिव। शरन्मेघात्सूर्यो यथावतरति तद्वत्। वृषभशरद्घनयोः श्वेतत्वेन सादृश्यमस्ति। केचित् सूर्येऽपि कक्ष्यान्तराणीति योजयन्ति। शरद्घनाद् अवतीर्य अद्रिपतेः उदयाचलस्य कक्ष्यान्तराणि सूर्यो यथा प्रविशति तद्वदिति। अशीत्युत्तरशतसंख्या कक्ष्या उदयाचले दक्षिणोत्तरा अवस्थिताः। तासु प्रतिदिनमेकैकस्यां सूर्यरथः प्रविश्य उदेति। तेन उत्तरायणदक्षिणायने भानोर्भवतः। तथा च विष्णुपुराणे (द्र.२.८) ।। ७० ।।

तमन्वगिन्द्रप्रमुखाश्च देवाः सप्तर्षिपूर्वाः परमर्षयश्च।
गणाश्च गिर्यालयमभ्यगच्छन् प्रशस्तमारम्भमिवोत्तमार्थाः।। ७१।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तत्रेश्वरो विष्टरभाग् यथावत् सरत्नमर्घ्यं मधुमच्च गव्यम्।
नवे दुकूले च नगोपनीतं प्रत्यग्रहीत् सर्वममन्त्रवर्जम्।। ७२ ।।

(श्लोकद्वयव्याख्या न लब्धा।)

दुकूलवासाः स वधूसमीपं निन्ये विनीतैरवरोधदक्षैः।
वेलासमीपं स्फुटफेनराजिर्नवैरुदन्वानिव चन्द्रपादैः।। ७३ ।।

दुकूलेति। विवाहयोग्यं धौतमहतमुत्तेजितं यद् वासो वसानः, स विनीतैः सप्रश्रयैः, साधुभिः अवरोधदक्षैः वृद्धकञ्चुकिभिः, वधूसमीपं निन्ये नीतः। स्फुटफेनराशिरुदन्वान् समुद्रः नवैः चन्द्रपादैः समुद्रजल वृद्धिकारिभिः नूतनैः उदयकालीनैश्चन्द्रांशुभिः वेलासमीपं नीतमिव। यथा नीयते तद्वद् दुकूलसादृश्यात् सफेनराशिपदमुक्तम्।। ७३ ।।

तया प्रवृद्धाननचन्द्रकान्त्या प्रफुल्लचक्षुःकुमुदः कुमार्या।
प्रसन्नचेतःसलिलः शिवोऽभूत् संसृज्यमानः शरदेव लोकः।। ७४ ।।

तयेति। प्रवृद्ध इति। प्रवृद्धमुखचन्द्रकान्त्या तया कुमार्या संसृज्यमानः प्रफुल्लचक्षुःकुमुदः शिवः प्रसन्नचेतःसलिलोऽभूत्। शरदा लोक इव प्रवृद्धचन्द्रकान्त्या शरदा संसृज्यमानः विकसितकुमुदेव लोकः यथा प्रसन्नसलिलो भवति तद्वदिति रूपसंसृष्टेयमुपमा। तया संयुज्यमानः शिवः शरदा संसृज्यमानलोक इवाभूदिति केचिद् योजयन्ति।। ७४ ।।

तयोः समापत्तिषु कातराणि किञ्चिद् व्यवस्थापितसंहृतानि।
ह्रीयन्त्रणां तत्क्षणमन्वभूवन् अन्योन्यलीलानि विलोचनानि।। ७५ ।।

तयोरिति। तत्र समापत्तिषु अन्योन्यदृष्टसमागमेषु सत्सु, कातराणि अधृष्टानि, तदानीमेव निर्वर्तितानि किञ्चिदिति दर्शनलालसया अन्योन्योपरि किञ्चिद्व्यवस्थापितानि निवेशितानि। ततस्संहृतानि अन्योन्यलोलानि। अन्योन्य-दर्शनसमुत्सुकानि इत्यर्थः। मध्यमपदलोपी समासः। एवम्भूतानि तयोर्वधूवरयो-र्विलोचनानि तत्क्षणं तस्मिन् क्षणे, ह्रीयन्त्रणां ह्रीयन्त्रितत्वं लज्जापारवश्यं अन्वभूवन् अनुबभूवुः। लज्जापारवश्यं प्राप्तवान् इत्यर्थः । आलोकनस्वभावो दमयन्तीस्वयंवरेऽप्युक्तः -

आपूर्णपातीन्यचिरस्थितीनि प्रतीक्षणासञ्जनसंहतानि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अपाङ्गानि प्रथमाभियोगे तयोरभूवन्नवलोकितानि।। इति ।

असकलपतितानां प्रेमविस्तारितानां प्रतिनयननिपाते किञ्चिदाकुञ्चितानाम् इत्यादिरवलोकितस्य भावो भवभूतिनापि मालतीमाधवीये दर्शितः।। ७५ ।।

तस्याः करं शैलगुरूपनीतं जग्राह ताम्राङ्गुलिमष्टमूर्तिः।

उमात्मना गूढतनोः स्मरस्य तच्छङ्किनः पूर्वमिव प्ररोहम् ।। ७६ ।।

तस्या इति। शैलगुरूपनीतं - गुरुणा पित्रा शैलेन, प्रदानार्थं अन्तिकानीतं ताम्राङ्गुलिं तस्याः करमष्टमूर्तिर्देवो जग्राह, स्वहस्तेन गृहीतवान्। अत्रोत्प्रेक्षते - उमात्मनेति। तच्छङ्किनः हराच्छङ्कायुक्तस्य, उमात्मना उमाशरीरेण, गूढतनोः छन्नमूर्तेः, स्मरस्य पूर्वप्ररोहमिव प्रथममङ्कुरमिव, पाणिं गृहीतवान्। अत्रोत्प्रेक्षते।। ७६ ।।

तदा तयोः प्रथमाङ्गस्पर्शनसंवेदनसम्भोगे जातं भावं दर्शयति -

रोमोद्गमः प्रादुरभूदुमायाः स्विन्नाङ्गुलिः पुङ्गवकेतुरासीत्।

वृत्तिस्तयोः पाणिसमागमेन समं विभक्तेव मनोभवस्य।। ७७ ।।

रोमेत्यादि। उमाया रोमोद्गमो रोमाञ्चः, प्रादुरभूत्। पुङ्गवकेतुः वृषभध्वजः स्विन्नाङ्गुलिरासीत्। तस्याङ्गुलीषु स्वेदोऽजायतेत्यर्थः। पाणिसमागमेन कर्त्रा, मनोभवस्य वृत्तिः कामस्य व्यापारस्तयोस्समं अन्यूनातिरिक्ततया, विभक्तेव। द्वयोः कृतविभागेवाभूदिति सम्बन्धः।

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।

वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विका मताः।। (सरस्वती. ५.१५) इति।

अत्र द्वयोः जाताभ्यां स्वेदरोमाञ्चाभ्यां रत्याख्यस्थायिभावस्य सम्भोग शृङ्गाररसात्मना जन्मोक्तम्। तस्मादियं रसोक्तिर्नामालङ्कृतिः।। ७७ ।।

प्रयुक्तपाणिग्रहणं यदन्यद् वधूवरं पुष्यति कान्तिमग्र्याम्।

सान्निध्ययोगादनयोस्तदानीं किं कथ्यते श्रीरुभयस्य तस्य।। ७८ ।।

प्रयुक्तेति । प्रयुक्तपाणिग्रहणं कृतविवाहयोः देवयोः, सान्निध्य योगात् सन्निधानसम्बद्धात् तस्योभयस्य मिथुनस्य, जाता श्रीः कान्तिः, किं कथ्यते किं वर्ण्यते । वर्णयितुमशक्यमेवेत्यर्थः। वधूवरमिति स्त्रीपुंसादिशब्दवत् साधुत्वं ज्ञेयम्।। ७८ ।। (अपूर्णमिदमिति प्रतीयते।)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रदक्षिणप्रक्रमणात् कृशानोरुदर्चिषस्तन्मिथुनं चकासे।
मेरोरुपान्तोष्विव वर्तमानमन्योन्यसंसक्तमहस्त्रियामम्।। ७९ ।।

(अस्य श्लोकस्य व्याख्या न लब्धा।)

तौ दम्पती त्रिः परिणीय वह्निमन्योन्यसंस्पर्शनिमीलिताक्षौ।
स कारयामास वधूं पुरोधास्तस्मिन् समिद्धार्चिषि लाजमोक्षम्।। ८०।।

तावविति। अन्योन्येति - परस्परसंस्पर्शसुखेन निमीलितनयनौ, तौ दम्पती वह्निं त्रिः परिणीय त्रिवारं प्रदक्षिणं गमयित्वा, पुरोधाः शैलस्य पुरोहितस्तां वधूं तस्मिन् समिद्धार्चिषि समिद्धज्वाले वह्नौ, लाजहोमं कारयामास। तान् लाजान् वह्नौ होमयामासेत्यर्थः। तत्प्रयोजको हेतुश्च(पा.सू.१.४.५५) इति पुरोधसो हेतुत्वम्। हेतुमति च (पा.सू. ३.१.२६) इति णिच्।। ८० ।।

सा लाजधूमाञ्जलिमिष्टगन्धं गुरूपदेशाद् वदनं निनाय।
कपोलसंसर्पिशिखः स तस्या मुहूर्तकर्णोत्पलतां प्रपेदे।। ८१ ।।

सेति। सा वधूः, इष्टं गन्धं मनोज्ञगन्धं, लाजधूमाञ्जलिं गुरूपदेशाद् आचारत्वेन पुरोधस उपचारत्वाद्, वदनं निनाय। आचारोऽयमिति गुरूपदेशात्, सा लाजहोमजं धूमं कराञ्जलिना मुखं प्रत्यानीतवतीति भावः। कपोलसंसर्पिशिखः कपोलव्याप्ताग्रः स धूमः तस्याः मुहूर्तं कर्णोत्पलतां प्रपेदे। कपोलपर्यन्तं व्याप्ताग्रः सधूमस्तस्याः क्षणं कर्णोत्पलवद् आसीदित्यभिप्रायः।। ८१ ।।

तदीषदार्द्रारुणगण्डलेखमुच्छ्वासिकालाञ्जनरागमक्ष्णोः।
वधूमुखं क्लान्तयवावतंसमाचारधूमग्रहणाद् बभूव।। ८२ ।।

तदिति। ईषदार्द्रेति। धूमसंस्पर्शविशेषजातं स्वेदसम्बन्धाद् ईषदार्द्रं हरिद्राकुङ्कुमानि पीतत्वाद् अरुणा गण्डरेखाः कपोललिखिताः पत्रलेखा यत्र तत् तथा। उच्छ्वासिते नेत्रद्वये उच्छ्वासमानकज्जलरागम्। कज्जलस्य उत्क्षेपादेव अक्ष्णो राग उत्पद्यते। धूमसम्बन्धात् सबाष्पमतिरक्तञ्च नेत्रं स्यादिति। तथाभूतं क्लान्तं यवप्ररोहं, मङ्गलाचरणार्थं यवाङ्कुरः वधूभिः कण्ठे धार्यते। स च धूमसंस्पर्शात् क्लान्तो भवति। एवं तद्वधूमुखं उक्तविशेषणत्रययुक्तं आचारधूमग्रहणात् बभूव। आचारभूतात् धूमग्रहणाद् एवमासीदित्यर्थः।। ८२ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वधूं द्विजः प्राह तवैष वत्से वह्निर्विवाहं प्रति पूर्वसाक्षी।
शिवेन भर्त्रा सह धर्मचर्या कार्या त्वया मुक्तविचारयेति।। ८३ ।।

वधूमिति। स द्विजः पुरोधा वधूं प्रत्याह एवमुक्तवान् इति। प्राहेति प्रपूर्वमव्ययम्। आहादेशादिदमव्ययमपि भूते ब्रुवोऽर्थे च वर्तते।

पञ्चानां ब्रुव आद्यानां पञ्चाहाद्याः स्मृता लटि।

आहेत्येतदतीते तिङन्तप्रतिरूपम्। हे वत्से, एष वह्निः, तव विवाहं प्रति विवाहमुद्दिश्य, पूर्वसाक्षी प्रथमः साक्षी। अन्येऽपि सूर्यादयः साक्षिणः सन्तीति ज्ञापयितुं पूर्वपदग्रहणम्। (महाभारतम् १.९८.११ -)

आदित्यचन्द्रावनिलानलौ च द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम्।।

इति स्मृतौ गृह्यप्रकरणेऽभिहितम्। ब्राह्मविवाहेन शिवस्तव भर्ताऽभवत्। अनेन भर्त्रा शिवेन सह मुक्तविचारया त्वया धर्मचर्या कार्या। तदुक्तं विचारवाक्यं त्यक्त्वा सदेहया त्वया धर्मानुष्ठानं कार्यम्। धर्मानुष्ठानं धर्मचर्या। सह धर्मं चरताम् इत्युक्तवान् इत्यर्थः। शिवस्य परितोषाभावेऽपि, तस्मिन् अपराधे सत्यपि, त्वया विचारो न कार्य इत्यभिप्रायः।। ८३ ।।

आलोचनान्तं श्रवणे वितत्य पीतं गुरोस्तद्वचनं भवान्या।
निदाघकालोल्बणतापयेव माहेन्द्रमम्भः प्रथमं पृथिव्या।। ८४ ।।

आलोचनेति। आलोचनान्तं लोचनसमीपावधि। एवं श्रवणे श्रोत्रे, विवृत्य। अनेन आयतयोः नेत्रयोः श्रोत्रसमीपस्थानं द्योतितम्। प्रकर्षातिशयश्च प्रकाशितः। आनेत्रान्तं श्रोत्रे विवृते कृत्वा भवान्या गुरोस्तद्वचनं पीतं पपे गौर्या। श्रोत्राभ्यां पीतं श्रुतमित्यर्थः। अत्र अन्यधर्माभ्यासाद् अयं समाधिः। तत्रोपमामाह निदाघेति। निदाघ कालोल्बणतापया घर्मकालापादितप्रबलभेदया सूर्यांशुसन्तापसञ्जात विपुल भेदभिन्नया पृथिव्या प्रथमं माहेन्द्रं माहेन्द्रेण पर्जन्येन मुक्तमम्भ इव घर्मकाले भिन्नया भूम्या प्रथमवृष्टिजलं यथा पीयते तद्वत्।। ८४।।

ध्रुवेण भर्त्रा ध्रुवदर्शनाय प्रयुज्यमाना प्रियदर्शनेन।
सा दृष्ट इत्याननमुन्नमय्य ह्रीसन्नकण्ठी कथमप्युवाच।। ८५ ।।

ध्रुवेति। प्रियदर्शनेन प्रियं प्रीतिजनकं दर्शनं यस्य स तथा। तेन भर्त्रा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शिवेन, ध्रुवदर्शनाय तारकादिरूपस्य ध्रुवस्य दर्शनाय प्रयुज्यमाना नेत्रा यद् ध्रुवस्तिष्ठति तं पश्येति नियुज्यमाना। ध्रुवदर्शनमाचारतया बोधायनगृह्येप्युक्तम् (१.८.१३) - ततस्तां ध्रुवं अरुन्धतीञ्च दर्शयतीति। अरुन्धतीञ्चेति स्वभार्या वसिष्ठस्य। ध्रुवस्यारुन्धत्याश्च दर्शनाय चोद्यमाना सा वधूस्तदवलोकनार्थं आननमुन्नमय्य सन्नतकण्ठी च लज्जया प्रकर्षेण निरुद्धकण्ठी सती दृष्टा इति कथञ्चिद् उवाच उक्तवती। किं दृष्ट इति सखीभिः पृष्टा सा दृष्ट इति कथञ्चिद् उक्तवती। ध्रुवेण वश्येति केषाञ्चित् पाठः। ध्रुवेण शाश्वतेनेत्यर्थः।। ८५ ।।

इत्थं विधिज्ञेन पुरोहितेन प्रयुक्तपाणिग्रहणोपचारौ।

प्रणेमतुस्तौ पितरौ प्रजानां पद्मासनस्थाय पितामहाय।। ८६ ।।

इत्थमिति। इत्थं उक्तप्रकारेण, विधिज्ञेन शास्त्रज्ञेन, पुरोहितेन इत्थं प्रयुक्तपाणिग्रहणोपचारौ कृतविवाहक्रियाकलापौ। पाणिग्रहणोपचारा अग्निप्रदक्षिणकरणादयः तौ प्रजानां पितरौ पार्वतीपरमेश्वरौ पद्मासनस्थाय पितामहाय सुरज्येष्ठाय वेदनिधये प्रणेमतुः। तत्तु गौरवविशेषात्।। ८६ ।।

वधूर्विधात्रा प्रतिनन्द्यते स्म कल्याणि वीरप्रसवा भवेति।

वाचस्पतिः सन्नपि सोऽष्टमूर्तौ त्वाशास्यचिन्तास्तिमितो बभूव।। ८७।।

वधूरिति। प्रणमन्ती सा वधूर्विधात्रा ब्रह्मणा, प्रतिनन्द्यते स्म, आशिषा प्रत्यनन्द्यत। यथा पूर्वं ब्रह्माणं सा प्रणामेन शिरः आनमयत्, तथा ब्रह्माप्याशीर्वादेन तां प्रत्यनन्दयदित्यभिप्रायः। आशिषमेव दर्शयति - हे कल्याणि, त्वं वीरप्रसवा भवेति। वीरः प्रसवः पुत्रो यस्याः सा तथा। वीरप्रसूर्भवेति, वीरं पुत्रं लभस्वेत्यर्थः। एवमाशिषा सा तेन प्रतिनन्दिता अभूदिति यावत्। वाचः सरस्वत्याः पतिरपि सर्वज्ञोऽपि सन् अष्टमूर्तेः सर्वसम्पत्समवेताभिरष्टाभिर्मूर्तिभिः युक्तस्य शिवस्य परिपूर्णकामस्य आशास्यचिन्तास्तिमितो बभूव। आशिषा प्रतिपद्यं आशास्यन् तच्चिन्तानिश्चलत्प्रतिवादशून्यः। अयमभिप्रायः - अहमस्या विद्यमानं किं अर्थमयं आशिषा साधयामीति चिरं चिन्तयन् निरुत्तरोऽभूदिति।। ८७ ।।

क्लृप्तोपचारां चतुरन्तवेदीं तावेत्य पश्चात् कनकासनस्थौ।

जायापती लौकिकमेषितव्यमार्द्राक्षतारोपणमन्वभूताम्।। ८८ ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्लृप्तेति। क्लृप्तोपचारा गन्धोदकसम्मार्जननवपुष्पमालालम्बनपूर्ण कुम्भस्थापनादय उपचाराः। कृतोपचाराम्। चतुरन्तवेदीं चतुष्कोणां वेदिकां, अध्यास्य अधिष्ठाय सम्प्राप्य, पश्चात् तस्याः पश्चिमदिग्भागे प्राङ्मुखौ कनकासनस्थौ हेमासनस्थौ, तौ जायापती दम्पतीदं च लौकिकं लोकाचारसिद्धं, एषितव्यं स्पृहणीयं सर्वैरप्यभिलषणीयं, आर्द्राक्षतारोपणं हरिद्राकुङ्कुमरसादिभिः आर्द्राणां अक्षतानां धौतार्द्रतण्डुलानां आरोपणं स्वाङ्गेषु परैः सन्निवेशनं अन्वभूताम् अनुभूतवन्तौ। प्राप्तवन्तावित्यर्थः।

हरिद्राया जलेनार्द्रं मङ्गल्यं तण्डुलाक्षतम्

इति भोजः। तयोर्बन्धुपुरन्ध्र्यः तत्तत्स्थलेषु ललाटभुजमूलपादशिरस्सु अक्षतानि चिक्षिपुः इत्यभिप्रायः।। ८८ ।।

पत्रान्तलम्बैर्जलबिन्दुवर्षैराकृष्टमुक्ताफलजालशोभम्।

तयोरुपर्यायतनालदण्डमाधत्त लक्ष्मीः कमलातपत्रम्।। ८९ ।।

पत्रान्तेति। पत्रान्ते दळान्ते लम्बैर्लम्बमानैः जलबिन्दुवर्षैः। आकृष्टेति। आकृष्टा अपहृता मुक्ताफलजालशोभा येन तत्। यथा पत्रान्ते पततां जलबिन्दूनां मुक्ताफलानुरूपतया परितः प्रान्तेषु बद्धं लम्बितम्। मुक्ताफलमिव शोभमानमित्यभिप्रायः। आयतनालदण्डं आयतः नाल एव दण्डो यस्य तत् तथा। एवम्भूतं कमलातपत्रं कमलमेवातपत्रं श्वेतच्छत्रं तयोर्दम्पत्योरुपरि लक्ष्मीः आधत्त। तयोरुपरि श्रीः स्वयमेव कमलातपत्रं बिभराम्बभूवेत्यर्थः।। ८९ ।।

द्विधा प्रयुक्तेन च वाङ्मयेन सरस्वती तन्मिथुनं नुनाव।

संस्कारपूतेन वरं वरेण्यं वधूं सुखग्राह्यनिबन्धनेन।। ९० ।।

द्विधेति। सरस्वती च मूर्तिमती भूत्वा द्विधा प्रयुक्तेन वाङ्मयेन तन्मिथुनं नुनाव तुष्टाव। द्वैविध्यं प्रतिनियमञ्च दर्शयति संस्कारेति। संस्कारो व्याकरणशिक्षानुशासनम्। तेन पूतेन शुद्धेन वाङ्मयेन वाग्जालेन वरेण्यं श्रेष्ठं वरं तुष्टाव। सुखग्राह्यनिबन्धनेन, सुप्रसिद्धत्वात् सुखग्राह्य निबन्धनेन सुखबन्धत्वात् सुखग्राह्येण प्राकृतभाषामयेन निबन्धनेन प्रबन्धेन वधूं तुष्टाव। अनेन उत्तमनायकस्योत्तमस्य व्याकरणानुशिष्टेन संस्कृतेन निबन्धनेन स्तुतियोग्यत्वं दर्शितम् । मुग्धाया वध्वाः प्राकृतमेव स्तुतियोग्यत्वमित्युभयं प्रकाशितम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तदत्र केचिदन्यथा व्याचक्षते - संस्कारपूतेन व्याकरणशिक्षा संस्कारविशिष्टेन भर्तृकाव्यवद् व्याकरणप्रौढियुक्तेन गौडीरीतिसिद्धप्रबन्धोच्चारणेन वा सुखग्राह्येण प्रसिद्धार्थत्वेन प्रसादवता सुखग्राह्येण सुकुमारेण वैदर्भीरीतिश्लाघ्येन निबन्धनेन प्रसादवतीं वधूं नुनाव। वैदर्भरीतिलक्षणं चोक्तमलङ्कारचूडामणौ कविराजशेखरेण -

असमासैः प्रसिद्धार्थैः ग्रथितैः कोमळैः पदैः ।
श्रोत्रप्रिया सुखकरी वैदर्भीरीतिरिष्यते ।। इति ।
पदैस्समासभूयिष्ठैः महाप्राणाक्षरोत्तरैः ।
कृता साडम्बरातीव गौडीरीतिरिति स्मृता ।।

अथवा - संस्कारोऽर्थस्तत्पूतेनार्थोपचितेन वरं अज्ञातरसैरपि मनोहरैः शब्दैः कृतेन सुखग्राह्येण वधूञ्च नुनावेति।। ९० ।।

तौ सन्धिषु व्यञ्जितवृत्तिभेदं रसान्तरेषु प्रतिबद्धरागम्।
अपश्यतामप्सरसां मुहूर्तं प्रयोगमाद्यं ललिताङ्गहारम्।। ९१ ।।

ताविति। सन्धिषु मुखादिषु व्यञ्जितवृत्तिभेदम् । व्यञ्जितः प्रकाशितो वृत्तीनां कैशिक्यादीनां भेदो व्यत्यासो यत्र तम् । सन्धीनां वृत्तीनां च संज्ञासंख्याभेदः कविराजशेखरेणालङ्कारचूडामणौ दर्शितः -

मुखं प्रतिमुखं गर्भो विमर्शश्च चतुर्थकः ।
यथा निर्वहणञ्चैव प्रपञ्चे पञ्च सन्धयः।। इति ।
कैशिक्यारभटी चैव सात्त्वती भारतीत्यमूः ।
चतस्रो वृत्तयो ज्ञेया नाटकेषु पृथग्विधाः इति ।

प्रयोगस्य विशेषणान्तरमाह - रसेत्यादि । रसान्तरेषु शृङ्गारादिरसविशेषेषु प्रतिबद्धरागम् । प्रतिबद्धः प्रतिनियतो रागो यत्र तम्। रागो रञ्जनं ललितमाळवीगुर्जरीत्यादयो द्वात्रिंशद्रागविशेषा वा अस्य रसस्यायं राग इति प्रतिनियतरागभेदमित्यर्थः। प्रयोगस्य विशेषणान्तरमाह - ललिताङ्ग हारमिति। ललितो मनोहरोऽङ्गहारः अङ्गविक्षेपो यत्र तम् । रागो रञ्जनी। आद्यं ब्रह्मणा अप्सरसां गणायोक्तम् । एवम्भूतमप्सरसामाद्यं प्रयोगं नाट्यं तौ दम्पती मुहूर्त्तं घटिकाद्वयमिति। तं कालं मुहूर्त्तमात्रे काले अपश्यताम् निरैक्षिषाताम्। तदानीं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तत् पुरस्तादप्सरोभिर्नाट्यमकारि मुहूर्त्तमात्रं कालम्। ताभ्याञ्च तदवेक्षितमिति भावः। सन्धिवृत्त्यादीनां सङ्ख्यासम्भोगज्ञः शारदाकनकतनयेन दर्शितः (भावप्रकाशनम् पुट. १२, २५४ ...) -

चतुर्विधा भाववृत्तिश्चतुर्वेदसमुद्भवा।
भारती सात्वती चैव कैशिक्यारभटीति च।।
अन्ये तु पञ्चमीमर्थवृत्तिञ्च प्रतिजानते।
अर्थवृत्तेरभावात्तु विश्रान्तां पञ्चमीं परे।।
मधुकैटभसंज्ञाभ्यां दैत्याभ्यां समबुद्धयः।
आदौ भगवतो विष्णोः वृत्तित्रयमजायत।।
अन्या च भरतप्रोक्ता मागधीत्यपरे विदुः।
वाचिकं सात्त्विकं वृत्तमाहार्यं च तथाङ्गिकम्।।
यथाक्रमं नियमितं भारत्याद्यासु वृत्तिषु।
वागारम्भानुभावाख्यो विशेषो वृत्तिसंज्ञितः।।
अन्वितानां कथाङ्गानां परमेकप्रयोजने।
सम्बद्धस्सन्धिरित्युक्तोऽवान्तरैकप्रयोजनम्।।
एककार्यन्तरेष्वत्र कथाङ्गेषु प्रयोगतः।
अवान्तरैककार्यस्य सम्बन्धः सन्धिरुच्यते।।
मुखं प्रतिमुखो गर्भ सावमर्शोपसंहृतिः।
विवक्षितोऽयमुद्देशः क्रमावस्था क्रमो यथा।।
शारदातनयेनोक्तो रम्यो भावः प्रकाशते ।
कथितं सङ्ख्यया युक्तं भाववृत्त्यादिलक्षणम्।। इति।

अत्र काचित् कथास्ति। ब्रहाणः सकाशात् भरतः पूर्वं ताण्डवमशिक्षत। ततः परं लास्यशिक्षां प्रार्थयामास। ब्रह्मा त्वेवमाह - लास्यप्रयोगस्य कैशिकीभूयिष्ठतया, कैशिक्याश्च पुरुषैः प्रयोक्तुमशक्यत्वात् लास्यं तव न शिक्षणीयमिति । अत्र ब्रह्मणोक्तौ श्लोकौ भरतेन दृष्टौ (१.४५ - ४६) -

कैशिकी श्लक्ष्णनैपुण्या शृङ्गाररससम्भवा ।
अशक्या पुरुषैस्साधु प्रयोक्तुं स्त्रीजनादृते ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इत्युक्त्वा तत् प्रयोगार्थं सृष्ट्वैवाप्सरसां गणम् ।

शिक्षयामास ललितं लास्यं तस्मात्तदादिकम् ।। इति ।

तदादिकमप्सरोगणोपक्रमम्। तस्मात् प्रयोगस्याद्यत्वम्। अनेन प्रयोगस्य प्रथमसम्प्रदायलक्षणं शुद्धत्वं दर्शितमिति ।। ९१ ।।

देवास्तदन्ते हरमूढभार्यं किरीटबद्धाञ्जलयो निपत्य।

शापावसाने प्रतिलब्धमूर्तेर्ययाचिरे पञ्चशरस्य सेवाम्।। ९२ ।।

देवा इति। तदन्ते लास्यान्ते देवा ऊढभार्यं गौरीकृतविवाहं इत्यर्थः। तं हरं पञ्चशरस्य कामस्य सेवां ययाचिरे। किरीटबद्धाञ्जलयो मकुटनिवेशित-कराञ्जलिपुटा इत्यर्थः। शापावसाने, परिणेष्यति पार्वतीं यदा(४.४२) इत्यादिनोक्तम्। तत्र प्रतिलब्धमूर्तेः, शिवप्रसादात् प्रत्यापन्नशरीरस्य स्वरूपार्धात् प्रच्युतस्य पुनस्तत्प्राप्तौ प्रत्यापत्तिः। कृताञ्जलिपुटा देवा निपत्य नमस्कृत्य शापान्ते प्रतिलब्धमूर्तेः कामस्य सेवां सभार्यं हरं ययाचिर इत्यर्थः। पञ्चशरस्य कामः इति स्यात् पाठः।। ९२ ।।

तस्यानुमेने भगवान् विमन्युर्व्यापारमात्मन्यपि सायकानाम्।

कालप्रयुक्ता खलु कालविद्भिर्विज्ञापना भर्तृषु सिद्धिमेति।। ९३ ।।

तस्येति। विमन्युः तत्कृतप्रार्थनानुरोधात् विगतकोपः स भगवान् तस्य कामस्य सायकानां शराणां आत्मन्यपि व्यापारं आपतनं अनुमेने अनुमतवान्। कामो निर्भयः सर्वलोकान् जयतु, मय्यपि शरान् प्रहरत्विति अनुमतिं कृतवान् इत्यर्थः। देवानां प्रार्थनासिद्धिः काले विज्ञापनाऽभूद् इति विज्ञापनायाः काल एव सिद्धिकृदिति दर्शयति - कालेऽपि कालविद्भिः पुरुषैः काले प्रयुक्ता काले कृता भर्तृषु स्वामिषु विज्ञापना सिद्धिं एति खलु, सफला भवति नाम। खल्विति प्रसिद्धौ। विज्ञापनाया उचितत्वात् शीघ्रं फलसिद्धिरासीदित्यर्थः।। ९३ ।।

अथ विबुधगणांस्तानिन्दुमौलिर्विसृज्य

क्षितिधरपतिकन्यामाददानः करेण।

कनककलशरक्षाशक्तिशोभासनाथं

क्षितिविरचितशय्यं कौतुकागारमागात् ।। ९४ ।।

अथेति। अथ अनन्तरम्, इन्दुमौलिः चन्द्रचूडो हरः, तान् विबुधगणान्,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विसृज्य स्वं स्वं पुरं प्रति गमनाय तेषां अनुज्ञां दत्त्वा, करेण क्षितिधरपतिकन्यां हिमवत्सुतां, आददानः हस्तेन तस्याः हस्तं गृह्णन्, स देवः, कौतुकागारं अगात्। अगारविशेषणान्याह - कनकेति। कनककलशाः पूर्णहेमकुम्भाः। रक्षाशक्तिः रक्षार्थायुधविशेषः। तदादि शोभासनाथं शोभासहितम्। भक्तिशोभेति केषाञ्चित् पाठः। भक्तिर्मृदादिकलिता मङ्गलाकृतिलेखना। रक्षार्थायुधविशेषन्यासा रक्षा। कनककलशैः रक्षया शक्त्या च या शोभा तया सहितं क्षितिविरचितशय्यं सदाचारत्वात् मञ्चादीन् विहाय भूतलनिहितशयनीयम्। अत्र अधःशय्याशयनं स्मृतावुक्तम् -

तौ दम्पती स्नानहीनावक्षारलवणाशिनौ।
अधःशय्याब्रह्मचर्ययुक्तौ स्यातां धृतव्रतौ ।। इति।

एवम्भूतं कौतुकागारं मङ्गलगृहं प्रविष्टवान्। सर्गान्ते श्लोकद्वयमितीदं मालिनीवृत्तम्।। ९४ ।।

नवपरिणयलज्जाभूषणां तत्र गौरीं
वदनमपहरन्तीं तत्कृतोत्क्षेपमीशः।
अपि शयनसखीभ्यो दत्तवाचं कथञ्चित्
प्रमथमुखविकारैर्हासयामास गूढम्।। ९५ ।।

नवेति। नवो नूतनः। सद्यः कृतः परिणयो विवाहस्तेन कृता लज्जा, सैव भूषणं यस्याः सा ताम्। नवविवाहजनितलज्जाभूषणामित्यर्थः।

अन्यदाभूषणं पुंसः क्षमा लज्जा च योषितः (माघः २.४४)

इति योषितो लज्जा भूषणत्वेनाभिपद्यते। तत्कृतोत्क्षेपम्। भर्त्रा आकाङ्क्षितोन्नयनं अथवा गौर्या स्वमनसा तत्कृतोत्क्षेपमपि वदनमपहरन्तीं परावृत्य मुखमवनमयन्तीं वदनोन्नमनेन स्वमनसः प्रियेऽपि तदनिच्छन्तीमिव मुखं अवनमयन्तीमित्यर्थः। शयनसखीभ्योऽप्यदत्तवाचम्। स एवम्भूतां गौरीं तत्र कौतुकागारे स ईश्वरः प्रमथमुखविकारैः गूढमनभिव्यक्तं हासयामास। प्रमथा भृङ्गिरिटिप्रभृतयः भूतगणाः। प्रमथाः स्युः भूतगणाः रुद्रपार्षदाः गणाः इति भोजः। प्रमथानां मुखविकारैः मुखवैकृत्यकरणैः। अथवा मुखविकारो हास्यप्रयोगो हास्यम्। हास्यस्य प्रमथदेवतात्वात्। तदुक्तं भरतेन (६.४४) -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शृङ्गारो विष्णुदैवत्यो हास्यः प्रमथदैवतः इति। अत्र गोनर्दीयवचनम् -

हास्येन मधुना नर्मवचसा लज्जितां प्रियाम्।
विमुक्तलज्जां कुर्वीत निपुणैश्च सखीजनैः इति।।

सखीभ्य इति। सुप्तामपि तां या न मुञ्चन्ति रक्षार्थं सहैव तिष्ठन्ति, ताः शयनसख्योऽतिविस्रब्धाः। ताभ्योऽप्यदत्तवाचं तदानीमतिलज्जितत्वात् ताभ्योऽपि किञ्चिद् अकथयन्तीमित्यर्थः। दत्तवाचमिति केचिदाहुः। शयन सखीभ्यो कथञ्चिद् उक्तवाचमपि सतीं तां भूतगणमुखविकारैः कथञ्चित् गूढहासयुक्तामकरोत् इत्यर्थः। मुखविकारो हास्यप्रयोगः। स च लज्जां अपहरति। अत्र वदनापहरणं, सखीभ्यः कृच्छ्राद् वाग्दानं, गूढहासश्च लज्जानुभवः। वदनोत्क्षेपणं, सखीभिरालपनं, हास्यप्रयोगश्च नववधूविषयो हासकोपक्रमः। उत्तरसर्गे वक्ष्यमाणसम्भोगस्येयं पूर्वप्रस्तावना।। ९४ ।।

कुमारसम्भवस्येत्थं व्याख्यायि ख्यातसद्गुणैः।
गौरीविवाहसंज्ञोऽयं सर्गः सप्तम उत्तमः।।
इति विद्यामाधवीये कुमारसम्भवव्याख्याने सप्तमः सर्गः।। श्रीः।।

अष्टमसर्गः

शिवयोर्विलासः

पाणिपीडनविधेरनन्तरं शैलराजदुहिता हरं प्रति।
भावसाध्वसपरिग्रहादभूत् कामसौहृदसुखं मनोहरम्।। १ ।।

अत्रायमष्टमः सर्गो गौरीसम्भोगवर्णनम्।
वक्तुं वाचयितुं श्रोतुं व्याख्यातुञ्च न युज्यते।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्लोकानुक्रमणिका

अकिञ्चन ५.७७
अखण्डितं ७.२८
अगूढसद्भाव ५.६२
अङ्काद् ७.५
अच्छिन्ना ६.६९
अणिमादि ६.७५
अत आहर्तुं ६.२८
अतन्द्रिता ५.१४
अतोऽत्र ५.४०
अथ ते ६.१५
अथ तैः ४.२५
अथ मदन ४.४६
अथ मोह ४.१
अथ मौलि ६.२५
अथवा ६.२४
अथ विबुध ७.९३
अथ विश्वात्मने ६.१
अथ सर्वस्य २.३
अथ स २.६३
अथ सा ४.४
अथाग्रहस्ते ५.६३
अथाघ्रिरसं ६.६५
अथाङ्गुलिभ्यां ७.२३
अथाजिना ५.३०
अथानुरूपा ५.७
अथावमानेन १.२०
अथाह वर्णी ५.६५
अथेन्द्रिय ३.६९
अथोपनिन्ये ३.६५
अथोरुदेशाद् ३.११
अथौषधीनां ७.१
अद्य प्रभृति ६.५६
अद्य प्रभृत्यव ५.८६
अधः प्रस्थापिता ६.७
अध्यापितस्य ३.६
अनन्तरत्न १.३
अनन्यभाजं ३.६३
अनर्घं १.५७
अनेन धर्मः ५.३८
अन्न सम्बन्धं ७.६७
अन्योन्यं १.३९
अपमेघोदयं ६.५४
अपि क्रियार्थं ५.३३
अपि त्वदावर्जित ५.३४
अपि प्रसन्नं ५.३५
अभिलाषं ४.४१
अभ्युन्नताङ्गुष्ठ १.३२
अमी च कथं २.२३
अमी हि वीर्य ३.१५
अमुना ननु ४.२९
अमुनैव कषा ४.३४
अयाचितारं १.५१
अयाचितोप ५.२२

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अयि जीवितनाथ ४.३
अयि सम्प्रति ४.२८
अयुक्तरूपं ५.६९
अरण्य ५.१५
अर्धाचिता ७.६१
अलं विवादेन ५.८२
अलकां ६.३७
अलभ्य ५.४३
अलिपङ्क्ति ४.१५
अवगम्य ४.१३
अवचित १.५९
अवधान ४.२
अवस्तु ५.६६
अवृष्टि ३.४८
अवैमि ते ३.१३
अवैमि पूतं ६.५७
अवैमि सौभाग्य ५.४९
अशोक ३.५३
असम्पदस्तस्य ५.८०
असम्भृतं १.३०
असम्मतः ३.५
असह्य ५.५४
असूत सद्यः ३.२६
असूत सा १.१९
अस्तोतुः ६.८३
अस्त्युत्तरस्यां १.१
अस्मिन् सुराणां ३.१९
अहमेत्य ४.२०
अहो स्थिरः ५.४७
आज्ञापय ३.३
आत्मानमात्मना २.१०
आत्मानमालोक्य ७.२२
आप्लुतास्तीर ६.५
आमेखलं १.६
आर्याप्यरुन्धती ६.३२
आलोक ७.५७
आलोचनान्तं ७.८३
आवर्जितजटा २.२५
आवर्जिता किञ्चिद् ३.५४
आशंसता ३.१४
आसक्त ६.८
इच्छाविभूत्यो ७.२९
इतः स दैत्यः २.५४
इति चापि ४.३७
इति चाह ४.४३
इति चैनं ४.२७
इति तेभ्यः २.१५
इति देह ४.३९
इति द्विजातौ ५.७४
इति प्रविश्य ५.५१
इति व्याहृत्य २.६१
इति स्थिरेच्छां ५.५
इतो गमिष्याम्यथ ५.८४
इत्थं रतेः ४.४५

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इत्थं विधिज्ञेन ७.८५
इत्थमाराध्य २.३९
इत्यद्भुतैक ७.३६
इत्यूचिवांसं ६.६४
इत्योषधिप्रस्थ ७.६८
इदमत्रोत्तरं ६.८६
इयं च तेन्या ५.७०
इयं महेन्द्र ५.५३
इयेष सा ५.२
ईप्सितार्थ ६.८९
उच्चैरुच्चैः २.४६
उत्पाट्य २.४२
उद्घातः २.११
उद्वैजय १.११
उन्नतेन ६.३०
उन्मीलितं १.३१
उपपन्नमिदं ६.६६
उपमानमभूद् ४.५
उपात्तवर्णे ५.५६
उपाददे ७.४१
उभे एव २.५९
उमापि ३.६२
उमारूपेण २.५८
उमा वधूः ६.८२
उमास्तनो ७.२४
उवाच ५.७५
ऋजुतां ४.२३
एकैव मूर्तिः ७.४४
एकैव सत्या ७.४
एतावता १.३६
एतावदुक्त्वा ६.८८
एते वयं ६.६३
एवं यदात्थ २.३०
एवं वाच्यः ६.३१
एवंवादिनि ६.८४
एहि विश्वात्मने ६.८७
कण्ठस्य १.४१
कदाचिद् ५.६
कपाल ३.४९
कपोल १.९
कम्पेन ७.४६
कयासि ३.८
कर्णार्पितो ७.१७
कर्तव्यं ६.६१
कल्पिता ६.७६
काठिन्यं ६.७३
कामस्तु ३.६४
कामेक ३.७
किं येन ६.२३
किञ्चायं २.२०
किञ्चित् ३.४७
किमिदं २.१८
किमित्यपास्या ५.४४
कियच्चिरं ५.५०

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कुबेरनाथां ३.२५
कुबेरस्य २.२१
कुले प्रसूतिः ५.४१
कुसुमायुध ४.४०
कुसुमास्तरणे ४.३५
कृतवानसि ४.७
कृताभिषेकां ५.१६
क्लृप्तोपचारां ७.८७
केनाभ्यसूया ३.४
कोपं प्रभो ३.७२
क्रियतां ४.२२
क्लमं ययौ ५.१९
क्व नु ते ४.२४
क्व नु मां ४.६
क्षीरोद ७.२६
खे खेल ७.४९
गगनाद् ६.४९
गङ्गास्रोतः ६.३८
गणा नमेरु १.५४
गत एव ४.३०
गामधास्यत् ६.६८
गीतान्तरेषु ३.३८
गुरुः प्रगल्भे १.५०
गुरोर्नियोगाच्च ३.१७
गोप्तारं २.५१
चतुष्क ५.६८
चन्द्रं गता १.४२
चूताङ्कुरा ३.३२
जगद्योनि २.९
जङ्गमं ६.५८
जयाशा २.४८
जालान्तर ७.६०
ज्वलन्मणि २.३७
तं देशं ३.३५
तं लोक ७.४५
तं वीक्ष्य ५.८५
त आकाश ६.३६
ततः पर ६.३५
ततो गणैः ७.४०
ततो भुजङ्गा ३.५९
ततो मन्दा २.२८
तत्कान्तं ६.४७
तत्कृता २.३८
तत्प्रयातौ ६.३३
तत्र निश्चित्य २.६२
तत्र वेत्रासना ६.५३
तत्राग्नि १.५६
तत्रावतीर्या ७.६९
तत्रेश्वरो ७.७१
तथाततप्तं ५.२१
तथापि ६.६२
तथा समक्षं ५.१
तथेति ३.२२
तदङ्ग ५.७९

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तदनु ४.३६
तदा प्रभृत्यु ५.५५
तदिच्छामो २.५०
तदिदं क्रिय ४.३२
तदिदं परि ४.४४
तदीया २.४९
तदीषदा ७.८१
तद्गच्छ ३.१८
तद्गौरवा ७.३१
तद्दर्शना ६.१३
तद्ब्रूत २.२७
तन्मातरं ६.९१
तपःपरा ३.७१
तपस्विनः ३.३४
तमन्वग् ७.७०
तमभ्यगच्छद् ७.४३
तमर्थमिव ६.७९
तमवेक्ष्य ४.२६
तमातिथेयी ५.३१
तमाशु ३.७४
तमृद्धिमद् ७.५२
तमेकदृश्यं ७.६४
तं मातरो ७.३८
तया दुहित्रा १.२३
तया विवृद्धा ७.७३
तया व्याहृत ६.२
तयोः समापत्ति ७.७४
तव प्रसादात् ३.१०
तस्मात् प्रदेशात् ७.१२
तस्मिन्नुपायाः २.४७
तस्मिन् मघोन ३.१
तस्मिन् मुहूर्ते ७.५६
तस्मिन् वने ३.२४
तस्मिन् विप्र २.१
तस्मिन् संयमि ६.३४
तस्मै जयाशीः ७.४७
तस्मै शशंस ३.६०
तस्मै हिमाद्रेः ३.१६
तस्याः करं ७.७५
तस्याः प्रविष्टा १.३७
तस्याः शलाका १.४६
तस्याः सखीभ्यां ३.६१
तस्याः सुजातो ७.२०
तस्यात्मा २.६०
तस्यानुमेने ७.९२
तस्योपकण्ठे ७.५१
तस्योपाय २.३६
तां नारदः १.४९
तां पार्वती १.२५
तां प्रणामादर ६.९०
तां प्राङ्मुखीं ७.१३
तां लोध्र ७.९
तां वीक्ष्य ३.५७
तां हंसमालाः १.२९

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तानर्घ्यानर्घ्य ६.५०
तामगौरव ६.१२
तामर्चिताभ्यः ७.२७
तामस्मद ६.२९
तावत्पताका ७.६३
तावद्भवस्यापि ७.३०
तासां च पश्चात् ७.३९
तासां मुखैरासव ७.६२
तिर्यगूर्ध्वमधस्ता ६.७१
तिसृभिस्त्वमव २.६
तीव्राभिषङ्ग ३.७३
तुषारसङ्घात १.५५
तेनामरवधू २.४०
ते प्रभामण्डलै ६.४
तेषां मध्यगता ६.११
तेषामाविरभूद् २.२
ते सद्मनि गिरे ६.४८
ते हिमालयं ६.९३
तौ दम्पती ७.७९
तौ सन्धिषु ७.९०
त्रिभागशेषासु ५.५७
त्वं पितॄणामपि २.१२
त्वत्सम्भावितं ६.२०
त्वमेव तावत् ५.६७
त्वमेव हव्यं २.१४
त्वया दत्तवरो २.३१
त्वामामनन्ति २.१३

ददौ सरः ३.३७
दिने दिने सा १.२४
दिवं यदि ५.४५
दिवाकराद् १.१२
दिवापि ७.३५
दुकूलवान् ७.७२
दृष्टिप्रतीपं ३.४३
देवास्तदन्ते ७.९१
द्रुमेषु ५.६०
द्वयं गतं ५.७१
द्विधा प्रयुक्ते ७.८९
धर्मेणापि पदं ६.१४
धातुताम्राधर ६.५१
धूपोष्मणा ७.१४
ध्रुवेण ७.८४
न केवलं ६.६०
न नूनं ७.६६
नमोऽस्त्वमूर्त २.४
नयनान्यरुणानि ४.१२
नवपरिणय ७.९४
न वेद्मि ५.६१
नागेन्द्र १.३५
निकामतप्ता ५.२३
नित्यमर्काच्च ६.१९
निनाय ५.२६
निर्वाण ३.५२
निर्वर्तया ५.७३

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निवार्यतां ५.८३
निवेदितं ५.४६
निशम्य ५.३
निष्कम्प ३.४२
निसृष्ट ५.११
न्यस्ताक्षरा १.७
पत्युः शिर ७.१९
पत्रान्त ७.८८
पदं तुषार १.५
परलोकनव ४.१०
परलोकविधौ ४.३८
परिणेष्यति ४.४२
पर्यङ्कबन्ध ३.४५
पर्याकुल २.२४
पर्याप्त ३.३९
पर्याय २.३५
पशुपति ६.९४
पाणिपीडन ८.१
पुनर्ग्रहीतुं ५.१३
पुराणस्य २.१६
पुरे तावन्त २.३२
पुष्पं प्रवालो १.४३
प्रणम्य ६.८१
प्रतिक्षणं ५.१०
प्रतिग्रहीतुं ३.६६
प्रतिपद्य ४.१६
प्रत्यर्थि १.५८
प्रदक्षिण ७.७८
प्रभामहत्या १.२७
प्रयुक्त ७.७७
प्रयुक्त ५.३९
प्रवात १.४५
प्रशमाद् २.१९
प्रसन्नदिक् १.२२
प्रसन्नशुक्ला ७.१५
प्रसाधिका ७.५८
प्रसीद ३.९
प्राक्तनानां ६.१०
बबन्ध ७.२५
बभूव ७.३२
बभौ च ७.८
बालेन्दु ३.२९
भवत्यनिष्टाद् ५.४२
भवत्सम्भा ६.५९
भविष्यतः ३.५८
भागीरथी १.१५
भुजङ्गमो ३.४६
भुवनालोकन २.४४
भ्रूभेदिभिः ६.४५
मदनेन ४.२१
मधु द्विरेफः ३.३६
मधुश्च ते ३.२१
मध्येन १.३८
मनीषिता ५.४

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मनो नव ३.५०
मन्दाकिनी १.२८
मन्दाकिन्याः २.४३
महार्ह ५.१२
महीभृतः १.२६
मुक्ता यज्ञो ६.६
मुखेन ५.२७
मुनिव्रतै ५.४८
मूढं बुद्धं ६.५५
मूर्ते च ७.४२
मृगाः प्रिया ३.३१
मृणालिका ५.२९
मैत्रे मुहूर्ते ७.६
यं सर्व १.२
यः पूरयन् १.८
यज्ञभाग ६.७२
यज्ञाङ्ग १.१७
यज्वभिः २.४५
यत्र कल्प ६.४१
यत्र स्फटिक ६.४२
यत्रांशुका १.१४
यत्रौषधि ६.४३
यथाप्रदेशं ७.३४
यथा प्रसिद्धै ५.९
यथाश्रुतं ५.६४
यथैव ६.७०
यदध्यक्षेण ६.१७
यदमोघं २.५
यदागमन ६.७४
यदा फलं ५.१८
यदा हि ५.५९
यदुच्यते ५.३६
यदैव १.५२
यद् ब्रह्म ६.१६
यमोऽपि २.२२
यश्चाप्सरो १.४
यस्य चेतसि ६.१८
या नः प्रीति ६.२१
यावद् ६.८०
योगिनो ६.७७
यौवनान्तं ६.४४
रचितं ४.१८
रजनी ४.११
रेखाविभक्तः ७.१८
रोमोद्गमः ७.७६
लग्नद्विरेफा ३.३०
लज्जा तिरश्चां १.४७
लतागृह ३.४१
लब्धप्रतिष्ठाः २.२६
लाङ्गूल १.१३
लीनद्विरेफं ७.१६
वचस्यवसिते २.५२
वधूं गिरिः ७.८२
वधूर्विधात्रा ७.८६

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वनेचराणां १.१०
वपुर्विरूपाक्ष ५.७२
वर्गावुभौ ७.५३
वर्णप्रकर्षे ३.२८
विकीर्ण ५.३७
विदितं ६.२६
विधिना ४.३१
विधिप्रयुक्त ६.५२
विधिप्रयुक्तां ५.३२
विन्यस्त ७.१०
विपत्प्रतीकार ५.७६
विबुधैरपि ४.१९
विभूषणो ५.७८
विमुच्य ५.८
विरोधि ५.१७
विलोचनं ७.५९
विवक्षता ५.८१
विवृण्वती ३.६८
विश्वावसु ७.४८
वीज्यते २.४१
वीतसिंह ६.३९
वृतं तेनेद २.५५
वृत्तानुपूर्वे १.३४
वैवाहिकीं ६.९२
वैवाहिकैः ७.२
व्यावृत्त २.३४
शङ्खान्तर ७.३३
शशिना ४.३३
शिखरा ६.४०
शिरसा ४.१७

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

व्याख्यानोद्धृतानि अमरकोशवाक्यानि(अमरः, अमरकोशः)

१.३ रत्नं स्वजातिश्रेष्ठेपि ३.३.१२६
१.४ धातुर्मनःशिलाद्यद्रेः २.३.८
१.५ कटकोऽस्त्री नितम्बोऽद्रेः २.३.५
१.७ पद्मकं बिन्दुजालकम् २.८.४१
१.७ लोहितो रोहितो रक्तः १.५.१५
१.८ कीचकावेणवस्ते स्युः २.४.२११
१.११ पुमान् पार्ष्णिरधस्तयोः २.३.७२
१.१२ नूनं तर्केऽर्थनिश्चये ३.४.१२
१.१४ प्रतिसीरा जवनिका २.६.३८६
१.१४ बिम्बोऽस्त्री मण्डलं त्रिषु १.३.१००
१.२४ अन्तरमवकाशावधि ३.३.१८६
१.२६ आत्मजस्तनयः सूनुः २.६.२८
१.३६ प्रश्नावधारणानुज्ञा ३.३.२४७
१.३७ स्त्री कटीवस्त्रबन्धेऽपि ३.३.१६७
१.४१ श्लक्ष्णं दभ्रं कृशं तनु ३.१.६१
१.४१ कलापे भूषणे बर्हे ३.३.१२८
१.४२ जनुर्जननजन्मानि १.४.३०
१.५२ पत्नी परिजनादान ३.३.२३८
१.५३ पुन्नपुंसकयोः प्रस्थम्
१.५७ मूल्ये पूजाविधावर्घे ३.३.१८४
२.१ तुराषाण्मेघवाहनः १.१.४७
२.१२ स्यादारम्भणमुद्घातः ३.२.१३९
२.१३ प्रधानं प्रकृतिः स्त्रियाम् १.५.२९
२.१३ क्षेत्रज्ञ आत्मा पुरुषः १.५.२९
२.१८ यानाद्यङ्गे युगः पुंसि ३.३.२४
२.२६ गर्वोऽभिमानोऽहङ्कारः १.७.२२

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२.२७ वाक्यालङ्कारजिज्ञासा ३.४.१०

२.३० जीव आङ्गिरसो वाच १.३.२४

२.३३ वापी तु दीर्घिका १.१०.२८

२.४३ पुमानाक्रीड उद्यानम् २.४.३

२.५७ धूर्जटिर्नीललोहितः १.१.४४

२.६३ इन्द्रो मरुत्वान् मघवा १.१.४४

३.६ उशना भार्गवः कविः १.३.२५

३.७ शीलं स्वभावे सद्वृत्ते ३.३.३५६

३.१३ विष्णुर्नारायणः कृष्णः १.१.८

३.१७ उपत्यकाद्रेरासन्ना २.३.७

३.१८ अर्थः स्याद् विषये मोक्षे

३.१८ प्रत्ययोऽधीनशपथ ३.३.१४७

३.२० खेदानुकम्पासन्तोष ३.४.३९९

३.३१ राजादनं प्रियालः स्यात् २.४.३५

३.४१ संज्ञा स्याच्चेतना नाम ३.३.१९०

३.५८ स्त्री द्वार्द्वारं प्रतीहारः २.२.१६

३.७४ ह्रादिनी वज्रमस्त्रा स्यात् १.१.५४

४.२ प्रलयो नष्टचेष्टता १.७.२३६

४.४ विक्लवो वह्वलः स्यात्तु ३.१.४४

४.४. विलापः परिदेवनम् १.६.१६

४.२७ चित्रं किर्मीरकल्माष १.५.१७

४.३३ प्रतिपज्ज्ञप्तिचेतनाः १.५.१५६

४.३८ निवापः पितृतर्पणम् २.७.३१

४.३९ कृपा दयानुकम्पा स्यात् १.७.१८

४.४४ उष्ण ऊष्मागमस्तपः १.४.१९

५.६ स्युः समर्थननीवाक ३.३.२५४

५.८ एकावल्येकयष्टिका २.६.१०६

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५.९ प्रसिद्धौ ख्यातभूषितौ ३.३.१०५

५.९ स्वादुप्रियौ तु मधुरौ ३.३.१९२

५.१२ वेदिः परिष्कृता भूमिः २.७.१८

५.१७ पर्णशालोटजोऽस्त्रियाम् २.३.६

५.२६ पौषे तैषसहस्यौ द्वौ १.४.१५

५.२८ काष्ठोत्कर्षे स्थितौ दिशि ३.३.१९७

५.३० पालाशो दण्ड आषाढः २.७.४६

५.३४ लता प्रतानिनी वीरुत् २.४.९

५.३४ ओष्ठाधरौ तु रदन २.६.९०

५.३८ त्रिवर्गो धर्मकामार्थै २.७.५८

५.४५ मङ्गलानन्तरारम्भ ३.३.२४६

५.४८ प्रतिष्ठा कृत्यमास्पदम् ३.३.९४

५.४९ अरालं वृजिनं जिह्मम् ३.१.७१

५.६१ सीता लाङ्गलपद्धतिः २.९.१४

५.८० वासवो वृत्रहा वृषा १.१.४५

५.८० प्रभिन्नो गर्जितो मत्तः २.७.३६

५.८५ देशे नदविशेषेऽब्धौ ३.३.१०१

६.२२ तत्त्वे त्वद्धाञ्जसा द्वयम् ३.५.१२

६.३८ स्याच्चयो वप्रमस्त्रियाम् २.३.३

६.४२ मेघच्छन्नेऽह्नि दुर्दिनम् १.३.१२

६.४२ तमिस्रा तामसी रात्रिः १.४.५

६.४२ तमिस्रं तिमिरं तमः १.८.३

६.४६ हिमवान् निषधो विन्ध्यो २.३.३

७.६ आकल्पवेषौ नेपथ्यम् २.६.९९

७.११ तत् स्यादुद्गमनीयं यद् २.६.३६८

७.५७ पाशः पक्षश्च हस्तश्च २.६.९८

७.६४ रूपं शब्दो गन्धरस १.५.७

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उद्धृतग्रन्थ-ग्रन्थकाराः

अमरः, अमरसिंहः
१.१, ३, ४, ५, ७, ११, १२, १४, २४, २६, ३६, ३७, ४१, ४२, ५२, ५३, ५७
२.१, १२, १७, २५, २९, ३२, ४२, ४५, ५६, ६२
३.६, १७, १८, ३१, ४१, ५८
४.१, ४, २५, २७, ३३, ३८, ३९, ४४
५.६, ९, १२, १७, २६, २८, ३०, ३४, ३८, ४५, ४८, ४९, ६१, ८०, ८५
६.२२, ३८, ४३, ४६
७.६, ११, ५७, ६४
काव्यादर्शः (दण्डी) १.१, १.२
काव्यालङ्कारसूत्रवृत्तिः (वामनः) १.३४,
किरातार्जुनीयम् (भारविः) १.१
केशवः ७.३३
क्रियानिघण्टुः २.४५, ३.१५, ५.४५
गार्ग्यसंहिता २.३१
छन्दःशास्त्रम् १.१
ज्योतिर्भद्रकम् ६.१९
ज्योतिःशास्त्रम् १.२४, ७.१
तार्किकरक्षा (वरदराजः) ६.१
दक्षिणावर्तनाथः १.३४, २.२०, २.३५, ३.२५, ३.७३, ५.४३, ६.३९
धर्मशास्त्रम् १.१२, १.१९, ५.८३
न्यासकारः (जिनेन्द्रः) २.१६
पञ्चाङ्गमन्त्रः १.२२

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पराशरसंहिता ६.३
पाणिनिः
१.२, ७, १२, २५, २८, ३४, ५१, ५७
२.१, ३, ७, ८, १६, १७, १८, २८, ४५, ५५, ५६
३.७, ९, ५८, ७५
४.२६, २७, २९, ३१
५.१२, १६,२२, २५, २६, २८, ३९, ४३, ५०, ५५, ६५, ७०
६.४३, ५८, ६४, ६८, ७८, ८०
७.२, ३९, ४९, ८०
पुराणम् १.१८, २.७
भगवद्गीता २.८, २.१३
भरतः १.८, ५.८५
भोजराजः १.१, २३, ३०, ४५
२.१, १६, ३४, ५४
३.५, ६, १०, १२, १३, ३०, ३१,
४०, ४५, ६६, ६८, ७३, ७५
४.३, ५, १३, १५, २५, ३१, ३२, ३५, ४५
५.४, १३, १४, १७, २२, २५, २७, ३१,३३, ३४,
३८, ३९, ४२, ४४, ४५, ५६, ५८, ६१, ६२, ६५,
६८, ७०, ८१, ८५, ८६
६.१, ५, ६, १५, १७, १८, २१, २३, २७, ३२, ३५,
३९, ४३, ४४, ५८, ६०, ६३, ६७, ७०,
७२, ७८, ८४, ८७, ९०
७.२, ७, ८, ९, १०, १४, २०, २५, ३३, ३६, ३९,
४५, ४८, ६०, ६५, ६९, ८३, ८८
मनुः १.२७ २.५ २.७. ५.३० ७.७
माघः ३.३, ३.७, ५.७१

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मुरारिः ५.४७

यजुर्वेदः १.१२

योगरत्नकोशः ३.४५, ३.४९

रतिरहस्यम् १.१०

रत्नलक्षणशास्त्रम् १.२४

वल्लभदेवः १.२७, २.४६

वसिष्ठः १.१६

वाचस्पतिः(छन्दोलक्षणम्) ४.१

वार्तिकम् (कात्यायनः वररुचिः) ३.७५

विश्वप्रकाशिका २.४८, ३.२५

वेदान्तदर्शनम् (पञ्चपादिका) २.४

वैजयन्ती, यादवः (यादवप्रकाशः)
१.१, १.४१, १.५१, १.५४, २.३०, २.३५, ३.३२, ३.३५ ४.१, ५.८, ५.११, ५.२३, ५.२८, ५.७६, ६.४४, ६.५८, ७.१७

वैद्यशास्त्रम् २.४७

शाश्वतः १.४९, ४.१, ४.४२, ६.१५, ७.७

शैवागमः ५.८४, ६.२६, ६.९४

श्रुतिः १.१७, २.१४, २.१७, ५.२३, ५.३१, ५.८१, ६.१३, ७.४४

सङ्गीतशास्त्रम् ३.५

सौन्दर्यलहरी ४.१५

स्कन्दपुराणम् २.५, २.८, ६.७५

स्मृतिः (भगवद्गीता) ३.४२, २.३४

हलायुधः २.१८, ७.११

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परामृष्टग्रन्थाः

अनर्घराघवम् (मुरारिः) वाराणसी सं. २०१७

अभिधानरत्नमाला(हलायुधः) लखनऊ १९९३, २०१०

अमरकोशः प्रसाराङ्गः मैसूरु १९८९

काव्यादर्शः पुण्यपत्तनम् १९३८

काव्यालङ्कारसूत्रम् काव्यमाला Bombay 1926

किरातार्जुनीयम् निर्णयसागर Bombay 1895

कुमारसम्भवम् अहमदाबाद १९८६

कुमारसम्भवम् Bombay 1917

कुमारसम्भवम् Trivandrum 1913 - 16

कृष्णयजुर्वेदीयतैत्तिरीयसंहिता आनन्दाश्रमः पुणे १९४०

तार्किकरक्षा Tirupati 2004

नाट्यशास्त्रम् काव्यमाला ४२ Bombay 1894

नानार्थार्णवसङ्क्षेपः Trivandrum 1913

नाममालिका Poona 1955

पञ्चपादिका केन्द्रीयसंस्कृतविद्यापीठ तिरुपति १९८५

ब्रह्माण्डपुराणम् वाराणसी १९८३

भगवद्गीता गीता प्रेस् गोरखपुर सं. २०५०

मनुस्मृतिः गीताप्रेस् गोरखपुर १९९९

महाभारतम् Calcutta 1834 - 39

मेदिनीकोशः Calcutta 1872

रतिरहस्यम् वाराणसी २००९

विष्णुपुराणम् गीताप्रेस् गोरखपुर सं.२०७६

वैजयन्ती (यादवः, यादवप्रकाशः) Madras 1893

शाश्वतकोशः Poona 1929

शृङ्गारतिलकम् Paris 1896

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सरस्वतीकण्ठाभरणम् काव्यमाला ९४ Bombay 1934
सिद्धान्तकौमुदी कामाक्षिसेवासमितिः Bombay 1980
सौन्दर्यलहरी ORI, Mysore 1969
स्कन्दपुराणम् Mysore 1950

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चित्रम्

हित्लळ्ळि सूर्यनारायण नागेन्द्र भट्टः

आरामग्रामाभिजनोऽयं वासिष्ठगोत्रजः कर्णाटजनपद उत्तरकन्नडमण्डलस्य यल्लापुरसमीपे स्वग्रामे विद्याभ्यासं आरभ्य महीशूरपुरे महाराजसंस्कृतमहाशालायां, धारवाड पुरे कर्नाटकविश्वविद्यालये, तिरुपतिस्थे केन्द्रीयसंस्कृत विद्यापीठे च विद्याभ्यासं विधाय विद्यावारिधिपदवीं प्राप्तवान्। मैसूरु - राणीबेन्नूरु - बालुश्शेरि - पुदुचेरि प्रदेशेषु अध्यापनादि विहितवान्। विद्यार्जनसमय एव नैकपारितोषकभागयं श्रीस्वर्णवल्लीप्रभृतिषु शाङ्करमठेषु, अखिलहव्यकमहासभादिषु च पुरस्कृतः। मातृभाषायां देवभाषायां च अनेन चत्वारिंशदधिकग्रन्थाः स्वनाम्नि प्रकाशिताः। सम्प्रति प्रकाशितमिदं महाकविकालिदासीयं कुमारसम्भवकाव्यं विद्यामाधवीयव्याख्यासहितं अन्याभ्यो व्याख्याभ्यो विदुषां समेषां विशिष्यते। अस्य प्रायोजकौ वासिष्ठान्ववायजौ विशेषतो विद्यामाधववंशजौ -

पुण्यपत्तनवासी श्रीमहाबलेश्वरपण्डितः,

बेङ्गळूरुनगरवासी श्रीपरमेश्वरपण्डितश्च।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



CC-0. In Public Domain. Cuddalore Collection. TN.